राष्ट्रियसंस्कृतविश्वविद्यालयग्रन्थमाला-352
ISSN: 2231-0452

# महस्विनी

# MAHASVINĪ

विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका
(Peer-reviewed and Refereed Research Journal)

कुसुमम् : जानुवरी - जुलै २०२२
Vol. January - July 2022

सम्पुटम् : प्रथमम्
Part : First

प्रधानसम्पादकः
आचार्यः राधाकान्तठाकुरः
कुलपतिः

सम्पादकः
आचार्यः कोराड सूर्यनारायणः




राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः
(केन्द्रीयविश्वविद्यालयः)

राष्ट्रियसंस्कृतविश्वविद्यालयग्रन्थमाला – ३५२ ISSN: 2231-0452

# महस्विनी
# MAHASVINĪ

विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका
(Peer-reviewed and Refereed Research Journal)

**कुसुमम्** : जनवरी – जुलै २०२२ **सम्पुटम्** : प्रथमम्

प्रधानसम्पादकः
आचार्यः राधाकान्तठाकुरः
कुलपतिः (प्रभारी)

सम्पादकः
आचार्यः कोराड सूर्यनारायणः

राष्ट्रियसंस्कृतविश्वविद्यालयः
(केन्द्रीयविश्वविद्यालयः)
तिरुपतिः

# महस्विनी

(विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका)

**ISSN : 2231-0452**

कुसुमम् : जनवरी – जुलै २०२२
सम्पुटम् : प्रथमम्

प्रकाशनवर्षम् : २०२२
प्रतिकृतयः : १५०

© राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः – ५१७५०७, आन्ध्रप्रदेशः।

प्रकाशकः
**कुलसचिवः**
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

संयोजकः
**अनुसन्धानप्रकाशनविभागः**
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

NSU Publication Series - 352 ISSN: 2231-0452

# MAHASVINĪ

**(Peer-reviewed and Refereed Research Journal)**

**Volume :** January - July 2022 **Part :** First

General Editor

**Prof. Radhakant Thakur**

**Vice - Chancellor i/c**

Editor

**Prof. K. Suryanarayana**

**NATIONAL SANSKRIT UNIVERSITY**

**(Central University)**

**TIRUPATI**

**MAHASVINĪ**
(Peer-reviewed and Refereed Research Journal)
**ISSN : 2231-0452**

Volume : January - July 2022
Part : First

Year of Publication : 2022
Copies printed : 150

© National Sanskrit University, Tirupati - 517507, A.P.

Publisher :

**REGISTRAR**
National Sanskrit University,
Tirupati, Andhra Pradesh

Co-ordinator :

**Research and Publications Department**
National Sanskrit University, Tirupati

**Disclaimer :** The views expressed in the Research papers are those of the authors and not of the editors.

Prof. RADHAKANT THAKUR
VICE - CHANCELLOR i/c

NATIONAL SANSKRIT UNIVERSITY
(Central University)
TIRUPATI – 5175 107 (A.P.)

# पुरोवाक्

अखिलाण्डकोटिब्रह्माण्डनायकस्य शेषाचलश्रीनिवासस्य पद्मावतीजानेः श्रीवेङ्कटेशस्य कृपाकटाक्षेण नैरन्तर्येणैधमानस्याविश्वं कीर्तिं लभमानस्य तिरुपतिस्थस्य राष्ट्रियसंस्कृतविश्वविद्यालयस्य शोधप्रकाशनविभागेन प्रकाश्यमानायाः सुप्रथितायाः विद्वन्मण्डलीसीक्षितायाः परामृष्टायाश्चास्या 'महस्विनी' इत्याख्यायाः शोधपत्रिकाया कुसुममिदं प्रकाश्य विद्वत्तल्लजानां करकमलयोः सादरं समर्पयितुं नितान्तं मोमोत्ति मे स्वान्तम्।

तत्र आप्राक्कालान्निरवच्छिन्नं प्रवर्तमाने प्रवर्धमाने च गवेषणाकार्ये नैके विपश्चित्पश्चिमा विविधशास्त्रनदीष्णाः पूर्वतनानां विचारविगर्भितशेवधीन् विमृश्य तैस्तत्रानाविष्कृतान् स्वोपज्ञान् विषयानधिकृत्य ग्रन्थान् प्रणीय शोधप्रबन्धाँश्च विनिर्माय संस्कृतवाङ्मयं संवर्धयन्तोऽ-नुसन्धानक्षेत्रस्य सीमानमपि नित्यं परिवर्धयन्तो दृश्यन्ते बद्धपरिकराः। तामेव परम्परामिदानीमपि अनुसरन्त आधुनिकविद्वांसः, शोधार्थिनो युवगवेषकाश्च स्वस्वविषये क्रियमाणे शोधकर्मणि गुणवत्तामादातुं यतमाना वर्तन्ते। तैः कृतं कार्यं परिशील्य समीक्ष्य च प्रोत्साहयितुं सहायिका भवन्ति एतादृश्यः शोधपत्रिकाः। तदर्थं बहुभिः संस्थाभिः निकायैर्वा विदुषां मार्गदर्शनेन बहुविधशोधपत्रिकाः प्रकाश्यन्ते। एतदुद्दिश्यास्माकं विश्वविद्यालयेनापि तत्र-तत्र कार्यरतेभ्यो विद्वद्भ्यः, प्राध्यापकेभ्यः शोधच्छात्रेभ्यश्च शोधनिबन्धान् शोधलेखान् सङ्कलय्य विद्वन्मण्डलीद्वारा तेषां गुणवत्तां मौलिकतां च परीक्ष्य विद्वत्समीतेः समीक्षायाः संस्तुतेः परं संस्तुतान् लेखान्समादृत्य पत्रिकेयं प्रकाश्यते। अनेनानुसन्धानक्षेत्रे गवेषणारतच्छात्राणां कृते नूतनसिद्धान्तानां काचिदपूर्वा सरणिः समुपलब्धा भवतीति मे द्रढीयान् विश्वासः। महस्विन्याश्चेदं कुसुमं पण्डितानां पाण्डितीप्रपूर्णैः लेखैः सुशोभितशशीव सुशोभतेतरां नितराम्। एवञ्चास्याः पत्रिकाया एतादृशं सुन्दरं कलेवरं

सम्पादयितुं यैर्मनीषिभिरवयवरूपाः स्वीया लेखाः समर्पितास्तेभ्यः समेभ्यः हृदयेन धन्यतावचांसि प्रकटयामि।

एवमेव एतादृशप्रकाशनकार्यस्य साफल्याय निरन्तरं प्रवर्तमानो नः शोधप्रकाशनविभागः तथैवान्तर्बाह्यसदस्यैः समन्विता प्रकाशनसमीक्षासमितिश्च, यस्या मार्गनिर्देशने एतत्प्रकाशनकार्यं सुसम्पन्नमिति सर्वेषामपि समितिसदस्यानां शोधप्रकाशनविभागीयानाञ्च कृते कृतज्ञतां मदीयां निवेदयामि।

इत्थं श्रीवेङ्कटेशस्य कृपाकटाक्षेण विश्वविद्यालयेन निर्विघ्नतया सुरभारतीसेवेयं सदैव प्रवर्ततामित्याशया पुनरपि भगवते मदीयान् प्रणामान् संसूच्य महस्विनीयमागामिनि काले प्रकाश्यमानैः कुसुमैः स्वज्ञानसुरभिणा लोकान् रञ्जयन्ती इतोऽपि महनीयतां प्राप्नुवन्ती च समेषां प्रीतिकरा भवत्वीति कामयते।

इत्थम्



**(आचार्यः राधाकान्तठाकुरः)**

## सम्पादकमण्डली

**प्रधानसम्पादकः**

**आचार्यः राधाकान्तठाकुरः**

कुलपतिः

**सम्पादकः**

**आचार्यः कोराड सूर्यनारायणः**

अनुसन्धानप्रकाशनविभागाध्यक्षः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**सदस्याः**

**आचार्यः पेन्ना मधुसूदनः**

दर्शनसङ्कायप्रमुखः, कालिदासंस्कृतविश्वविद्यालयः, रामटेक

**आचार्यः वीरनारायण पाण्डुरङ्गी**

वेदान्तसङ्कायप्रमुखः, कर्नाटकसंस्कृतविश्वविद्यालयः, वेङ्गलुरु

**डा. वेङ्कट राधेश्यामः**

उपनिदेशकः, शोधप्रकाशनविभागः, श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः, तिरुपतिः

**आचार्यः राणी सदाशिवमूर्तिः**

शैक्षिकसङ्कायप्रमुखः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**आचार्यः जी.एस्.आर्.कृष्णमूर्तिः**

साहित्यसंस्कृतिसङ्कायप्रमुखः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**डा.पङ्कजकुमारव्यासः**

सहाचार्यः, व्याकरणविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**डा. शिवरामभट्टः, डा. राजेशमीना**

सहाचार्यः, अनुसन्धानप्रकाशनविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**डा. सोमनाथदाशः, डा.सीहेच्. नागराजु**

सहायकाचार्यः, अनुसन्धानप्रकाशनविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**डा. दिल्लीपकुमारमिश्रः**, शोधसहायकः

# महस्विनी

**(तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालयशोधपत्रिका)**

१. एषा षाण्मासिकी शोधपत्रिका।

२. अस्याः प्रकाशनं प्रतिवर्षं जनवरी-जुलाईमासयोः भवति।

३. अस्याः प्रधानमुद्देश्यं संस्कृतज्ञेषु स्वोपज्ञानुसन्धानप्रवृत्तेरुद्बोधनं प्रोत्साहनं विविध-दृष्ट्याऽनुसन्धेयविषयाणां प्रकाशनं च।

४. अस्यां तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालयस्थानामन्येषां च विदुषां स्वोपज्ञविचारपूर्णा अनुसन्धानप्रधाननिबन्धाः प्रकाश्यन्ते।

५. अप्रकाशितानां दुर्लभानां प्राचीनाचार्यरचितानां लघुग्रन्थानां सम्पादन-भावानुवाद-टिप्पण्यादिपुरस्सरं प्रकाशनमप्यस्यां क्रियते।

६. प्रकाशितनिबन्धस्य प्रतिमुद्रणानि पत्रिकायाश्च स एव अङ्कः लेखकाय निःशुल्कं दीयते, यस्मिंस्तदीयो निबन्धः प्रकाशितो भवति।

७. अस्यां पत्रिकायां विशिष्टानां संस्कृतवाङ्मयसम्बद्धानां विविधासु भाषासु प्रणीतानां ग्रन्थानां समालोचना अपि प्रकाश्यन्ते। तदर्थं द्वे प्रकाशितप्रतिकृती प्रेषयितव्ये। आलोच्यग्रन्थस्य समालोचना यस्मिन्नङ्के प्रकाशिता सोऽप्यङ्को ग्रन्थकर्त्रे निःशुल्कं दीयते, समालोचना-पत्राण्यपि यथासौविध्यं दीयन्ते।

८. अस्या वार्षिकशुल्कं रू.२५५/-, द्विवार्षिकशुल्कं रू.४२५/-, त्रिवार्षिकशुल्कं रू.६८०/- सन्ति, इदं शुल्कं **कुलसचिवः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः, आन्ध्रप्रदेशः-५१७५०७** इति सङ्केतेन बैंकड्राप्ट द्वारा प्रेषणीयम्।

९. पत्रिकासम्बन्धी सर्वविधः पत्रव्यवहारः **सम्पादकः, महस्विनी-शोधपत्रिका, राष्ट्रियसंस्कृतविश्वविद्यालयः, आन्ध्रप्रदेशः, तिरुपतिः-५१७५०७** इति सङ्केतेन विधेयः।

— **सम्पादकः**

**सू.** — शोधलेखप्रणेतारः यथाकालं स्वकीयान् संस्कृताङ्ग्लभाषाप्रणीतान् शास्त्रविषयकान् अनुसन्धानलेखान् प्रेषयन्तु, यथावसरं सम्पादकमण्डलस्यानुशंसानुरूपं लेखाः प्रकाशयिष्यन्ते।

# सम्पादकीयम्

संस्कृतवाङ्मये अनुसन्धानस्य क्षेत्रं व्यापकं वर्तते। प्राचीनैर्महर्षिभि: प्रतिपादितविषयेषु नवीनतत्त्वान्वेषणम् उत प्रसङ्गानुसारं नवीनपदार्थस्य प्रतिपादनम् अनुसन्धानस्य द्वारमुद्घाटयति। स्वविकल्पानुसारं विद्वांस: काले काले समाजस्य अपेक्षानुसारं नवीनाविष्कारं कुर्वन्त एव भवन्ति अकृषत च। भाषाक्षेत्रे प्रायोगिकक्षेत्रे च अनुसन्धानस्य स्वरूपं भिन्नं भवितुमर्हति। परन्तु उभयत्रापि नवीनतत्त्वान्वेषणमिति समानं वर्वर्ति। संस्कृतं भाषाक्षेत्रे वर्तत इति कृत्वा व्याख्यानरूपम् अनुसन्धानं बहुधा व्यापकं स्थानमावहति। अत: संस्कृतवाङ्मये अभियुक्तै: प्राचीनकालादारभ्य अद्य यावत् नवीनतथ्यप्रतिपादकं व्याख्यानात्मकम् अनुसन्धानकार्यं विहितमस्ति। तर्हि ततोऽप्यधिकं नवीनं किं वा अवशिष्टमस्तीति केषाञ्चन शोधलेखकानां मनस्सु नूतनविषयमधिकृत्य लेखनावसरे अनुयोग: जागर्ति। परन्तु कस्यापि विषयस्य गभीरावलोकनेन वारं वारम् अधिगमनेन च विद्यमाने विषये नवीनचिन्तनं स्फुरति आहोस्वित् अवशिष्टं नवीनं तत्त्वं वा प्रादुर्भवति। अत: शोधलेखनात् पूर्वं कस्यापि विषयस्य कूलङ्कषमध्ययनम् अवश्यं क्रियते। येन समाजोपयोगि नवीनशोधकार्यं समेषां पुरस्तात् समायायात्।

एवमेव नूतनविषयप्रतिपिपादयिषितृणां शोधलेखकानां लेखान् बहुभ्य: वत्सरेभ्य: प्रकाशयन्ती शिक्षाक्षेत्रे महनीयं स्थानमावहति राष्ट्रियसंस्कृतविश्वविद्यालयेन प्रकाश्यमानेयं 'महस्विनी' सार्थकनामधेया शोधपत्रिका। अस्या: महस्विन्या: प्रकाश्यमानेऽस्मिन् कुसुमे विभिन्नशास्त्रेषु कृतपरिश्रमवताम् आचार्याणां शोधच्छात्राणां विदुषां च लेखा: प्रकाश्यन्ते।

एतेषां शोधलेखानां समीकरणे मूल्याङ्कने च नैकेषां विदुषां साह्यमनुसन्धान–प्रकाशनविभागेन प्राप्तमस्ति। एवमेव विश्वविद्यालयस्य कुलपतीनां प्रेरणया प्रोत्साहनेन च

इयं 'महस्विनी' अविच्छिन्नतया प्राकाश्यमेति। विश्वविद्यालयस्य शैक्षणकिसङ्कायप्रमुखाणां मार्गदर्शनं सन्दर्भेऽस्मिन् अस्माभिः प्राप्यत। तथा च सम्पादकमण्डसदस्याः अस्याः शोधपत्रिकायाः अन्तिमस्वरूपप्राप्तौ साह्यमदुः। विश्वविद्यालयस्य कुलसचिवसमेताः समे अधिकारिणः अस्याः प्रकाशने प्राशासनिकम् अपेक्षितं साहाय्यमकार्षुः। अतः अनुसन्धानविभागपक्षतः एतेभ्यः समेभ्यः धन्यवादान् वितनोमि।



**(आचार्यः के.सूर्यनारायणः)**

सम्पादकः

# शोधलेखानुक्रमणी

**कुसुमम् :** जनवरी – जुलै २०२२ **सम्पुटम् :** प्रथमम्

पुटसंख्या

१. **कृष्णयजुर्वेदोक्तरीत्या काम्यकर्माणि** 1

- डा. कूर्मारावः डि.

२. **सिद्धान्तकौमुद्याः मङ्गलश्लोकविचारः** 6

- डा. शुभचन्द्र झा

३. **संस्कृतव्याकरणस्य प्रयोजनानि** 14

- डा. हेच्. रविचन्द्रः

४. **फलितज्यौतिषे मान्देः स्थानम्** 20

- अनुलकुमारदेसायिः

५. **कारकविभक्त्यर्थविचारः** 26

- स्वाती ईश्वर लोडे

६. **आयुर्वेदे ऋत्वनुगुणं प्राकृतिकशारीरिकस्थितयः** 37

- डा. देवव्रत वेरा

७. **विशिष्टाद्वैतसिद्धान्ते श्रीभाष्यप्रमेयसंग्रहः** 51

- डा. एन्.आर्.सौम्यनारायणः

८. **पुष्पिकायाः अध्ययनेन ग्रन्थकारस्य वंशपरिचयः** 69

- मैत्रेयी नंदकुमार मणेर

९. **प्राचीनशिक्षाग्रन्थानां पूजनं प्रति आस्था कालादेव अपेक्षितम्** 87

- डा. कैलाश चन्द मीणा - डा. जगदीश कुमार जाटः

१०. **गीताद्युक्तः अहिंसास्वरूपविमर्शः** 98

- विनयकुमारः

११. **संस्कृतच्छात्राणां बुद्धिविकासे सङ्गणकसहकृताधिगमस्य (ICT) उपयोगिता** 111

- चन्दन पाल्

१२. **महाकवि-अवस्थीबच्चूलालप्रणीते अगतिकगतिकमित्यस्मिन् खण्डकाव्ये सामाजिकचिन्तनम्** 128

- शुभम् मुखोपाध्यायः

१३. **न्यायदर्शने मोक्षविमर्शः** 148

- वि. प्रदीपकुमारः

१४. **उदयनस्य ऐतिहासिकता** 157

- यदुश्री केपि.

१५. **भास्कराचार्योक्तरीत्या समवृत्तीयनतांशैः सूक्ष्माक्षवलनसाधनम्** 166

- गिरीशभट्टः बि.

१६. **Ancient Indian Kalman Thoughts** 178

- Balakram Sarswat

१७. **New Education Policy and Capacity building in Contemporary Society** 189

- Dr. Swetapadma Satapathy

१८. **Psychological Aspects of Chathurvarnya the *Bhagavad-Gita*'s Perspective** 195

- Dr. Ranjith K.K

महस्विनी – विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452)
कुसुमम् : जनवरी - जुलै २०२२ सम्पुटम् : प्रथमम्

# कृष्णयजुर्वेदोक्तरीत्या काम्यकर्माणि

डा. कूर्मारावः डि

**काम्यकर्माणि** – Desirous Deeds

प्रपञ्चेऽस्मिन् यः जीवितुमिच्छति स सुखेन जीवितुमिच्छति। परं लोकस्य विडम्बना इयम् यदत्र कोपि सुखी नास्ति। यस्य कारणं वर्तते जीवनपद्धतिः सम्यक् नास्ति। प्रकृत्या अस्माभ्यं सर्वेभ्यः सर्वं प्रदत्तं किन्तु वयं न तत् प्राप्नुमः यत् अस्माकं कृते आवश्यकं वर्तते। वयं च तत् प्राप्नुमः यत् अस्माकं कृते तु हानिकरं वर्तते। भक्ष्याभक्ष्यविचारं परित्यज्य ये उदरपोषणे रताः सन्ति ते भविष्ये दैहिकव्याधिं लभन्ते एव।

उक्तं च शास्त्रे -

बर्बूरस्य वपने आम्रफलप्राप्तिर्नैव जायते। कर्मणः एव प्रधानता अत्र सिद्ध्यति। तन्मानवद्वारा क्रियमाणानि कर्माणि द्विविधानि सन्ति। लौकिकमलौकिकं च। लौकिकेनोपायेन मानवः क्षणिकं सुखं प्राप्तुं शक्नोति न च पारलौकिकम्।

**काम्यकर्मपदार्थः** – Meaning of Kamya Karma

मनुष्यः स्वजीवने निरन्तरं कामयमानः भवति। ऐश्वर्यं प्रज्ञां पुत्रादिसन्तानं श्रद्धां मेधां यशः विद्यां बुद्धिं श्रियं बलं भूतिं चेत्यादिकं प्रत्यहं मनुष्यः कामयते। तादृशः पुरुषः विरलतया लभते यः न किञ्चित् कामयते। अतः कामाय क्रियमाणकर्माण्येव काम्यकर्माणि भवन्ति। तदुक्तम् -

**काम्यानि स्वर्गादीष्टसाधनानि ज्योतिष्टोमादीनि**

ज्योतिष्टोमपुत्रकामेष्ट्यादीनि कर्माणि एव काम्यानि कर्माणि। नित्यनैमित्तिक-कर्मणीव एतानि नावश्यं क्रियेरन्। यतः अत्र मनुष्यस्य कामः एव वर्तते। अतः

कर्मकाण्डानुसारिणः एतादृशकर्माणि अधिकतया आचरन्ति। एते यागाः स्वर्गभूत्यादिकामनाय इज्यन्ते ।

मानवः सर्वदा सुखाकाङ्क्षी एव। यतः सामन्यमनुष्यस्य मनः इन्द्रियाधीनं भवति । इन्द्रियाणि तु जलमिव उपरिष्टात् अधः एव प्रवहन्ति। अर्थात् सर्वदा तेषां विषयेषु एव प्रवर्तन्ते। नयनं मनोहरं दृश्यं दिदृक्षते। जिह्वा रुचिकरमाहारं बुभुक्षति। श्रोत्रं कर्णपेयं गानं शुश्रूषते। एवमेव चर्म उत्तमं वस्तु स्पर्ष्टुं वाञ्छति । तथैव नासिका उत्तमं गन्धम् आघ्रातुम् इच्छति। एवं मानवः इन्द्रियाधीनो भूत्वा सर्वदा यत्किञ्चित् कामयमानः एव वर्तते ।

अतः देवं सर्वं ददातु इत्येवं प्रार्थयते। एतच्च स्वाभाविकं कर्म मनुष्याणाम्। अतः काम्यकर्माणि आरब्धानि। वस्तुतः पूजादीनि अपि कामनया एव क्रियन्ते। यतः भक्तिरपि सकामा भवति। अतः सर्वाणि कर्माणि अपि कम्यानि एव भवन्ति। तथैव ये च पुष्टिहोमाः क्रियन्ते अपि कम्यकर्माणि भवन्ति। तदुक्तम् -

**आधुनिकपरिप्रेक्ष्ये काम्यकर्माणि** – Kamya Karma in Modern Scenario

काम्यकर्माणि ज्योतिष्टोमाश्वमेधायागादीनि यान्यासन् तानि अधुना चिन्तयितुं न शक्यन्ते। राजप्रशासने मुनीनां सत्त्वे तान्यासन्। परमधुना सकामभक्त्या यानि होमादीनि अनुष्ठीयन्ते तान्येव काम्यकर्मरूपेण स्वीकरणीयानि।

पौष्टिकशान्तिकरूपाः होमाः अधुना कञ्चन कामं निमित्तीकृत्य क्रियन्ते। सर्वकामः रुद्रहोमम्, विघ्ननिवारणकामः गणहोमम्, आयुरारोग्यकामः विष्णुसम्बद्ध-होमम्, श्रीकामः लक्ष्मीसम्बधहोमं च आचरति। एवमेव तेषां तेषां कामानुसारेण देवताहोमाः आचर्यन्ते। तान् एव काम्यकर्मरूपेण स्वीकुर्यात्। एतेषां होमादिकर्मणां नैजार्थं विज्ञाय अनुष्ठानं क्रियेत। तदा अस्माकं संस्कृतिः आचन्द्रार्कं सुतिष्ठति।

**प्रमुखानि काम्यकर्माणि** – Major Kamya Karma

प्रसिद्धानि काम्यकर्माणि तावत् श्रौतकर्माणि। तानि च इमानि –

१. पाकयज्ञाः २. हविर्यज्ञाः ३. सोमयागाः

**कृष्णयजुर्वेदे काम्यकर्माणि** – Kamya Karma in Krishna Yajurveda

पूर्वभणितरीत्या यज्ञाः एव काम्यकर्माङ्गत्वेन परिगणितानि। अतः आदौ यज्ञपदार्थः ज्ञानीयः। यज देवपूजासङ्गतिकरणदानेषु इत्यस्मात् धातोः नङ्प्रत्यये यज्ञपदं सिध्यति। इज्यन्ते देवताः अत्र इति विग्रहः। एवम् एतस्य देवपूजादयोऽर्थाः सन्ति। विष्णुवाचकोऽपि अयम् । तद्यथा–

**'स्वाराधनधर्मसमृद्धिरिक्तानां तदर्थिनां स्वयमेव यज्ञः तादृशो धर्मः ।'**

तथैव - **"यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः ।"**

कोशे अग्निवाचकत्वमपि कथितम्। यथा - **"यज्ञोऽग्न्यात्महरीष्टिषु"** इति ।

परं प्रधानतया अस्य यागवाचकत्वमेव भवति। एषः यज्ञः बहुविधः भवति । तद्यथा –

**"द्रव्ययज्ञास्तपोयज्ञाः योगयज्ञास्तथापरे ।**
**स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥"**

द्रव्यस्य तपसः योगस्य स्वाध्यायस्य ज्ञानस्य च यज्ञाः तेषां धर्मानुसारेण लक्ष्यानुसारेण च पूर्वम् आचर्यमाणाः आसन्। तथैव पूर्वस्मिन्नध्याये विमिष्टाः पञ्च महायज्ञाः अधुना अत्र परामृष्टाः सप्त पाकयज्ञाः सप्त हविर्यज्ञाः सप्त सोमयज्ञाः अपि यथाविधि पूर्वम् अनुष्ठाप्यन्ते स्म। एते सर्वे अपि पुनः त्रिधा विभक्तुं शक्यन्ते।

तद्यथा –

**"अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते ।**
**यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ॥"**

यः कोऽपि यज्ञः भवतु तत्र यदि विधिः पाल्यते परहितं भवति फलापेक्षाभावः भवति चेत् सः यज्ञः सात्त्विकः इत्युच्यते । तथैव दम्भार्थं फलमेव अभिसन्धाय अहङ्कारेण यः यज्ञः अनुष्ठीयते स च राजसः भवति । यथा –

**"अभिसन्धाय तु फलं दम्भार्थमपि चैव यः ।**
**इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥"**

एवमेव शास्त्रविधिं त्यक्त्वा श्रद्धाया विना मन्त्ररहितः यः यज्ञः सः तामसः भवति। यथा –

**"विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् ।**
**श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥"**

यज्ञविषयः यजुर्वेदसूत्रे इत्थं निगदितः।

**उपसंहारः-**

कामोऽप्यन्यतमः चतुर्विधपुरुषार्थेषु। कामशब्दस्य सामान्यः अर्थः अभीष्ट इति। मनसि कामं निधाय क्रियमाणं यत् कर्म तत् काम्यं भवति। अधुना जना अहर्निशं बहुविधं कामयन्ते परं च तान् साधयितुं नानुसरन्ति वैदिकमार्गम्। कारणं यदा ज्ञातुमुद्यतः तदा ज्ञायते ज्ञानभावः वैदिककर्मणाम्। क्वचित्तु ज्ञाने सत्यपि अकर्मण्यत्वादेवासामार्थ्यं दृश्यते।

पुरा काले तु जनाः विशेषेण काम्यकर्माणि आचरन्तः स्म। राजानो सम्राटश्च पुत्रकामाः पुत्रकामेष्टिमाचरन्तः आसन् इति न केवलं काव्येभ्यः ज्ञायते अपि तु अस्य कृते काम्यसाधनाय विधिग्रन्था अपि उपलब्धास्सन्ति।

स्वर्गकामो मोक्षकामो राज्य-धन-धान्यकामाः वेदोक्तरीत्या काम्यकर्माणि आचरन्तः जीवनयापनं कुर्वन्ति स्म। अधुना अपि कामविषयाः ते एव सन्ति ये पुरा जनेषु वर्तन्ते। परं तेषां पार्श्वे स सुखदः वेदमार्गो नैव अस्ति।

सहायकप्राध्यापकः
श्रीकालभैरवेश्वरसंस्कृतवेदागममहाविद्यालयः
श्री आदिचुञ्चनगिरि क्षेत्रम्
नागमङ्गलम् उपमण्डलम्, मण्ड्य मण्डलम्
कर्नाटकराज्यम् 571811
दूरवाणी 9902356310
Email Id: kurmaraod123@gmail.com

❑❑❑

महस्विनी – विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452)
कुसुमम् : जनवरी - जुलै २०२२ सम्पुटम् : प्रथमम्

# सिद्धान्तकौमुद्याः मङ्गलश्लोकविचारः

**डा. शुभचन्द्र झा**

**शोधसारः**

श्रीमद्भट्टोजिदीक्षितविरचितस्य सिद्धान्तकौमुदीग्रन्थस्य मङ्गलश्लोकविषये विचारः पत्रेऽस्मिन् कृतः वर्तते। तत्रादौ मङ्गलाचरणस्य प्रोजनम्, प्रयोजने भाष्यादिवचनप्रमाणम्, अनुबन्धचतुष्टयप्रदर्शनम्, मङ्गलश्लोकः, मङ्गलश्लोकस्य पदच्छेदः, तस्य पदार्थोक्तिः, विग्रहः, द्विविधान्वयः (दण्डान्वयः खण्डान्वश्च), मङ्गश्लोके प्रयुज्यमानपदेषु आक्षेपः समाधानञ्च, मङ्गलश्लोकस्य भावार्थ इत्यादिविषयाः संक्षेपेण पत्रेऽस्मिन् निरूपिताः सन्ति।

**मुख्यशब्दाः**

मङ्गलाचरणम्, अनुबन्धचतुष्टयम्, मुनित्रयम्, इयम्, परिभाव्य, विरच्यते इत्यादयः।

**मङ्गलाचरणस्य प्रयोजनं भाष्यादिवचनप्रमाणञ्च-**

अस्माकं भारतीयपरम्परानुसारं शुभकर्मणः आदौ ग्रन्थादौ च तन्निर्विघ्नतया समाप्तये मङ्गलाचरणं क्रियते। उक्तञ्च- **मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषाणि भवन्त्यायुष्मत्पुरुषाणि च अध्येतारश्च वृद्धियुक्ता यथा स्युः**[1] इति वृद्धिसूत्रस्थभाष्यादिस्मृतिसिद्धकर्त्तव्यताकं ग्रन्थादौ कृतं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नन् प्राचीनग्रन्थैरगतार्थतां विषयप्रयोजनसम्बन्धाधिकारिणश्च सूचयन् चिकीर्षितं प्रतिजानीते। तत्र विषयः वैयाकरणानां सिद्धान्तः। तत्र अनुबन्धो नाम -

[1] महाभाष्ये

प्रवृत्तिप्रयोजकज्ञानविषयत्वम् अनुबन्धत्वम्। प्रयोजनम्- वैयाकरणसिद्धान्तानां ज्ञानम्। अधिकारिणः - वैयाकरणसिद्धान्तानां जिज्ञासवः भवन्ति। सम्बन्धः- प्रतिपाद्य-प्रतिपादकभावसम्बन्धः। इमां परम्परामनुसृत्य भट्टोजिदीक्षितेनापि सिद्धान्तकौमुदी-ग्रन्थस्य प्रारम्भे मङ्गलाचरणं कृतमस्ति तद्यथा-

**मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च।**
**वैयाकरणसिद्धान्तकौमुदीयं विरच्यते।।**

त्रिविधं मङ्गलाचरणं भवति, तद्यथा नमस्कारात्मकम्, आशीर्वादात्मकं तथा च वस्तुनिर्देशात्मकम्। एतेषु उपर्युक्तेषु त्रिविधेषु मङ्गलाचरणेष्विदं मङ्गलाचरणं नमस्कारात्मकं मङ्गलाचरणं भवति। परन्तु तदुक्तीः परिभाव्य, वैयाकरणसिद्धान्त-कौमुदीयं विरच्यते इत्युपादानेन वस्तुनिर्देशः कृतः। अतः वस्तुनिर्देशात्मकं मङ्गलाचरणमपि भवितुमर्हति।

**पदच्छेदः**- मुनित्रयं, नमस्कृत्य, तदुक्तीः, परिभाव्य, च, वैयाकरणसिद्धान्तकौमुदी, इयम्, विरच्यते।

**पदपरिचयः**- मुनित्रयम् इति द्वितीयान्तं पदम्, नमस्कृत्य इति ल्यबन्तम् क्रियापदम्, नमस्कृत्य इत्यस्य कर्म भवति मुनित्रयम्, तदुक्तीः इति द्वितीयाबहुवचनान्तं पदम्, परिभाव्य इत्यपि ल्यबन्तम्। विरच्यते इति कर्मणि लटः प्रथमपुरुषैकवचनान्तं पदम्।

**दण्डान्वयः**- मुनित्रयं नमस्कृत्य, तदुक्तीः परिभाव्य च, इयं वैयाकरणसिद्धान्तकौमुदीयं (मया भट्टोजिदीक्षितेन) विरच्यते।

**खण्डान्वयः**- मया विरच्यते। किं विरच्यते? इयं सिद्धान्तकौमुदी विरच्यते। किं कृत्वा? मुनित्रयं नमस्कृत्य। पुनः किं कृत्वा? तदुक्तीः परिभाव्य च।

**पदार्थोक्तिः-**

**मुनिः**- मन् इत्यस्मात् धातोः इन् प्रत्यये मन् इन इति जाते **हलन्त्यम्**[1] इति सूत्रेण नकारस्य इत्संज्ञायां **तस्य लोपः**[2] इति सूत्रेण तस्य लोपे मन् इ इत्यवस्थायां **मनेरुच्च** इति औणादिकसूत्रेण मकारोत्तरवर्तिनः अकारस्य उकारे मुनि इति जाते स्वादिकार्ये मुनिः इति रूपं भवति। तस्यार्थः भवति मन्तारः वेदशास्त्रार्थतत्त्वावगन्तारः मुनयः नाम मननशीला इति।

**त्रयम्**- त्रयः अवयवाः अस्य समुदायस्य इत्यर्थे त्रि इत्यस्मात् **संख्याया अवयवे तयप्**[3] इत्यनेन तयप् प्रत्यये त्रि तयप् इति जाते **द्वित्रिभ्यां तयस्यायज्वा**[4] इति सूत्रेण तयपः स्थाने अयजादेशे त्रि अयच् इति जाते हलन्त्यम् इति सूत्रेण चकारस्य लोपे, त्रि अय इति जाते, **यस्येति च**[5] इति इकारस्य लोपे, विभक्तिकार्ये च कृते त्रयमिति रूपं सिध्यति। मुनीनां त्रयम् मुनित्रयम् इति षष्ठीतत्पुरुषसमासः। तेन पाणिनि- कात्यायन-पतञ्जल्यभिन्नत्र्यवयवकस्य समुदायस्य ग्रहणं भवति मुनित्रयमिति पदेन।

**नमस्कृत्य**- नमस् इत्युपपदपूर्वकात् कृ धातोः **समानकर्तृकयोः पूर्वकाले**[6] इति सूत्रेण क्त्वा प्रत्यये, **ह्रस्वस्य पिति कृति तुक्**[7] इत्यनेन सूत्रेण तुगागमे, **समासेऽनञ्पूर्वे क्त्वो**

---

[1] पा. अ. 1.3.3 सि. कौ. 1

[2] पा. अ. 1.3.9 सि. कौ. 62

[3] पा. अ. 5.2.42 सि. कौ. 1843

[4] पा. अ. 5.2.43 सि. कौ. 1844

[5] पा. अ. 6.4.148 सि. कौ. 311

[6] पा. अ. 3.4.21 सि. कौ. 3320

[7] पा. अ. 6.1.71 सि. कौ. 2858

**ल्यप्**[1] इति सूत्रेण त्त्वा प्रत्ययस्य ल्यबादेशे नमस्कृत्य इति अव्ययपदस्य सिद्धिर्भवति यस्यार्थः भवति नमस्कारं कृत्वा(प्रणम्य) इत्यर्थः।

**तदुक्तीः**- तच्छब्दो बुद्धिस्थपदार्थं परामृशति। प्रकृते दीक्षितबुद्धिस्थाः प्राचीनाः तत्पदेन परामृश्यन्ते। तेषाम् उक्तयः इति विग्रहे षष्ठीतत्पुरुषसमासे तदुक्तयः इति भवति, तस्यैव द्वितीयाबहुवचनप्रयोगः वर्तते तदुक्तीः इति, अथवा तदुक्तयः नाम पाणिनि-कात्यायन-पतञ्जलीनाम् उक्तयः अर्थात् वचनानि सूत्रवार्तिकभाष्यरूपाणि।

**परिभाव्य**- परि इत्युपसर्गपूर्वकात् भू धातोः स्वार्थिकणिच्-प्रत्यये, भकारोत्तरवर्तिन ऊकारस्य वृद्धौ औकारे भौ इ इति जाते **एचोयवायावः**[2] इति सूत्रेण अवादेशे परिभावि इत्यवस्थायां त्त्वाप्रत्यये, तस्य स्थाने **समासेऽनञ्पूर्वे त्त्वो ल्यप्** इत्यनेन सूत्रेण ल्यबादेशे णिचः इकारलोपे परिभाव्य इति रूपं सिध्यति । एतत्तु ल्यबन्तं पदम्।

परिभाव्य इति पदस्यार्थो भवति तिरस्कृत्य, तथा सति प्राचाम् उक्तीः तिरस्कृत्य **अनादरः परिभवः परिभावस्तिरस्क्रिया** इति कोशवचनानुसारं परि उपसर्गपूर्वकस्य भू धातोः घञ्-प्रत्यये निष्पन्नस्य परिभाव इत्यस्य शब्दस्य तिरस्कारार्थकत्वं प्रतीयते। तिरस्कारः नाम निन्दा इत्यर्थः भवति। एवं सति परिभाव्य इत्यस्यार्थः तिरस्कृत्य इत्येव भवेत्कथं तर्हि प्रकृतौ परिभाव्य इत्यस्य विचार्य इत्यर्थः स्वीक्रियते?

**समाधानम्**- बालमनोरमाकारेण धातूनामनेकार्थत्वम् इति नियमात् परिभाव्य इत्यस्य सम्यक् आलोच्य इत्यर्थः गृहीतः तत्र **परौ भुवोऽवज्ञाने**[3] इति पाणिनेः सूत्रमेव

---

[1] पा. अ. 7.1.37 सि. कौ. 3332

[2] पा. अ. 6.1.78 सि. कौ. 61

[3] पा. अ. 3.3.55 सि. कौ. 3230

प्रमाणम्। प्रकृतसूत्रे परिपूर्वकात् भूधातोः अवज्ञाने नाम निन्दार्थे घञ्-प्रत्यये कृते परिभावः इति रूपं निष्पादितं वर्तते। यदि कोशवचनानुसारं परि- उपसर्गपूर्वकात् भू धातोः निन्दा एव अर्थः भवति तर्हि **परौ भुवेऽवज्ञाने** इत्यस्मिन् सूत्रे अवज्ञाने इति पदं व्यर्थं स्यात्। व्यर्थं सत् ज्ञापयति धातूनाम् अनेकार्थत्वम्, तेन प्रकृते सम्यक् विचार्य इत्यर्थे प्रयोगः कृतः वर्तते। तेन तिरस्कारार्थकत्वेन विवक्षितस्य धातोः विचारार्थकत्वे किमपि बाधकं नास्ति। तथा च परिभाव्यपदमावृत्त्या "तिरस्कृत्य" "विचार्य" इत्यर्थद्वयमङ्गीकृतम्। एवं प्राचाम् उक्तीः तिरस्कृत्य इत्यर्थकरणेन प्राचीनानाम् उक्तिखण्डनद्वारा प्राचीनग्रन्थैः अस्य ग्रन्थस्य अगतार्थता सूचिता।

मुनित्रयस्य उक्तीः विचार्य इत्यर्थकरणेन मुनित्रयोक्तिविचारपूर्वकत्वात् अस्य ग्रन्थस्य प्रामाणिकत्वं प्रतिपादितम्।

**वैयाकरणसिद्धान्तकौमुदी-** व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेन इति व्याकरणम्। व्याकरणम् अधीयते विन्दन्ति वा इति वैयाकरणाः। वैयाकरणानां सिद्धान्तः= वैयाकरणसिद्धान्तः। वादिप्रतिवादिभ्यां निर्णितोऽर्थः सिद्धान्तः इति। सिद्धाः= प्रमाणैः निर्णीताः, ते अन्ताः= अर्थाः सिद्धान्ताः, अर्थात् प्रमाणतो निर्णीतार्थाः।

अथवा सिद्धः= निष्पन्नो अन्तः= निश्चयः येषामर्थानां ते सिद्धान्ताः निश्चितार्थाः। वैयाकरणसिद्धान्तानां कौमुदी वैयाकरणसिद्धान्तकौमुदी। वैयाकरणनां निर्णीतविषयाणां प्रकाशिका इत्यर्थः।

कुं पृथवीं मोदयति हर्षयति इत्यर्थे कुमुदशब्दः निष्पन्नः। अथवा कौ पृथिव्यां मोदन्ते जनाः यस्मादिति कौमुदः। कुमुदस्य वा इयमिति कौमुदी। कौमुदीशब्दस्यार्थो भवति ज्योत्स्ना चन्द्रिका इति।

अत्र कौमुदीपदं स्वसदृशे अर्थे लाक्षणिकम्। अत्र त्रयः सादृश्यप्रयोजकधर्माः

सन्ति तद्यथा- प्रकाशकत्वम्, आह्लादकत्वम्, तापशकत्वञ्चेति।

चन्द्रिका यथा घटपदादीनि वस्तूनि प्रकाशयति। तथा ग्रन्थोऽयं प्रकृतिप्रत्ययादिशब्दस्वरूपाणि तदर्थान् प्रकाशयति। चन्द्रिका यथा रविकिरणतप्तान् जनान् वृक्षादीन् च आह्लादयति, तथैवायं ग्रन्थः भाष्यादिदुरुहग्रन्थरहस्यानवगमने आह्लादयति। चन्द्रिका यथा तापं शमयति, तथैव ग्रन्थोऽयं तापं शमयति। अत एव नागेशेनोक्तं- सिद्धान्तप्रकाशकत्वेनातिदुरुहग्रन्थान्तरेभ्यः सिद्धान्तज्ञाने जायमानस्य क्लेशरूपसन्तापस्य शामकत्वेन च कौमुदीसादृश्यम्।

अर्थात् सिद्धान्तस्य=निर्णीतार्थस्य प्रकाशकत्वेन=बोधकत्वेन अतिदुरुहाणि= दुर्बोधानि यानि ग्रन्थान्तराणि=महाभाष्यादीनि, तेभ्यः निर्णीतार्थबोधे जायमानस्य= अनूभूयमानस्य क्लेशरूपसन्तापस्य=दुःखस्य शामकत्वेन=निवारकत्वेन कौमुद्या= चन्द्रिकया सह सिद्धान्तकौमुद्याः सादृश्यं= साम्यमस्ति।

**इयम्**- इयमिति प्रथमाविभक्तौ एकत्वविवक्षायां वर्तते। इदंशब्दः सन्निकृष्टार्थबोधकः। अर्थात् यद्वस्तु समक्षमुपस्थितं वर्तते, तदभिन्नार्थस्य बोधाय इदंशब्दस्य प्रयोगः न कर्तव्यः। परन्तु मङ्गलाचरणवेलायां कौमुदीग्रन्थस्याभावे कौमुदीयमिति इदंपदेनाभिधानं कथं कृतं दीक्षितेन इति शङ्का भवति।

अस्याः शङ्कायाः समाधानार्थं भाविनोऽपि बुद्ध्या विषयीकरणादियमिति निर्देश इति नागेशेन समाहितम्। अर्थात् भाविनोऽपि सिद्धान्तकौमुदीग्रन्थस्य दीक्षितबुद्धिस्थत्वेन इयमिति निर्देशः युक्तः। सिद्धान्तकौमुद्याः बाह्यसत्ताविरहेऽपि बुद्धिसन्निविष्टायाः तस्याः अन्तः सत्ताम् आश्रित्य इयमिति प्रयोगः विहितः।

**विरच्यते**- विपूर्वकस्य रच्-धातोः चुरादिगणे पठितत्वात् णिच्-प्रत्यये कर्मवाच्ये (कर्मणि वाच्ये) लट्-लकारस्य प्रथमपुरुषस्य एकवचने विरच्यते इति रूपं भवति।

**मङ्गलश्लोकस्यार्थः**- पाणिनि-कात्यायन-पतञ्जलिमुनीनां नमस्कारं कृत्वा तेषाम् उक्तीः परिशील्य वैयाकरणसिद्धान्तकौमुदीनामकग्रन्थः मया विरच्यते इत्यर्थः।

**अत्र संशयः**- कौमुदीयं विरच्यते इति कथं सङ्गच्छते यतोहि ग्रन्थस्यारम्भे मङ्गलाचरणं क्रियते इत एव ग्रन्थारम्भः भविष्यति । कथं तर्हि लट्लकारस्य प्रयोगः कृतः वर्तते।

**समाधानम्**- विरच्यमानग्रन्थः दीक्षितमहोदयस्य बुद्धौ वर्तते यः भविष्ये ग्रन्थत्वेन आगमिष्यति। बुद्धौ उपस्थितत्वात् अस्य वर्तमानकालत्वं सिध्यति। वस्तुतः आसन्नभूतकाले एवम् आसन्नभविष्यत्काले **वर्तमानसामीप्ये वर्तमानाद्वा**[1] इति सूत्रेण लट् लकारस्य विधानं सम्भवत्येव। अतः कौमुदीयं विरच्यते इति प्रयोगः युक्त एव।

**संशयः**- मङ्गलश्लोकस्य प्रथमचरणे मुनित्रयं नमस्कृत्य इति लिखितं वर्तते। अत्र नमः पदार्थेन सह मुनित्रयस्य अन्वयात् **नमःस्वस्तिस्वाहास्वधालंवषट्योगाच्च**[2] इत्यनेन सूत्रेण नमः योगे मुनित्रयशब्दे चतुर्थीविभक्तिः भवितव्या खलु? परं दृश्यते तु द्वितीया तत्कथम्?

**समाधानम्**- वस्तुतस्तु **उपपदविभक्तेः कारकविभक्तिर्बलीयसी**[3] इति परिभाषा ज्ञापयति यत् उपपदविभक्त्यपेक्षया कारकविभक्तिः बलवती भवति। तेन प्रकृते उपपदविभक्तिं प्रबाध्य **कर्तुरीप्सिततमं कर्म**[4] इति सूत्रेण कर्मसंज्ञायां सत्यां कर्मणि द्वितीया इति सूत्रेण कारकद्वितीयाविभक्तिरेव भवति। विभक्तिर्द्विविधा भवति तद्यथा- कारकविभक्तिः उपपदविभक्तिश्च।

---

[1] पा. अ. 3.3.131 सि. कौ. 2789

[2] पा. अ. 2.3.26 सि. कौ. 583

[3] सि. कौ. कारकप्रकरणे

[4] पा. अ. 1.4.49 सि. कौ. 535

कारकविभक्तिर्नाम - क्रियानिष्ठविशेष्यतानिरूपितक्रियाकारकभावसम्बन्धावच्छिन्न-प्रकारताप्रयोजिका विभक्तिः कारकविभक्तिरभिधीयते। अथवा कारकाधिकारे विधीय-माना विभक्तिः कारकविभक्तिः। यथा- देवदत्ताय गां ददाति। उपपदविभक्तिर्नाम - समीपस्थपदनिमित्तिका विभक्तिः उपपदविभक्तिः। यथा- हरये नमः।

**उपसंहारः** – आस्तिकसम्प्रदायानुसारं ग्रन्थकारेण नमस्काररूपं मङ्गलं विधाय अनुबन्धचतुष्टयमुक्तम् । येन ग्रन्थस्य प्रतिपाद्यविषयाः उद्देश्यं च स्पष्टम् ।

**सन्दर्भग्रन्थसूची -**

1. वैयाकरणसिद्धान्तकौमुदी अर्थप्रकाशिकाव्याख्यया सहिता - सम्पादकः अर्कनाथचौधरी, जगदीश संस्कृत पुस्तकालय, जयपुर, राजस्थान।
2. लघुशब्देन्दुशेखरः श्रीभैरवमिश्रविरचितचन्दकलाटीकासमेतः, चौखम्भा संस्कृत संस्थान, वाराणसी।
3. प्रौढमनोरमा शब्दरत्नव्याख्यासहिता (इन्दुकलाहिन्दीव्याख्याविभूषिता) - संपादकः डॉ.वैद्यनाथ झा, रचना प्रकाशन, जयपुर ।
4. पाणिनीयाष्टाध्यायी - चौखम्बा प्रकाशन, वाराणसी।
5. लघुसिद्धान्तकौमुदी-शिवाख्यसंस्कृतहिन्दीव्याख्याद्वयोपेता - व्याख्याकारः गोमती-प्रसादशास्त्रीमिश्रः।
6. व्याकरणमहाभाष्यम्–संपादकः चारुदेव शास्त्री, मोतीलाल बनारसीदास वाराणसी।

Asst. Professor, Dept. of Sanskrit & Indian Culture
Sri Chandrasekharendra Saraswathi Viswa Maha Vidyalaya
Kanchipuram, Tamilnadu- 631561
shubhchandrajha52@gmail.com, Mo- 9087599862

❑❑❑

# संस्कृतव्याकरणस्य प्रयोजनानि

**डा. हेच्.रविचन्द्रः**

भाषाक्षेत्रे व्याकरणस्य अनुपमं स्थानं विद्यते। व्याकरणं विना भाषा अपूर्णा एव भवति। अतः व्याकरणं महत् प्रयोजनवत् इत्यत्र नास्ति कस्यापि वैमत्यम्। परं व्याकरणस्य प्रयोजनानि तत्तद्भाषानुरोधेन भिद्यन्ते। अतः व्याकरणस्य प्रयोजनानि सूक्ष्मतया अवलोकनीयानि। विशेषेण संस्कृते। यतः इयं पुरातनभाषा नैकविधसाहित्यरत्नैः विभूषिता च। किञ्च इयम् अधुना व्यवहारपथे नास्ति। अतः संस्कृतज्ञानाय व्याकरणं शरणीकरणीयमेव।

व्याकरणाध्ययनात् प्राक् तदीयप्रयोजनविषये अक्षि अस्माभिः प्रसारणीयमेव। अतः अत्र विशदतया व्याकरणप्रयोजनविचारः चर्चितः। व्याकरणविषये महाभाष्यमेव महान् आकरग्रन्थः। भाष्यप्रमाणमेव शास्त्रविद्भिः सर्वत्र उररीक्रियते। प्रयोजनपरामर्शावसरे अपि आदौ गणनीयमेव भाष्यम्। भाष्ये तावत् एवं रीत्या व्याकरणप्रयोजनजिज्ञासा कृता वर्तते।

**शब्दानुशासनम् -**

महाभाष्ये पतञ्जलिना आदौ प्रोक्तम् **अथ शब्दानुशासनम्** इति। अत एव बहवः व्याकरणस्य शब्दानुशासनमिति नामान्तरम् अङ्गीकुर्वन्ति। तथैव भाष्यव्याख्यातारः शब्दानुशासनम् इति ब्रुवता पतञ्जलिना व्याकरणस्य मुख्यप्रयोजनम् अभ्यधायि इति अभिप्रयन्ति। तत्र हि –

**अथ शब्दानुशासनम्। अथेत्ययं शब्दः अधिकारार्थः प्रयुज्यते। शब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यम्।** (पातञ्जलिमहाभाष्यम् १-१)

शब्दानुशासनमेव मुख्यं प्रयोजनमत्र भाष्यकारैः कथितमिति अभिप्रायं प्रकटयता व्याख्याकृता कैयटेन प्रोक्तम्-

**भाष्यकारो विवरणकारत्वात् व्याकरणस्य साक्षात्प्रयोजनमाह शब्दानुशासनमिति।** (कैय्यटः – भाष्यप्रदीपः)

शब्दानुशासनमित्यस्य शब्दानाम् अनुशासनमिति सामान्यः अर्थः। अत्र अनुशासनं नाम असाधुशब्देभ्यः साधुशब्दानां विविच्य बोधनम्। उक्तं च – **अनुशिष्यन्ते असाधुशब्देभ्यो विविच्य ज्ञाप्यन्ते अनेन इति अनुशासनम्।** (नागेशभट्टः प्रदीपोद्योते)

लोके यथा साधुशब्दाः बहवः सन्ति तथैव व्यवहारे असाधुशब्दाः अपि भूयांसः सन्ति। अतः कश्चित् भाषाप्रयोगकर्ता शब्दापशब्दयोर्मध्ये विवेचयितुं न पारयति। अतः तद्विवेचनाय किञ्चित् शास्त्रमपेक्षितमिति धिया व्याकरणं मुनिभिः प्रणीतम्। अतः व्याकरणस्य अत्यन्तं प्रधानं प्रयोजनं तु शब्दानुशासनमेव। व्याकरणे सति लघुना उपायेन शब्दापशब्दविवेकः साध्यः। यद्यपि भाष्यकारेण साक्षात् कण्ठरवेण शब्दानुशासनं प्रयोजनमिति न प्रोक्तम्। तथापि तस्मिन् वाक्ये मुख्यप्रयोजनमेव सूचितमिति व्याख्यातारः विद्वांसश्च अभिप्रयन्ति।

**प्रयोजनप्रयोजनानि –**

पूर्वोक्तरीत्या व्याकरणस्य साक्षात् प्रयोजनं तु शब्दानुशासनमेव। परं तत्र भगवता भाष्यकारेण प्रयोजनप्रयोजनानि अपि कथितानि। **कानि पुनः शब्दानुशासनस्य**

**प्रयोजनानि। रक्षोहागमलघ्वसन्देहाः प्रयोजनम्।** अत्र व्याकरणस्य प्रयोजनरूपेण पञ्च प्रयोजनानि कथितानि महिर्षिणा। तानि च –

**रक्षा – रक्षार्थं वेदानाम् अध्येयं व्याकरणम्। लोपागमवर्णविकारज्ञो हि सम्यक् वेदान् परिपालयिष्यतीति।** (पातञ्जलमहाभाष्यम् - पष्पशाह्निकम् - रक्षा)

भारतीयसाहित्ये अत्यन्तपवित्रतमानां श्रेष्ठानां चतुर्णां वेदानां रक्षा समेषां भारतीयानाम् आद्यं कर्तव्यं भवति। परं व्याकरणाध्ययनं विना वेदरक्षणं दुष्करं भवति। यतः वेदसंस्कृतं लौकिकसंस्कृतात् भिद्यते। वैदिकशब्दनिष्पादनाय सूत्राणि अपि भिन्नानि सन्ति। तेषां ज्ञानं तु व्याकरणाध्ययनेनैव सम्पद्यते।

अतः व्याकरणम् अपेक्षितम्। यः व्याकरणमधीत्य लोपागमवर्णविकारान् सम्यक् अभिजानाति स एव वेदान् परिपालयितुम् अर्हति। यथा – लौकिकसंस्कृते देवाः ब्राह्मणाः अदुहन् उद्ग्राहम् चेत्यादीनां क्रमशः देवासः ब्राह्मणासः अदुह्र उद्गाभम् चेत्यादयः वर्णगमलोपविकाराश्च सम्भवन्ति। वैयाकरणस्तु एतान् ससूत्रम् अभिज्ञाय वेदान् रक्षति। परम् अवैयाकरणः वेदान् दुष्टान् मत्वा नाशयति। अतः वेदसंरक्षणाय व्याकरणाध्ययनं करणीयमेव।

**ऊहः – ऊहः खल्वपि। न सर्वैः लिङ्गैः न च सर्वाभिः विभक्तिभिः वेदे मन्त्रा निगदिताः। ते चावश्यं यज्ञगतेन पुरुषेण यथायथं विपरिणमयितव्याः। तान् न अवैयाकरणः शक्नोति यथायथं विपरिणमयितुम्। तस्मादध्येयं व्याकरणम्।** (पा.महाभाष्यम् पष्पशाह्निकम् - ऊहा)

वेदमन्त्रेषु याज्ञिकप्रयोगानुकूलाः मन्त्राः बहवः निगदिताः। परं ते सर्वासु विभक्तिषु सर्वैः लिङ्गैः न प्रोक्ताः। अतः यः पुरुषः यज्ञं निर्वहति सः

क्रियमाणयागानुसारेण मन्त्राणां लिङ्गविभक्तिविपरिणामं कृत्वा वदेत्।

यः व्याकरणं न जानाति सः एवं कर्तुं न शक्नोति। यथा – अग्नये त्वा जुष्टं निर्वपामि इति एकः याज्ञिकमन्त्रः वेदे प्रोक्तः। परम् अयं मन्त्रः अग्निविषये एव। यदा सूर्यविषये हविः समर्प्यते तदा सूर्याय त्वा जुष्टं निर्वपामि इति विभक्तिविपरिणामः कार्यः भवति। एवं केवलं वैयाकरणः एव कर्तुं पारयति।

**आगमः – आगमः खल्वपि। ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञयेश्च इति। प्रधानं च षट्स्वङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान् भवति।** (महाभाष्यम्-पष्पशाह्निकम् - आगमः)

यथा नित्यकर्माणि प्रत्यहम् अनुष्ठीयन्ते तथैव वेदावेदाङ्गानि अपि प्रत्यहम् अध्येयानि। भाष्यकारः अत्र व्याकरणस्य नित्यकर्मत्वं प्रदर्शितवान्। वेदाङ्गेषु प्रधानं तु व्याकरणमेव। उक्तं च 'मुखं व्याकरणं स्मृतम्' इति। अतः प्रधाने कृतः यत्नः सर्वदा फलवान् भवति। अतः नित्यकर्मरूपेण व्याकरणाध्ययनं भवेत्।

**लघुत्वम् - लघ्वर्थं चाध्येयं व्याकरणम्। ब्राह्मणेन अवश्यं शब्दाः ज्ञेयाः इति। न च अन्तरेण व्याकरणं लघुनोपायेन शब्दाः शक्याः ज्ञातुम्।** (महाभाष्यम् -पष्पशाह्निकम् - लघुः)

भाषाज्ञानाय तद्घटकभूताः शब्दाः ज्ञेयाः। परं लोके बहवः शब्दाः प्रयोगे सन्ति खलु। अतः सर्वान् अपि शब्दान् पार्थक्येन ज्ञातुं येन केनापि एकस्मिन् जन्मनि न शक्यते। अतः कश्चन लघुः उपायः भवेत्। व्याकरणमेव लघुना उपायेन शब्दान् बोधयति। सामान्यविशेषवत् लक्षणं व्याकरणेन प्रवर्त्यते। तेन अल्पेन यत्नेन महतः शब्दौघान् प्रतिपादियितुं शक्नुवन्ति। व्याकरणे सूत्रद्वारा प्रक्रिया उच्यते। एकस्य सूत्रस्य

ज्ञानेन बहूनां शब्दानां निर्वचनं ज्ञायते। अतः लघुना शब्दज्ञानाय व्याकरणं नूनम् अध्येतव्यम्।

**असन्देहार्थम् - असन्देहार्थम् चाध्येयं व्याकरणम्। याज्ञिकाः पठन्तिः – स्थूलपृषतीम् आग्नीवारुणीम् अनड्वाहीम् आलभेत इति। तस्यां सन्देहः – स्थूला च असौ पृषती च स्थूलपृषती, स्थूलानि पृषन्ति यस्याः सेयं स्थूलपृषती। तां नावैयाकरणः स्वरतोऽध्यवस्यति। यदि पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिः, अथ समासान्तोदात्तत्वं ततस्तत्पुरुषः इति।** (महाभाष्यम् - पष्पशाह्निकम् - असन्देहः)।

वेदमन्त्रेषु स्वराः भवन्ति। ते सम्यक् वेदपाठकेन उच्चारणीयाः। स्वरतः भेदे अर्थतः अपि भेदः भवति। अत्र भाष्यकारेण दत्ते उदाहरणे अपि स्थूलपृषती इति एकमेव पदम्। परं समासस्तु द्विधा कर्तुं शक्यः। समासानुरोधेन स्वरव्यवस्था अत्र। यदि स्थूला च असौ पृषती च स्थूलपृषती इति तत्पुरुषसमासः तदा समासान्तोदात्तस्वरः उच्चारणीयः।

एवमेव स्थूलानि पृषन्ति यस्याः सेयं स्थूलपृषती इति यदा बहुव्रीहिसमासः क्रियते तदा पूर्वपदस्य प्रकृतिस्वरत्वं भवति। एवं महान् स्वरव्यत्यासः दृश्यते। परं एतान् विचारान् यः व्याकरणम् अधीतवान् स एव ज्ञातुं पारयति। अतः याज्ञिकक्रियासु स्वरज्ञानाय सन्देहे सति तन्निवारणाय व्याकरणं नूनम् अधिगन्तव्यम्।

एवं विरुद्धार्थवारणाय शब्दाप्रयोगज्ञानाय व्याकरणं पठनीयमेव। व्याकरणस्य प्रयोजनकथनावसरे काचित् चाटूक्तिः वर्तते। सा व्याकरणस्य सूक्ष्मत्वं प्रतिपादयति। सा च –

**यस्य षष्ठी चतुर्थी च विहस्य च विहाय च।**
**यस्याहं द्वितीया स्यात् द्वितीया स्यामहं कथम्।।**

**उपसंहारः -** एवं प्रकारेण भाष्योक्तदिशा व्याकरणस्य प्रयोजनानि आधुनिकपरिप्रेक्ष्यं मनसि निधाय इह समासेन परामृष्टानि।

सहायकप्राध्यापकाः
श्री कालभैरवेश्वरसंस्कृतवेदागममहाविद्यालयः
श्री आदिचुञ्चनगिरिक्षेत्रम्
नागमङ्गलम् उपमण्डलम्, मण्ड्या मण्डलम्
कर्नाटकराज्यम्
Emial Id: ravichandrah73@gmail.com
Mob-9611248022

❑ ❑ ❑

# फलितज्यौतिषे मान्देः स्थानम्

**अनिलकुमारदेसायिः**

**सारांशः –** मान्दिः शनेः उपग्रहः इति फलितज्यौतिषशास्त्रे प्रसिद्धः। मन्दस्य अपत्यं पुमान् मान्दिरिति व्युत्पत्या मान्दिः शनेः पुत्रः इत्यपि अभिप्रायः भवति। किमपि वा भवतु, मान्दिः शनिसम्बद्धः अस्ति इत्यत्र नास्ति सन्देहलेशः। अशुभग्रहेषु मान्दिः परिगणितः अस्ति। नवग्रहेषु क्षीणचन्द्रः, पापयुक्तबुधः, सूर्यः, शनिः, राहुः केतुः – एते ग्रहाः पापसूचकाः भवन्ति। एतेषां पापग्रहाणामपेक्षया अयं मान्दिः अत्यन्तं पापग्रहः इति फलितज्यौतिषशास्त्रे उल्लेखः अस्ति। विशेषतः प्रश्नशास्त्रे मान्देः उपयोगः तत्र तत्र दृश्यते। जातकशास्त्रेऽपि मान्देः आधारेण फलकथनं भवति। विशेषतः केरलीयज्यौतिषग्रन्थेषु मान्देः प्रयोगः आधिक्येन दृश्यते। अस्मिन् शोधपत्रे फलितज्यौतिषशास्त्रे मान्देः स्थानं किमस्तीति मया स्थूलतया उपपाद्यते।

**मान्द्युदयः –**

ग्रहकुण्डल्यां जातके प्रश्ने वा रव्यादिकेतुपर्यन्तैः नवग्रहैः सह मान्दिः इत्येकः अंशः आधिक्येन दृश्यते। नवग्रहान् अतिरिच्य अधिकतया उल्लिख्यमानः एषः दशमः अंशः मान्दिः नाम कः ? फलचिन्तने अस्य मान्देः आवश्यकता का ? उत्तरभारते जातकग्रहस्थितिषु मान्देः नाम न दृश्यते किल ? एतं मान्दिं स्वीकृत्य अथवा परित्यज्य फलचिन्तने कोऽपि व्यत्यासः जायते वा ? एषः मान्दिः केरलीयज्योतिर्विदां सृष्टिर्वा? इत्यादीनां प्रश्नानां माला एव अस्माकं पुरतः आविर्भवति। अस्य शास्त्रीयसमाधानम् इत्थं भवति –

प्रतिदिनं सूर्योदयात् सूर्यास्तपर्यन्तं विद्यमानं दिवाप्रमाणम् अष्टधा विभज्य दिवसे

अष्टांशाः कल्प्यन्ते। एतस्मिन् अष्टांशसमये तत्तद्दिवसीयवाराधिपः एव प्रथमम् उदयं याति। अनन्तरं क्रमेण तदग्रिमाग्रिमाः सप्तवाराधिपग्रहाः उदयमेष्यन्ति। तत्तद्दिवसीयवाराधिपः एव पुनः अष्टमे अर्थात् अन्तिमे अष्टांशसमये उदयमेष्यति। रात्रिमानमपि एवमेव अष्टधा विभज्य अष्टांशाः कल्पिताः। रात्रौ तत्तद्दिवसीयवाराधिपात् पञ्चमवाराधिपः प्रथमे अष्टांशे उदेति। अनन्तरं क्रमेण इतरग्रहाः उदयमेष्यन्ति। अत्राऽपि प्रथमाष्टांशाधिपः एव अन्तिमाष्टांशाधिपोऽपि भवति। प्रतिदिनं दिवायाम् अष्टांशोदयप्रमाणानि अधोनिर्दिष्टे श्लोके कथितानि –

**ग्रहा वारनाथादयो वासरस्य प्रमाणाष्टभागाधिनाथाः क्रमेण।**
**तथा यामवत्याश्च तत्पञ्चमाद्याः य आद्यंशनाथः स एवाष्टमस्य ॥**[1]इति।

श्लोकस्यास्याभिप्रायः अधोनिर्दिष्टे कोष्ठके व्यक्तीकृतः –

| दिवामानम् 30 घटिकामितं भवति चेत् | रवि वासरः | सोम वासरः | कुज वासरः | बुध वासरः | गुरु वासरः | शुक्र वासरः | शनि वासरः |
|---|---|---|---|---|---|---|---|
| 0 तः 3:45 | रविः | चन्द्रः | कुजः | बुधः | गुरुः | शुक्रः | शनिः |
| 3:45 तः 7:30 | चन्द्रः | कुजः | बुधः | गुरुः | शुक्रः | शनिः | रविः |
| 7:30 तः 11:15 | कुजः | बुधः | गुरुः | शुक्रः | शनिः | रविः | चन्द्रः |
| 11:15 तः 15:00 | बुधः | गुरुः | शुक्रः | शनिः | रविः | चन्द्रः | कुजः |

[1] श्लोकोऽयं 'चिन्तनधारा' इति कन्नडपुस्तकादुद्धृतः।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| 15:00तः 18:45 | गुरुः | शुक्रः | शनिः | रविः | चन्द्रः | कुजः | बुधः |
| 18:45तः 22:30 | शुक्रः | शनिः | रविः | चन्द्रः | कुजः | बुधः | गुरुः |
| 22:30तः 26:15 | शनिः | रविः | चन्द्रः | कुजः | बुधः | गुरुः | शुक्रः |
| 26:15तः 30:00 | रविः | चन्द्रः | कुजः | बुधः | गुरुः | शुक्रः | शनिः |

कोष्ठकः – १ अष्टांशोदयविचारः

एतदेव केरळीयपद्धत्यां रविवासरे सूर्योदयात् 26 घटिकासमये मान्द्युदयः इत्युक्त्वा आगामिनि सोमादिवासरेषु 4-4 घटिकाः न्यूनीकृत्य मान्द्युदयघटिकाः कथिताः। यथा – रविवासरे 26 उदयादितो घटिकानन्तरं मान्द्युदयः। सोमवासरे 22 घटिकानन्तरं, मङ्गलवासरे 18 घटिकानन्तरं, बुधवासरे 14 घटिकानन्तरं, गुरुवासरे 10 घटिकानन्तरं, शुक्रवासरे 6 घटिकानन्तरं, शनिवासरे च 2 घटिकानन्तरं मान्द्युदयो भवति। दिवामानं 30 घटिकाः चेदेव एवंरीत्या मान्द्युदयकालाः ज्ञेयाः। दिवामानं त्रिंशद्-घटिकाभ्यो न्यूनम् अधिकं वा भवति चेत् तत्तद्दिवसीयदिवामानात् अनुपातेन मन्द्युदयकालाः साध्याः। यस्मात् वारात् पञ्चमवारे याः मान्द्युदयघटिकाः कथिताः ता एव तद्दिने रात्रौ मान्द्युदयघटिकाः भवन्ति।

**मान्देः द्वादशभावफलानि –**

प्रश्नमार्गग्रन्थे अधोनिर्दिष्टश्लोकेषु मान्देः द्वादशभावफलानि कथितानि –

**रोगी क्षताङ्गो गुलिके तनुस्थे निन्द्याभिभाषी धनगे विवेषः।**
**सोत्थं द्विषद्भ्रातृगते सशौर्यः सुखादिहीनः सुखगेऽरिभीतः ॥**

**गुर्वादिनिन्दाकृदनात्मजः स्याच्छूली सुतस्थे रिपुगे निजद्विट्।**
**विषेक्षणो वंशविदूषणश्च कलत्रहन्ता मदगेऽतिकामः ॥ ६९ ॥**
**धीमान् बहुव्याधिरनायतायुः विषाग्निशस्त्रैर्मृतिरष्टमस्थे।**
**धर्मस्थिते धर्मतपोमनूनः खस्थे सुकीर्तिः परकायसक्तः ॥ ७० ॥**
**कुर्याच्च पौरुषयुतो धनवाहनार्थान्यैश्वर्यवान् भवगते बहुभृत्ययुक्तः।**
**दुःस्वप्नवांश्च कुनखी विकलो व्ययस्थे लग्नादिभावगतमान्दिफलं प्रदिष्टम् ॥**[1]

अर्थात्, मान्दिः तनुस्थे सति रोगी, क्षताङ्गश्च स्यात्। मान्दिः द्वितीयस्थे सति निन्द्याभिभाषी, विवेषश्च स्यात्। मान्दिः तृतीये सति सोत्थं भ्रातृद्विषत्, सशौर्यश्च स्यात्। मान्दौ चतुर्थे सति सुखादिहीनः, अरिभीतश्च स्यात्। मान्दौ पञ्चमे सति गुर्वादिनिन्दाकृत्, अनात्मजः, शूली च स्यात्। मान्दौ रिपुगे सति निजद्विट् स्यात्। मान्दौ सप्तमे सति विषेक्षणः, वंशविदूषणः, कलत्रहन्ता, अतिकामी च स्यात्। मान्दौ अष्टमे सति धीमान्, बहुव्याधियुक्तः, अल्पायुः, विषाग्निशस्त्रैः मृतिश्च स्यात्। मान्दौ धर्मस्थिते सति धर्महीनः, तपोहीनः, अनुष्ठानहीनः, सुकीर्तिश्च स्यात्। मान्दौ खस्थे सति परकायसक्तः स्यात्। मान्दौ भवगते सति पौरुषयुतः, धन-वाहन-अर्थ-ऐश्वर्यवान्, बहुभृत्ययुक्तश्च स्यात्। मान्दौ व्ययस्थे सति दुःस्वप्नवान्, कुनखी, विकलश्च स्यात्।

**अष्टमङ्गलप्रश्ने मान्देः प्रयोजनम् –**

अष्टमङ्गलप्रश्ने फलादेशार्थं त्रिस्फुट-चतुःस्फुटादीनां साधनं करणीयं भवति। मान्दिसाधनं विना तेषां साधनं कर्तुं न शक्यते। यथा –

लग्नस्फुटः + चन्द्रस्फुटः + मान्दिस्फुटः = त्रिस्फुटः।

[1] प्रश्नमार्गः – चतुर्दशोऽध्यायः – ६७ तः ७० श्लोकाः

लग्नस्फुटः + चन्द्रस्फुटः + मान्दिस्फुटः + रविस्फुटः = चतुःस्फुटः।

लग्नस्फुटः + चन्द्रस्फुटः + मान्दिस्फुटः + रविस्फुटः + राहुस्फुटः = पञ्चस्फुटः।

(५ × लग्नस्फुटः) + गुलिकस्फुटः = प्राणस्फुटः।

(८ × चन्द्रस्फुटः) + गुलिकस्फुटः = देहस्फुटः।

(७ × गुलिकस्फुटः) + सूर्यस्फुटः = मृत्युस्फुटः।

मान्दिस्फुटः - (रविस्फुटः +चन्द्रस्फुटः + राश्यादिफलम्) = मृत्युचक्रस्फुटः।

एवम् अष्टमङ्गलप्रश्ने फलादेशोपयुक्तानां विशेषस्फुटानाम् आनयनार्थं मान्दिसाधनम् अनिवार्यमस्ति।

इत्थं फलितज्यौतिषे जातके प्रश्ने च उभयत्रापि मान्देः प्राधान्यमस्तीति वयं ज्ञातुं शक्नुमः।

**निष्कर्षः –** फलितज्यौतिषशास्त्रे मान्देः उपयोगः बहुत्र कृतः। मान्दिः यस्मिन् भावे भवति तद्भावस्य हानिं करोति। उदाहरणार्थं मान्दिः लग्ने भवति चेत् आरोग्यनाशः भवति, द्वितीयभावे भवति चेत् विद्यानाशः भवति। अष्टमभावे भवति चेत् शीघ्रं मरणं भवति। एवं फलचिन्तने मान्देः प्राधान्यमस्ति। विशेषतः केरळेषु मान्देः कृते प्राधान्यं दत्तमस्ति फलितज्यौतिषशास्त्रे। उत्तरभारतीयफलितज्यौतिषग्रन्थेषु मान्देः प्रयोजनं तथा न दृश्यते। किमपि वा भवतु, फलचिन्तने मान्देः प्राधान्यमस्तीत्यत्र नास्ति सन्देहलेशः।

**सन्दर्भग्रन्थसूची**

1. इटक्काट् नम्पूतिरिः, प्रश्नमार्गः – प्रथमद्वितीयभागौ, व्याख्या सुरकान्तझा, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी

2. वराहमिहिरः, (२०१३), बृहज्जातकम्, व्याख्या – केदारदत्तजोशी, मोतीलाल बनारसीदास – वाराणसी
3. वराहमिहिरः, (२०१४), बृहत्संहिता – प्रथमो भागः, व्याख्या – अच्युतानन्दझा, चौखम्बा विद्याभवनम् – वाराणसी
4. वराहमिहिरः, (२०१४), बृहत्संहिता – द्वितीयो भागः, व्याख्या – अच्युतानन्दझा, चौखम्बा विद्याभवनम् – वाराणसी
5. मन्त्रेश्वरः, (२०१५), फलदीपिका, व्याख्या – हरिशङ्करपाठकः, चौखम्बा सुरभारती प्रकाशनम् – वाराणसी
6. नारायणभट्टः, (२००७), चमत्कारचिन्तामणिः, व्याख्या – रमाशङ्करत्रिपाठी, चौखम्भा ओरियन्टालिया – दिल्ली
7. लोकमणिदाहालः, भारतीयज्योतिषशास्त्रस्येतिहासः (A History of Indian Astrology), चौखम्बा सुरभारती प्रकाशनम् – वाराणसी

शोधच्छात्रः, ज्यौतिष-वास्तुविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

❏ ❏ ❏

महस्विनी – विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452)
कुसुमम् : जनवरी - जुलै २०२२ सम्पुटम् : प्रथमम्

# कारकविभक्त्यर्थविचारः

**स्वाती ईश्वर लोडे**

**निबन्धसारः**

अस्मिन् जगति जीवाः सर्वदैव क्रियारताः भवन्ति। क्रिया च कारकाधीना वर्तते। संस्कृतवाङ्मये कारकाणां यावत्प्राधान्यं वर्तते न तथा अन्येषाम्। पाणिनीयव्याकरणे पारिभाषिकशब्देषु "कारकम्" अन्यतमम्। डुकृञ् करणे[1] इति धातोः "ण्वुल्तृचौ"[2] इति सूत्रेण कर्त्तरि ण्वुल् प्रत्यये अनुबन्धलोपे कृ+वु इति जाते "युवोरनाकौ"[3] इत्यनेन सूत्रेण वु स्थाने अकादेशे "अचो ञ्णिति" ७.२.११५ इति सूत्रेण ऋकारस्य वृद्धौ रपरत्वे आर् इति जाते स्वादिकार्ये कारक इति शब्दः निष्पन्नः। करोतीति कारकमिति व्युत्पत्या कारकशब्दः क्रियापरः। एवञ्च क्रियाजनकत्वं कारकत्वमिति महाभाष्यकारेण भगवता पतञ्जलिना स्वीकृतम्। करोति क्रियां निर्वर्त्तयति, करोति कर्त्तृकर्मादिव्यपदेशानिति व्युत्पत्या एतादृशोऽर्थः निष्पद्यते।

**कारकस्य लक्षणम्-**

अस्य कारकशब्दस्य लक्षणानि शास्त्रकारैरित्थम् उपन्यस्तानि –

- करोति कर्त्तृकर्मादिव्यपदेशानिति कारकमिति **भगवान् पतञ्जलिः**।
- क्रियाप्रवर्त्तकं कारकमित्यपि **भगवान् पतञ्जलिः**।
- साधनं कारकमिति **भर्त्तृहरिः**।

---

[1] कौमुदीयधातुः - १४७२

[2] अष्टाध्यायी सूत्रम् - ३.१.१३३

[3] अष्टाध्यायी सूत्रम् - ७.१.१

- शक्तिः कारकमिति **प्रदीपः**।
- क्रियाजनकत्वं कारकत्वमिति **नागेशः, हरिदीक्षितः**।
- क्रियान्वयित्वं कारकत्वमिति **भट्टोजिदीक्षितः**।
- क्रियाहेतुः कारकमिति **काशिकारः**।
- विभक्त्यर्थद्वारा क्रियान्वयि सन् क्रियानिमित्तं कारकमिति **नैयायिकाः**।
- **न्यायसिद्धान्तरीत्या कारकलक्षणम् –**

*कारकातरार्था च सुप् द्विधाऽत्र विभज्यते।*
*कर्तृकर्मादि भेदेन शेषः सम्बन्ध इष्यते।।*

**कारकस्य भेदः –**

कारकं षड्विधम्। तद्यथा –

कर्ता कर्म च करणं सम्प्रदानं तथैव च।
अपादनाधिकरणमित्याहुः कराकाणि षट्। इति।

**विभक्तिः -**

कारकस्य प्रयोगः विभक्त्यर्थरूपेण भवति। यतो हि संख्याकर्मादयश्च विभक्त्यर्थाः। विभज्यतेऽनया प्रातिपदिकार्थ इति विभक्तिः। विभक्तिर्नाम कारकमिति शब्दकौस्तुभे उल्लिखितम्। संख्याकारकबोधयित्री विभक्तिरित्युज्यते। येन संङ्केतेन कारकस्य परिचयो भवति सा विभक्तिरित्युच्यते। विभक्तिसंज्ञाविधायकं “विभक्तिश्च” इति सूत्रं भगवता पाणिनिना प्रणीतम्। अस्य सूत्रस्यार्थो भवति सुप् तिङ् च विभक्तिसंज्ञौ भवतः इति। तथा हि – सुपां तिङां च विभक्तिसंज्ञा अस्तीति लभ्यते। तत्र सुप् इत्यनेन स्वाद्येकविंशतेः ग्रहणं भवति। तिङ् इत्यनेन च तिबादीनाम् अष्टादशप्रत्ययानां च ग्रहणं भवति। तथा च एकविंशतिः सुप्प्रत्ययास्तथा अष्टादश

तिङ्प्रत्ययाश्च विभक्तिसंज्ञकाः सन्तीति। लोके सुप् प्रत्ययाः एव विभक्तिप्रत्ययाः इति प्रसिद्धिः। तत्र सुप्प्रत्ययानां पुनः सप्तसु विभक्तिषु विभागः अस्ति। तत्र सु औ जस् इति प्रथमाविभक्तिः। अम् औट् शस् इति द्वितीयाविभक्तिः। टा भ्याम् भिस् इति तृतीयाविभक्तिः। ङे भ्याम् भ्यस् इति चतुर्थीविभक्तिः। ङसि भ्याम् भ्यस् इति पञ्चमीविभक्तिः। ङस् ओस् आम् इति षष्ठीविभक्तिः। ङि ओस् सुप् इति सप्तमीविभक्तिः।

**विभक्तिभेदः –**

उपर्युक्ताः सप्तापि सुब्विभक्तयः कारकोपपदभेदेन द्विविधाः भवन्ति। तद्यथा– कारकप्रथमाविभक्तिः, उपपदप्रथमाविभक्तिः। कारकद्वितीयाविभक्तिः, उपपदद्वितीयाविभक्तिः। कारकतृतीयाविभक्तिः, उपपदतृतीयाविभक्तिः। कारकचतुर्थीविभक्तिः, उपपदचतुर्थीविभक्तिः। कारकपञ्चमीविभक्तिः, उपपदपञ्चमीविभक्तिः। कारकषष्ठीविभक्तिः, उपपदषष्ठीविभक्तिः। कारकसप्तमीविभक्तिः, उपपदसप्तमीविभक्तिः।

कारकसञ्ज्ञां पुरस्कृत्य या विभक्तिः प्रवर्तते, सा कारकविभक्तिः इत्युच्यते। यथा – छात्रः विद्यालयं गच्छति। अत्र द्वितीयाविभक्तिः कर्मसञ्ज्ञां पुरस्कृत्य प्रवृत्ता। अतः इयं कारकविभक्तिः। यत्र तु कारकत्वस्य प्रसक्तिः न भवति, तत्र परिगणितानां केषाञ्चन पदानामर्थेन योगः अपि विभक्तेः प्रवृत्तौ निमित्तं भवति, तस्याः तावदुपपदविभक्तिः इति व्यवहारः। यथा – हरिं विना न सुखम्। अत्र विना इत्यस्य अर्थेन योगादेव हरिशब्दात् द्वितीयाविभक्तिः[1] विहिता।

---

[1] अष्टाध्यायी सूत्रम् २\३\२

**प्रथमाविभक्तिविचारः –**

कारकप्रकरणे प्रथमाविभक्तिविधायकं सूत्रद्वयं दृश्यते। अद्यम् – “प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा” इति। तत्र प्रातिपदिकार्थश्च लिङ्गञ्च परिमाणश्च वचनञ्च प्रातिपदिकार्थलिङ्गपरिमाणवचनानि, तान्येव प्रातिपदिकार्थलिङ्ग-परिमाणवचनमात्रम्। द्वन्द्वान्ते श्रूयमाणस्य मात्रशब्दस्य प्रत्येकमन्वयः। तथा च प्रातिपदिकार्थमात्रे, लिङ्गमात्राद्याधिक्ये च प्रथमास्यादिति सूत्रार्थः।

द्वितीयम् - “सम्बोधने च” इति। “प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा” इति सूत्रेण प्रातिपदिकार्थमात्र, लिङ्गमात्राद्याधिक्ये च प्रथमा विभक्तिः विहिता। तत्र सम्बोधनार्थे तु अनेन सूत्रेण प्रथमाविभक्तिः नोक्ता। अतः तत्रापि प्रथमाविभक्तिसिद्ध्यर्थं भगवता पाणिनिना “सम्बोधने च” इति सूत्रमारब्धम्। अस्मिन् सूत्रे अभिमुखीभवनानुकूलो व्यापारः सम्बोधनपदार्थः। सम्बोधन-विभक्त्यन्तपदस्य फलं प्रवृत्तिर्वा निवृत्तिर्वा।

यथा – देवदत्त ! गामानय !

**प्रथमायाः कारकविभक्तित्वम् –**

कारकप्रकरणे विभक्तिविधायकेषु सूत्रेषु आद्यं “प्रातिपदिकार्थलिङ्ग-परिमाणवचनमात्रे प्रथमा” इति सूत्रम्। अत्र नैयायिकाः – “न केवला प्रकृतिः प्रयोक्तव्या नापिकेवलः प्रत्ययः” इति नियमेन केवलप्रातिपदिकस्य प्रयोगानर्हत्वात् प्रथमा प्रयुज्यते। एवञ्च प्रथमाविभक्तिः साधुत्वमात्रबोधिका इति वदन्ति।

**अत्र नागेशसिद्धान्तः –**

१. “कर्मणि द्वितीया” इत्यादिभिः सूत्रैः विहिताः द्वितीयादयो विभक्तयः क्रियायोगे एव

प्रवर्तन्ते इति तु निश्चप्रचम्। तत्साहचर्यात् प्रथमाविभक्तिरपि क्रियायोगे एव प्रवर्तन्ते।

२. किञ्च प्रथमान्तार्थप्रकारक-शाब्दबुद्धित्वावच्छिन्नं प्रति विशेष्यतया धातुजन्योपस्थितिः हेतुः इति कार्यकारणभावाच्च प्रथमाविभक्तिरपि क्रियायोगे एव प्रवर्तन्ते।

३. अपि च "तिङ् समानाधिकरणे प्रथमा" इति वार्तिकबलादपि इयं विभक्तिः क्रियायोगे एव प्रवर्तन्ते इति लभ्यते। यत्र क्रिया न श्रूयते तत्र अध्यहारो भवति। अत एव भाष्यकारैः उक्तम् – 'अस्तिर्भवन्तीपरोऽप्रयुज्यमानोऽप्यस्ति' इति। तथा च एभिः त्रिभिः प्रमाणैः प्रथमाविभक्तिरपि कारकविभक्तिरेवेति सिध्यति।

**कारकद्वितीयविभक्त्यर्थविचारः -**

कर्मसञ्ज्ञां पुरस्कृत्य प्रवर्तमाना द्वितीया, कारकद्वितीया इत्युच्यते। "कर्तुरीप्सिततमं कर्म", "तथायुक्तं चानीप्सितम्", "अकथितं च" इत्येवमादिभिः अष्टभिः सूत्रैस्तथा कैश्चित् वार्तिकैश्च कर्मसञ्ज्ञा विधीयते। कर्मसञ्ज्ञायाः फलत्वेन द्वितीयाविभक्तिविधायकं सूत्रं तु एकमेव "कर्मणि द्वितीया"[1] इति।

द्वितीयाविभक्त्यर्थविषये सन्ति बहवो मतभेदाः। तेषां सर्वेषां समीक्षणेन सिद्धो निष्कृष्टो द्वितीयार्थो कः इति विविच्यते।

**अत्र नैयायिकाः–** प्रमेयता च तुलाप्रामाण्यवत् इति सूत्रवार्त्तिके न्यायवार्तिककारः – क्रियाविषयत्वं कर्मत्वम्[2]।

**अत्र मीमांसकाः–** मण्डनमिश्रः फलमेव धात्वर्थतया अङ्गीचकार। तथा च परसमवेतव्यापारजन्यधात्वर्थफलशालित्वं कर्मत्वम् इति तन्मते लक्षणं पर्यवस्यति।

---

[1] अष्टाध्यायी सूत्रम् -२.३.२

[2] न्यायवार्तिकम्. पृ. - 196

तच्च कर्मत्वं फलनिष्ठमाधेयत्वमेव।

**अत्र वैयाकरणाः-** कर्मत्वं नाम कर्तृगतप्रकृतधात्वर्थव्यापारप्रयोज्यव्यापार-व्यधिकरणफलाश्रयत्वेन कर्तुरुद्धेश्यत्वम्। "तण्डुलं पचति" इत्यादौ विक्लित्ति अनुकूलः व्यापारः फूत्कारादिः प्रकृतधात्वर्थः। तज्जन्य फलं विक्लित्तिः, तदाश्रयत्वेन कर्तुः तण्डुलस्य कर्मत्वम्। विक्लित्तिरूप फलस्यापि व्यपदेशिवद्भावेन फलाश्रयत्वात् कर्मत्वम्। अत एव तत् समानाधिकरणस्य स्तोकादेः कर्मसञ्ज्ञायां 'स्तोकं पचति' इत्यादि सिध्यति।

**कारकतृतीयविभक्त्यर्थविचारः -**

"कर्तृकरणयोस्तृतीया" इति सूत्रेण कर्तरि, करणे च तृतीया विहिता। अत्र तृतीयायाः कर्तृकरणे अर्थः। कर्तृत्वं च कर्तृसञ्ज्ञाबोधित कर्तृत्व शक्तिमत्त्वम्। सा शक्तिश्च कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रय-तद्धात्वर्थाश्रये वर्तते "स्वतन्त्रः कर्ता"[1] इति सूत्रस्वरसात्।

**अत्र तार्किकाः** – "स्वतन्त्रः कर्ता" इति हि पाणिनिः स्वातन्त्र्यमेव कर्तृत्वमिति। स्वातन्त्र्यञ्च इतरकारकाप्रयोज्यत्वं कारकान्तरप्रयोजकत्वं वा इति न्यायभाष्यकारः।[2]

**अत्र वैयाकरणाः -** वैयाकरणस्तु यदा यदीयो व्यापारो धातुना अभिधीयते तदा सा कर्ता। एवञ्च धात्वर्थव्यापाराश्रयत्वं कर्तृत्वम्। तदेव च स्वातन्त्र्यम् इति वदन्ति।[3]

**अत्र मीमांसकाः–** मीमांसकानामपि इदमेव कर्तृत्वं सम्मतम्। नव्यमीमांसकास्तु "यद्धात्वर्थावच्छिन्नलिङ्गानन्वयिपदोपस्थाप्यार्थाश्रयत्वं यस्य तस्य तत्कर्तृत्वम्।

[1] अष्टाध्यायी सूत्रम् - १.४.५४

[2] न्या. वा. ता. टी. पृ.- 252

[3] वै. सि. भू. पृ.- 135

कर्मलकारेणापि कृतेरुक्तेः पच्येत मैत्रेण इत्यत्राप्यस्तीदं कर्तृत्वम्।"[1]

**अत्र नव्यवैयाकरणाः** – नागेशाचार्यास्तु[2] – स्वातन्त्र्यञ्च तद्धात्वर्थीयकारक-चक्रप्रयोक्तृत्वम्। भाष्ये च "कथं ज्ञायते कर्ता प्रधानमिति यत्सर्वेषु कारकेषु सन्निहितेषु कर्ता प्रवर्तयिता भवति" इत्युक्तम्। एवं स्वेच्छाधीनप्रवृत्तिनिवृत्तिकत्वमपि स्वातन्त्र्यम्। एतच्च प्रयोजकसन्निधानेऽपि प्ररयोज्यस्य भवति।

**कारकचतुर्थीविभक्त्यर्थविचारः -**

"चतुर्थी सम्प्रदाने"[3] इत्यनेन सूत्रेण चतुर्थी विहिता। कारकचतुर्थ्याः संप्रदानत्वशक्तिमानर्थः। सा शक्तिश्च तत्तद्धात्वर्थकर्मनिष्ठफलनिरूपकत्वेनेच्छाविषयो यः, तन्निष्ठा। एवञ्च चतुर्थ्याः सम्प्रदानार्थकत्वमवगम्यते। "कर्मणा यमभिप्रैति स सम्प्रदानम्" इति सूत्रेण च भगवान् पाणिनिः सम्प्रदानस्वरूपं न्यरूपयत्।

**अत्र नैयायिकाः** – न्यायवार्त्तिककारः "धात्वर्थकर्म यत्सम्बन्धितया अभिप्रेतं तत्सम्प्रदानम्"[4] इत्यवदत्।

**अत्र मीमांसकाः**– धात्वर्थकर्मजन्यव्यापारोद्देश्यत्वं सम्प्रदानत्वम्। विप्राय गां ददाति। दानकर्मीभूतगोजन्यपयोदोहनादिव्यापारोद्देश्यत्वाद्विप्रस्य सम्प्रदानत्वम्[5]। नव्यास्तु दृष्टद्वारकधात्वर्थोद्देश्यत्वं सम्प्रदानत्वम्। धात्वर्थजन्यदृष्टफलशालित्वमिति यावत्[6]।

---

[1] भा. र. पृ. - 75

[2] ल. म. पृ- 1345

[3] अष्टाध्यायी सूत्रम् - २.३.१३

[4] न्या. वा. पृ.-196

[5] भा. चि. पृ. - 99

[6] भा. चि. पृ. - 100

**अत्र वैयाकरणाः**- क्रियाकर्मसम्बन्धितया इच्छाविषयत्वम्, क्रियाकर्मसम्बन्धजन्य-फलभागित्वेनेच्छाविषयत्वं वा सम्प्रदानत्वमिति सिद्ध्यति।

**कारकपञ्चमीविभक्त्यर्थविचारः -**

"अपादाने पञ्चमी"[1] इति पञ्चमी विहिता। कारकपञ्चम्याः अपादानत्वशक्तिमानर्थः। सा शक्तिश्च प्रकृतधातूपात्तविभागजनक व्यापारानाश्रयत्वे सति प्रकृतधात्वर्थविभागाश्रयो यस्तद्वृत्तिः। अपादानं च "ध्रुवमपायेऽपादानम्"[2] इति सूत्रात् अपाये सति यद् ध्रुवं तद् भवति। अपगच्छत्यवतिष्यते यत्तदपादानमिति न्यायवार्त्तिककारः।[3] यथा वृक्षात्पतति इत्यत्र वृक्षोऽपादानसंज्ञकः। यत् पतति तदपगच्छति। तस्मिन् अपगच्छति अपतिष्ठते वृक्षे इति तदपादानम्।

**अत्र नैयायिकाः** – परकीयक्रियाजन्यविभागाश्रयत्वमपादानत्वम्। वृक्षात्पर्णं पतति इत्यत्र पञ्चम्या विभागजनकत्वम्, अन्योऽन्याभावप्रतियोगितावच्छेदकत्वं चार्थः।

**अत्र वैयाकरणाः** – वैयाकरणानामपि लक्षणे नैयायिकैः सह न वैमत्यम्। तथा हि –

**अपाये यदुदासीनं चलं वा यदि वाचलम्।**
**ध्रुवमेवातदावेशात् तदपादानमुच्यते।।**
**पततो ध्रुव एवाश्वो यस्मादश्वात्पतत्यसयौ।**
**तस्याप्यश्वस्य पतने कुड्यादिर्ध्रुवमुच्यते।।**[4]

**अत्र मीमांसकाः** – मीमांसकानामपि पूर्वोक्तापादानलक्षणे आनुकूल्यमेव।

---

1 अष्टाध्यायी सूत्रम् -२.३.२८

2 अष्टाध्यायी सूत्रम् - १.४.२४

3 न्या. वा. पृ.- 196

4 वाक्यपदीयम्

तत्प्रकाशितमित्थं भाट्टचिन्तामणौ "तद्धात्वर्थतापच्छेदकफलजनकक्रियानाश्रयत्वे सति, तादृशक्रियाजन्यधात्वर्थतावच्छेदकफलनिरूपकत्वम्, तादृशक्रियानिरूपकत्वं वापादानत्वम्"[1] इति।

अवधिः पञ्चम्यार्थः इति प्रतिज्ञाया कौण्डभट्ट पञ्चम्याः विभागाश्रयार्थकत्वं प्रत्यापादयत्। तस्मात् सर्वशास्त्रकृत्सम्मतो ह्ययं पञ्चम्याः विभागाश्रयत्वरूपोऽर्थः एव युक्तः इति युक्तम्।

**कारकषष्ठीविभक्त्यर्थविचारः -**

षष्ठीविभक्तिः द्विधा विभक्तः। शेषषष्ठी, कारकषष्ठी चेति। सम्बन्धसामान्ये विहिता षष्ठी शेषषष्ठी इत्युच्यते। यथा राज्ञः पुरुषः। किन्तु केषाञ्चन कृदन्तानां योगे कर्तरि कर्मणि च या षष्ठी विधीयते सा तावत् कारकषष्ठी इति। यथा कृष्णस्य गमनम्।

**कारकसप्तमीविभक्त्यर्थविचारः -**

"सप्तम्यधिकरणे च" इति सूत्रबलात् अधिकरणसप्तम्याः अधिकरणत्व-शक्तिमानर्थः। सा च शक्तिः कर्तृकर्मद्वारा क्रियाश्रयनिष्ठा। अधिकरणलक्षणे सर्वेषामपि शास्त्रकाराणाम् ऐकमविति। ध्रुतिहेतुरधिकरणमिति न्यायवार्त्तिककारः। सप्तम्यर्थस्तु वैयाकरणानां मते आश्रयः। तार्किकाणां मते आश्रयत्वमाधेयत्वं वा। पदवाक्यरत्नाकरकारस्तु अधिकरणम्, अधिकरणत्वम्, आदेयत्वं वा सप्तम्यर्थ इति स्वीकरोति।[2] शक्तिः कारकम् इति पक्षे वैयाकरणैरपि आश्रयत्वं सप्तम्यर्थतया

[1] भा. चि. पृ. - 104

[2] वा. प. तृ. सा. - 48

अङ्गीक्रियते।[1] नागेशस्तु अधिकरणत्वशक्तिमानेव सप्तम्या बोध्यते प्रत्ययानां वाचकत्वे, द्योतकत्वे तु सम्बन्धमात्रमिति वदति।

इत्थं कारकविभक्त्यर्थविचारः प्रवृत्तः।

## सहायकग्रन्थसूची

१. **अष्टाध्यायी** आचार्यपाणिनिप्रणीता, सम्पादकः-राजकिशोर मणि त्रिपाठी, संस्कृत सेवा संस्थान, गोरखपुर, प्रथम संस्करण- १९९८

२. **परमलघूमञ्जूषा,** महामहोपाध्यायश्रीनागेशभट्टविरचिता, चौखम्बा सुरभारती प्रकाशन, वाराणसी,

३. **परिभाषेन्दुशेखरः**, नागेशाचार्यः, व्याख्याकारः – विश्वनाथमिश्रा, प्रकाशकः – चौखम्बा सुरभारती प्रकाशन, वाराणसी।

४. **पाणिनीयव्याकरणमहाभाष्यम्,** श्रीमन्महर्षिपतञ्जलिनिर्मितं, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, १९८७

५. **महाभाष्यम्,** भारतीयधिशासनसंरक्षकतायां प्रकाशितम्, भागत्रयात्मकम्, मोतिलाल बनारसीदास, १९६७

६. **वाक्यपदीयम् ब्रह्मकाण्डम्,** स्वोपज्ञवृत्ति अम्बाकर्त्री हरिवर्षभः, पद्मश्री पण्डित रघुनाथ शर्मा, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, २००६

७. **वैयाकरणभूषणसारः**, चौखम्बा संस्कृत प्रतिष्ठान, २०१८

८. **वैयाकरणसिद्धान्तकौमुदी**, भट्टोजिदीक्षितः, चौखम्बा भारतीयप्रकाशन, वाराणसी, १९९०

[1] प. वा. र. पृ. - 827

९. **वैयाकरणसिद्धान्तलघुमञ्जूषा** श्रीमन्नागेशभट्टविरचिता, सम्पादकः- आचार्यश्रीरामप्रसादत्रिपाठी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९९२ शकाब्दः ।

**स्वाती ईश्वर लोडे**
शोधच्छात्रा, व्याकरणविभागः
केन्द्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः
Mob. No- 8096936593
e-mail- swateelode4@gmail.com

❑ ❑ ❑

# आयुर्वेदे ऋत्वनुगुणं प्राकृतिकशारीरिकस्थितयः

डः देवव्रत वेरा

**सारांशः-** आयुर्वेदः पारम्परिकभारतीयचिकित्साव्यवस्था प्रकृतेः मानवशरीरस्य च उपरि ऋतुप्रभावं प्रतिपादयति। आयुर्वेदानुसारं शरीरस्थदोषाः (ऊर्जाबलाः) प्रकृतौ वर्तमानगुणाः च प्रत्येकस्मिन् ऋतौ विशिष्टं परिवर्तनं कुर्वन्ति। एतेषां परिवर्तनानां अवगमनेन व्यक्तीनां संतुलनं स्थापयितुम् ईष्टतमस्वास्थ्यं च प्रवर्तयितुं साहाय्यं कर्तुं शक्यते। अत्र आयुर्वेदानुसारं भिन्न-भिन्न-ऋतुषु प्रकृतेः शरीरस्य च स्थितिः सामान्या अवलोक्यते। अतएव लोके आयुर्वेदशास्त्रे वा ऋतुसात्म्यप्रकरणे वा संवत्सरः (पूर्णवर्षम्) षड्भागेषु अर्थात् षट् ऋतुषु विभक्तः अस्ति। अस्मात् एतेषु त्रिषु शिशिरवसन्तग्रीष्मेषु सूर्यस्य उत्तरदिशि गमनसमयः उत्तरायणं वा आदानं वा कथ्यते। वर्षा-शरद-शीतकालयोः यदा सूर्यः दक्षिणदिशि गच्छति सः समयः दक्षिणायनः विसर्गकालः वा इति कथ्यते ।

विसर्गकाले अर्थात् दक्षिणायने वायुः शुष्कः न भवति, परन्तु आदानकाले अर्थात् उत्तरायणे वायुप्रवाहः अधिकः शुष्कः भवति । विसर्गकाले चन्द्रः बलपूर्णः भवति, सः स्वशीतलकिरणैः समग्रं पृथिवीं तृप्तं करोति, अतः विसर्गकालः सौम्यः इति उच्यते अर्थात् चन्द्रगुणाः सन्ति इति। पुनः आदानाकाल अर्थात् उत्तरायनस्य अग्नेय अर्थात् अग्निगुणाः उक्ताः यतः सूर्यः, वायुः, चन्द्रः च अपि कालस्य स्वाभाविकवेगेन स्वमार्गं (मेशादीराशिं गच्छन्) गृह्णन्ति, कालः, ऋतुः, रसः, दोषः, शरीरबलं च जनयन्ति। कारणं भूतं मयि, तादृशं प्रवचनं दीयते।

ऋतुचार्य वा ऋतुसात्म्य अर्थात् ऋतुः सत्म्यः च द्वयोः शब्दयोः युक्तौ स्तः यस्मिन् ऋतुः अर्थः समृद्धः वा गतिः इति अर्थः अस्ति तथा च सत्म्यशब्दस्य अर्थः

अनुकूलता इति । कस्मिन् ऋतौ कः आहारः युक्तः कः आहारः अनुचितः इति एतानि सर्वाणि ज्ञात्वा तदनुसारं वर्तयन् ऋतुत्वम् इति वक्तुं शक्यते इति भावः। एवं प्रकारेण सम्पूर्णे वर्षे षट् ऋतवः भवन्ति। एतेषु सूर्यस्य उत्तरदिशि गमनसमयः उत्तरायणः अर्थात् आदानप्रदानकालः अथवा शिशिरवसन्तग्रीष्मकालः इति ज्ञातव्यः। अस्मिन् काले सूर्यः प्रतिदिनं मनुष्याणां बलं हरति, मनुष्येषु दुर्बलता च आगच्छति इत्यादि विषया विस्तार रूपेण शोधप्रवन्धे उपस्थापितम्।

**सूचकशब्दः**- आयुर्वेदः, हेमन्त-ऋतु, शिशिरऋतौ,वषाऋतौ, वसन्त ऋतौ, वर्षा ऋतौ, शीतऋतौ

**आयुर्वेदे ऋतुनुगुणं प्राकृतिकशारीरिकस्थितयः च**

'ऋतुः' मनुष्याणां जीवने महत् प्रभावं करोति। मनुष्यस्य स्वभावानुसारं कस्मिन्वित् ऋतौ कस्यचित् दोषस्य शान्तिः भवति तथा च केनचित् दोषस्य प्रवृत्तिः भवति द्वितीये ऋतौ तस्य विपरीतप्रभावः भवति। आयुर्वेदे प्रत्येकं ऋतुनुसारं मनुष्याणां शैल्याः उल्लेखः अस्ति, यस्याः अनुसरणं हितकरं भवति । येन रोगान् परिहर्तुं शक्नोति यदि च रोगैः पीडितः भवति तर्हि तेषां चिकित्सां कर्तुं शक्नोति।

चरकः "तस्याशितीया" इति षष्ठेऽध्याये ऋतुसम्बद्धाहारस्य वर्णनं कृतवान् अस्ति। चरकः मन्यते यत् ऋतुनानुसारं संस्कारानुसरणं कृत्वा अपक्वं, पीत, सीसभोजनं खादित्वा जनानां बलस्य वर्णस्य च वृद्धिः भवति, परन्तु सामान्यजनस्य सर्वप्रथमं कौतुकं भवति यत् ऋतुः किम्, कथम् इति बहु अस्ति ततः तेषां तदनुसारं आहारः किं भवेत् ?

एतानि सर्वाणि निराकरणानि क्रियन्ते- आयुर्वेदस्य अनुसारं प्राचीनगुरुभिः भारतस्य भौगोलिकस्थानानुसारं, मासस्य, राशिचक्रस्य, ऋतोः च स्वरूपानुसारं ऋतोः

विचारः कृतः अस्ति। अस्मिन् सन्दर्भे मासलक्षणम् अपेक्षया राशिलक्षणं बलवन्तः भवन्ति, तथा च राशिचक्रेभ्यः क्रमेण बलवन्तः इति सिद्धं भवति।

ऋतुचार्य वा ऋतुसात्म्य अर्थात् ऋतुः सत्म्यः च द्वयोः शब्दयोः युक्तौ स्तः यस्मिन् ऋतुः अर्थः समृद्धः वा गतिः इति अर्थः अस्ति तथा च सत्म्यशब्दस्य अर्थः अनुकूलता इति । कस्मिन् ऋतौ कः आहारः युक्तः कः आहारः अनुचितः इति एतानि सर्वाणि ज्ञात्वा तदनुसारं वर्तयन् ऋतुत्वम् इति वक्तुं शक्यते इति भावः। सात्म्यम् अष्टविधम् उच्यते– जाति-आतुर, धान्य, रस, देश, ऋतु, उदकसात्म्य। अनुग्रहाय शरीरे निद्रां वा वसति वा सात्म्य। समरूपता अपि उपशय उच्यते। समतायाः पर्यायः अस्ति। हेतोः (निदानस्य) विपरीताय, व्यधि (रोगस्य) विपरीताय, हेतोः व्याध्येः अर्थस्य (प्रभावस्य) विपरीताय, औषधस्य (हरितस्य), अन्न (भक्ष्य भोज्यादि पदार्थ) शान्तप्रयोगस्य, भोजनस्य (भोजनस्य, भोजनस्य), विहार (स्नानम्, धूमपानम्) इति रोगस्य उपनाम उच्यते। आम्, एतत् सामञ्जस्यम् अपि वक्तुं शक्यते। ह्यानिमैन् इत्यस्य होम्योपैथिकचिकित्सा चिकित्साशास्त्रस्य विरोधाभासात्मकपद्धतेः उदाहरणम् अस्ति।

मास-राशि-ऋतुविभागानुसारम् एतत् भारतीयवर्षं वा सम्पूर्णं वर्षं द्वादशः(१२) मासाः, द्वादशः(१२) राशिः, षट् ऋतुः च इति विभक्तम् अस्ति। एतत् यथा-

| क्रम. | काल | मास | राशि | ऋतु |
|---|---|---|---|---|
| 1. | विसागंकाल (दक्षिणयन) | मार्ग-शीर्ष-पौष च | वृश्चिक तथा धनु | हेमन्त-ऋतु |
| 2. | अदानाकल (उत्तरायण) | माघ फाल्गुन च | मकर तथा कुम्भ | शिशिर-ऋतु |
| 3. | अदानकाल | चैत्र वैशाख च | मीन तथा मेष | वसन्त-ऋतु |

| | | | | |
|---|---|---|---|---|
| | (उत्तरायण) | | | |
| 4. | अदानाकल (उत्तरायण) | ज्येष्ठ आषाढ च | वृषभ तथा मिथुन | ग्रीष्म-ऋतु |
| 5. | विसर्गकला (दक्षिणायन) | श्रावण भाद्रपद च | कर्क तथा सिंह | वर्षा-ऋतु |
| 6. | विसर्गकाल (दक्षिणयन) | अश्विनी कार्तिक च | कन्या तथा तुला | शरद-ऋतु |

**आदानकालस्य वर्णनम् -** एवं प्रकारेण सम्पूर्णे वर्षे षट् ऋतवः भवन्ति। एतेषु सूर्यस्य उत्तरदिशि गमनसमयः उत्तरायणः अर्थात् आदानप्रदानकालः अथवा शिशिरवसन्तग्रीष्मकालः इति ज्ञातव्यः। अस्मिन् काले सूर्यः प्रतिदिनं मनुष्याणां बलं हरति, मनुष्येषु दुर्बलता च आगच्छति । अस्मिन् काले सूर्यस्य शक्तिः प्रवलं भवति। तस्य प्रभावः समग्रभूमौ, जले, औषधेषु च पतति। आदानप्रदानकाले पृथिवी स्वाभाविकतया षड्मासान् यावत् दक्षिणदिशि, शेषषड्मासान् उत्तरदिशि गच्छति। यदा पृथिवी क्रमेण दक्षिणं प्रति गच्छन् आसन। तदा उत्तरभूमिः सूर्यस्य तीव्रकिरणानाम् प्रभावेण तिष्ठति। सूर्यस्य तीव्रतापः पृथिव्याः जलीयभागस्य शोषणं करोति, तत्र वायोः आर्द्रतायाः न्यूनता भवति, तापः शुष्कता च वर्धते। अस्मिन् कालखण्डे सोम्या अंशस्य शोषणं भवति, अतः तस्य नाम आदानकाल इति। संक्रमणऋतुषु सूर्यः अधिकाधिकं प्रबलः भूत्वा वायुना अधिकाधिकं शुष्कतां जनयति, शुष्कतायाः सह कटुकक्षिरसान् वर्धयति च यस्मात् कारणात् मनुष्याणां जीवानां च शरीरे दुर्बलता आगच्छति। द्वितीयकषायकटुरक्तस्य बलात् अयं अग्निकालः।

**विसर्गकालस्य वर्णनम् -** आदानकालस्य विपरीतम् दक्षिणायन अर्थात्

विसर्गकाले पृथिवी उत्तरभूमितः दूरं दक्षिणभागस्य समीपं गच्छति, यस्य कारणात् तापस्य न्यूनता, शीतलतायाः वृद्धिः च भवति। अस्मिन् काले सूर्यः आदानकाले अवशोषितं सोम्यं वा रसं वा मुञ्चति वा विलीयते वा । अस्मिन् विसर्गकाले वर्षा, शरदः, मन्तऋतुः च ग्रहणं भवति। यदा सूर्यः दक्षिणदिशि गच्छति तदा आदानकालस्य प्रभावः नष्टः भवति, चन्द्रः (सोमः) प्रबलः भवति तथा च सूर्यस्य तीव्रकिरणाः अपि तीव्राः न तिष्ठन्ति। मेघः, वर्षा, शीतलता च पृथिव्याः तापं शान्तयन्ति तथा च वायुमण्डले क्रमशः स्निग्ध, अम्ल, लवणं, मधुरं च रसस्य वृद्धिः भवति तथा च मनुष्याणां बलस्य वृद्धिः भवति। यदि बलस्य तुलना क्रियते तर्हि शरद-शीतकालयोः मनुष्याणां बलं श्रेष्ठं, वर्षा-ग्रीष्मेषु न्यूनबलं, शरद-वसन्तयोः मध्यमबलं च भवति।

आयुर्वेदग्रन्थेषु सर्वेषु ऋतुषु शरीरं मनः च स्वस्थं स्थापयितुं निश्चित आहारस्य जीवनशैल्याः च निर्देशाः दत्ताः सन्ति। अत्र ते निर्देशाः क्रमेण षड्ऋतूनुसारेण वर्ण्यन्ते-

**1.हेमन्त ऋतुचार्य-** [Regimen of Winter Season] -

चरकप्रभृति आयुर्वेदाचार्यः स्वपुस्तकेषु शरदऋतौ केषां आहारः, क्रियाकलापाः च कर्तव्याः इति स्पष्टानि निर्देशानि दत्तानि सन्ति। हेमन्तस्य ऋतुः मार्गशीर्षपौषयोः द्वयोः मासयोः संयोगेन समाप्तः भवति। अत्र ऋतुः मासस्य दृष्ट्या विभक्तः अस्ति, यतः मार्गशीर्षः उत्तमः मासः इति मन्यते, अतः हेमन्तऋतुः आरभ्यताम्।

हेमन्तऋतौ शरीरे शीतत्वात् त्वचा संकुचिता भवति, येन शरीरस्य तापः वा तापः वा बहिः आगन्तुं न शक्नोति, यत् प्रबलं जठर-अग्निरूपं गृह्णाति जठराग्नेः

प्रधानत्वात् शरीरस्य आहारस्य पाचनं सुलभं भवति। यदा एषः प्रबलः जठरस्य अग्निः वायुसङ्गात् अपसारितः भवति तदा सः अधिकः प्रबलः भवति। अन्नरूपेण पर्याप्तं इन्धनं न प्राप्यते इति दृष्ट्वा क्रुद्धः भूत्वा शरीरे विद्यमानं रसधातुं नाशयित्वा वायुप्रकोपस्य कारणं भवति।

हेमन्तऋतौ रात्रयः दीर्घाः भवन्ति, अतः प्रातःकाले बुभुक्षितः भवति, परन्तु नित्यकार्यं सम्पन्नं कृत्वा स्नानं वा न कृत्वा भोजनं न कृत्वा विकारः भवति।

**(i) हेमन्तऋतौ आहारः** - हेमन्तऋतौ स्निग्ध (घृतं, तैलं, वसायुक्तं), अम्लं लवणं च रसयुक्तानि खाद्यपदार्थानि, औदकं अर्थात् जलजीवानां, मत्स्यानां, कच्छपस्य इत्यादीनां तैलमांसं खादन्तु। शाकाहारी गोधूम-उराद-गुड-आदि-सुगन्धित-द्रव्याणां सेवनं कुर्यात् । शाकाहारीणः विलेशाय, प्रसाहं, पशुपक्षिमांसम्, मद्यं, इक्षुरसं, मधु च सेवितुं शक्नुवन्ति। शाकाहारी व्यक्तिः क्षीरेण सह उष्णजलं तत्पनीरं, शर्करा, गुडं, शर्करा, मेदः, तैलं, नवतण्डुलं, मधुदलिया, हलवा, राबरी क्रीम इत्यादीनि च सेवनं करोति, तस्य आयुः वर्धते। ऋतुफलानि, ऋतुशाकानि, उष्णपेयानि हेमन्तऋतौ स्वास्थ्याय लाभप्रदानि भवन्ति।

**(ii) हेमन्तऋतौ पथ्य विहारः** - कस्मिन् अपि ऋतौ व्यक्तिः स्वस्य दैनन्दिनस्य अनुसारं कार्यं कुर्यात्, परन्तु तस्य ऋतुस्य अनुसारं तस्य कार्येषु दक्षता अपि आनेतुं शक्यते। शिशिरऋतौ शीतप्रकोपः भवति, अतः शरीरे तैलमालिशः, स्निग्धद्रव्यैः मर्दनं, शिरसि तैलं लेपनं, धूपसेवनं, उष्णशय्यागृहे निवासः इत्यादयः कर्तव्याः।

शिशिरे यानं, शय्यागृहं, आसनक्षेत्रं च सर्वतः आच्छादितं, उष्णं च भवेत्। शयनादिकं आच्छादनार्थं कम्बलं रजतादिवस्त्रं चादरं प्रसारयेत्। गुरुः उष्णवस्त्रं च धारयेत्। अगुरुचन्दनादीनां घनपिष्टं प्रयोजयेत्। आयुर्वेदः अपि अस्मिन् काले मैथुनं

कर्तुं निर्देशयति, परन्तु तस्य निर्देशः अपि अस्ति यत् यौनसन्तुष्टौ भवतः युवतीयाः सह एव निद्रां कुर्वन्तु । सीमितजीवनं श्रेष्ठम्।

**(iii) हेमन्तऋतौ अस्वस्थ (व्याज्य) आहार-विहारः-** मृदुः, शुष्कः, कार्मिनेटिवः पदार्थाः, कटुः, तीक्ष्णः, कटिजः, शीतजलशर्करायुक्तः सट्टः, शीतवायुः इत्यादीनि पुरतः स्थातुं, शिशिरे निषिद्धाः इति कथ्यन्ते। शरीराय हानिकारकं भवति। एतेषां सेवनेन व्यक्तिः रोगैः पीडितः भवितुम् अर्हति, चिकित्सालयं गन्तुं च शक्नोति।

**2. शिशिर ऋतुचर्या** [Regimen of Dewy Season] -

चरकस्य मते हेमन्तस्य शिशिरस्य च ऋतुस्य प्रभावः प्रायः समानः एव भवति। अतः शिशिरऋतौ केषुचित् भोजनेषु शिशिरऋतुस्थानेषु च केवलं भेदः भवति, परन्तु अस्मिन् ऋतौ सूर्यः उत्तरायणं प्रति गच्छति तथा च शुष्कऋतुः, मेघाः, वायुः, अधिकवृष्टिः च शिशिरं वर्धयति।

**हेमन्तशिशिरौ तुल्यौ शिशिरेऽल्पं विशेषणम् ।**
**रौक्ष्यमादानजं शीतमेघमारूतवर्षजम् ॥**[1]

**(i) शिशिरऋतौ पथ्य-आहर-विहारः-** विनिमयकालात् शरीरे कफः स्यात्। अतः शिशिरऋतुभोजने क्षीरपनीररबडीक्रीमगुडशर्कराशर्कराउराददालादिभक्षणकाले उष्णजलं पिबेत्, यतः शिशिरे शीतं अधिकं भवति। विशेषतः उष्णकक्षे निद्रां कर्तव्यम्। शीतात् रक्षणार्थं सर्वे उपायाः करणीयाः।

**(ii) शिशिरऋतौ अपथ्य-आहार-विहारः-** आयुर्वेदमतस्य अनुसारं कटुका, कालीमरिच, लालमरिच, पिप्पली, कटुकटु, कसैला, वातकारक, लघु, सत्तू, सिरप इत्यादीनि खाद्यपदार्थानि परित्यक्तव्यानि। एते सर्वे पदार्थाः शरीरस्य हानिं कर्तुं शक्नुवन्ति। शेषशीतकालस्य अनुसारं अस्वस्थ आहारस्य पालनं कर्तव्यम्।

## 3. वसन्त ऋतुचर्या [Regimen of Spring Season] -

चैत्रवैशाखमासाः वसन्तऋतुः भवन्ति। सर्वेषु ऋतुषु वसन्तः सुखदः इति मन्यते। अयं विनिमयकालस्य मध्यभागः। अत एव सूर्यस्य तापः शिशिर-शीतकालयोः सञ्चितं कफं द्रवयति, प्रबलं जठराग्निं च दूषयति, यस्य कारणेन उदरसम्बद्धाः रोगाः उत्पद्यन्ते आयुर्वेदानुसारं कफहरणार्थं तथाकथितं वामनकर्म पञ्चकर्मणि कर्तव्यम्। अस्य कारणात् शरीरस्य कफः निर्गच्छति।

**व्यायामोद्धर्तनं घृमं कवलग्रहमञ्जनम्।**
**सुखाम्बुना शौचविधिं शीलयेत कुसुमागमे ।।**[2]

**(i) वसन्तऋतौ पथ्य-आहार-विहारः-** वसन्तऋतौ न बहु शीतं न च बहु तापः। अत एव वसन्तऋतुव्यायामः, घर्षणं, धूम्रपानं, कवलं, अञ्जनं, मन्दजलेन स्नानं नित्यं कर्तव्यम्। शरीरं स्वस्थं स्थापयितुं सहायकं भवति। लेपनार्थं सुगन्धिगुरु-चन्दनादिद्रव्याणि प्रयोक्तव्यानि। पुरातन यव, गोधूम, चना, तण्डुल, अपक्व धान्य आदि, ऋतु शाक कटु, लशुन, ऋतु फल, मधु आदि सेवनं लाभकारी भवति। अशाकाहारी प्रवृत्तियुक्ताः जनाः शर्भा, फेजन्-क्टेर, शरबाडी, महविक इत्यादीन् सेवनं कुर्वन्तु। वसन्तऋतुः सुखदः अस्ति, अतः अयं ऋतुः यात्रायाः कृते उत्तमः अस्ति, अतः पुष्पयुक्तानि, पुष्पयुक्तानि च उद्यानानि गत्वा सहवासः सीमितः भवेत्।

**(ii) वसन्तऋतौ अपथ्य-आहार-विहारः-** वसन्तऋतुः कफस्य बलं वर्धयति, अतः वसन्तऋतौ कफवर्धकानि खाद्यपदार्थानि अर्थात् विलम्बेन पच्यन्ते, अम्लयुक्तानि, घृतं, तैलं, वसा इत्यादीनि परिहर्तव्यानि। सज्जीकृतवस्तूनाम्, उरददालस्य, क्रीमस्य, रबदी इत्यादीनां मधुरवस्तूनाम् सेवनं परिहृतं भवति। दिवा निद्रा केवलं कफं वर्धयति अतः तस्य अपि परिहारः कर्तव्यः।

**4. ग्रीष्म-ऋतुचर्या** [Regimen of Summer Season] -

ज्येष्ठाषाढमासपर्यन्तं ग्रीष्मकालः प्रचण्ड तीव्रस्थितौ भवति। एषः संक्रमणकालस्य मध्यकालः यदा सूर्यः स्वस्य उग्रकिरणैः पृथिव्याः मनुष्यस्य च स्नेहस्य शोषणं कृत्वा मनुष्येषु अत्यन्तं दुर्बलतां, चञ्चलतां च जनयति। केवलं तापः एव सर्वदा अनुभूयते। अस्मिन् समये यत्किमपि कार्यं कृत्वा शक्तिः दुर्बलतां प्राप्नोति।

**मयूखैर्जगतः स्नेहं ग्रीष्मे पेपीयते रविः ।**
**स्वादु शीतं द्रवं स्निग्धमन्नपानं तदा हितम्।।**[3]

**i) ग्रीष्मऋतौ पथ्य-आहार-विहारः**- दुर्बलतां चञ्चलतां च दूरीकर्तुं स्निग्ध-मधुर-आहारानाम् सेवनं लाभप्रदं भवति, परन्तु दुर्बलतायाः कृते प्रकाशस्य द्रवस्य च सेवनं सर्वोत्तमम् अस्ति। मधुररसाः, शीतलपानानि, शर्बतानि, शर्करामिश्रितानि रसाः, जले विलीनाः सट्टूः, कच्चा आमजलं, तैलम् इत्यादीनि व्यञ्जनानि च सेवनं ग्रीष्मकाले लाभप्रदं भवति। ग्रीष्मकाले स्नानम् अपि लाभप्रदम् अस्ति। भवतः शरीरस्य तापमानं न्यूनीकरोति। घृतक्षीरशालीतण्डुलभक्षणेन ऋतुविकारः न भवति ।

ग्रीष्मकाले दिवा शीतलगृहे अद्यत्वे वा वातानुकूलितकक्षे वा रात्रौ चन्द्रकिरणैः शीतलं गृहस्य छतौ मुक्तवायुः च पश्चात् चन्दनादिगन्धैः शरीरं लेपनं कृत्वा। शरीरस्य तापं न्यूनीकर्तुं सहायकं भवति। पुरातनकाले विद्युत्-अभावे ताडव्यजनैः वायुः उड्डीयमानः आसीत्, परन्तु अद्यत्वे विद्युत्युगे व्यजनाः वा वातानुकूलितयन्त्राणि वा एतस्य अभावस्य पूर्तिं कुर्वन्ति ग्रीष्मकाले मध्यपराह्ने शीतलवृक्षाणां छायायां वने उद्याने वा उपविश्य शीतलफलपुष्पाणि भोक्तव्यानि। केवलं ऋतुकाले फलानि शाकानि च सेवन्तु। तैलयुक्तखाद्यानि परिहरन्तु।

**(ii) ग्रीष्मऋतौ अपथ्य- आहार-लिहारः**- ग्रीष्मकालः सेवनस्य विशालः स्तरः

भवति। सूर्यस्य उष्णं चरमं भवति, मनुष्यशरीरं च सुदुर्बलम् अस्ति। अतः मद्यपानस्य अभ्यस्तस्यापि अस्मिन् समये मद्यं न सेवनीयम्। यदि असमर्थं तर्हि किञ्चित् बहु वा जलेन सह मिश्रयित्वा अल्पमात्रायां गृह्यताम्। ग्रीष्मकाले पानेन शोथः, शिथिलता, दाहः, शरीरस्य आसक्तिः च भवति।

**मद्यमल्पं न वा पेयमथवा सुबहूदकम्।**
**लवणाम्ल कटूष्णानि व्यायामं चात्र वर्जयेत्** ॥4

ग्रीष्मकाले लवणस्य, कटु-अम्ल-रसस्य, शारीरिक-क्रिया-सूर्य-किरणस्य सेवनं च वर्जयेत्। शरीरे पित्तदोषवर्धनं बलहानिकारकम्। अत्यन्तं उष्णद्रव्याणां सेवनमपि निषिद्धम्। उद्धार्य सूर्ये निर्गच्छेत् छत्रेण वा ।

**5. वर्षा ऋतुचर्या** [Regiman of Rainy Season] -

वर्षा ऋतुः मासद्वयं श्रावणं भद्रपदं च। वर्षाऋतौ सूर्यः दक्षिणायनं प्रति गच्छति, परन्तु तदन्तरकाले मानवशरीरात् स्नेहस्य, रसस्य च शोषणात् तस्य शरीरं कृशं जातम्, तस्य पाचनवह्निः च अतीव दुर्बलः भवति। सा दुर्बल जठराग्निः वर्षाऋतुः आगमनेन पित्तकफदोषाः अपि वायुवतादिदोषात् व्याप्ताः भवन्ति। यस्मात् कारणात् जठराग्निः अत्यन्तं दूषिता भूत्वा शरीरे वेदना, दाह, श्रान्तता, दुर्बलता च जनयति।

वर्षाकाले यदा उष्णभूमौ वर्षाबिन्दवः पतन्ति तदा वाष्पः निर्गच्छति, येन दोषनिर्माणे साहाय्यं भवति। अस्य कारणात् वर्षेषु मनुष्याणां स्वास्थ्यं अन्येषु ऋतुषु अपेक्षया अधिकं अनियमितं भवति। वर्षाकाले जलं सर्वत्र जलं भवति, येन रोगाः भवेयुः, अतः एतानि सर्वाणि परिहर्तव्यानि, ये च विधयः परिहर्तुं शक्यन्ते, ते सर्वे करणीयाः।

**(i) वर्षाऋतौ पथ्य(प्रशस्थ) आहार-विहारः-** वर्षाऋतुः मानवशरीरस्य कृते

अनियमिताभिः परिपूर्णः भवति, अतः अस्मिन् समये सर्वेषु खादन-पानयोः विषयेषु मधुस्य समुचितरूपेण उपयोगः अवश्यं करणीयः। यतः मधु वा मधु वा उत्तमः योगः। वर्षाऋतौ लघुपच्यम् उष्णं लवणयुक्तं, स्निग्धं च पदार्थं प्रयोक्तव्यम् ।

वर्षाऋतौ जठराग्नोः प्रायः क्रुद्धा एव तिष्ठति, अतः तस्य रक्षणार्थं पुरातनयवस्य, गोधूमस्य, शालीतण्डुलस्य, मूंगदालस्य, अम्लस्य, लवणस्य इत्यादीनां भोजने प्रयोगः करणीयः। अशाकाहारिणः मांसस्य उपयोगं कर्तुं शक्नुवन्ति, परन्तु शास्त्रविधिना पत्त्वा मांसं प्रयोक्तव्यम्। वर्षाकाले मधुना सह जलं पिबेत्। शुद्धिकरणस्य पालनं कृत्वा केवलं शुद्धजलं पिबन्तु, तापयित्वा शीतलीकरणानन्तरं पिबन्तु, यतः अशुद्धजलं बहुरोगाणां उत्पत्तिं आमन्त्रयति।

वर्षाऋतौ नग्नपादाः न गच्छन्तु, केनचित् वाहनेन गच्छन्तु, प्रतिदिनं स्वच्छवस्त्राणि न धारयन्तु। गृहे तिष्ठन्तु यत्र वाष्पशीतादि नास्ति। स्नानकाले स्थूलस्य तौल्यस्य प्रयोगं कृत्वा मेदयुक्तेन चूर्णेन शरीरं मर्दयित्वा घर्षणादिकं प्रयोजयित्वा स्नानं कुर्वन्तु। लघु स्वच्छानि वस्त्राणि धारयन्तु। वमन विरेचनेन शरीरस्य परिवर्तनं कृत्वा बास्तिकर्म कर्तुं शक्यते।

**(ii) वर्षाऋतौ अपथ्य-आहार-विहारः-** वर्षाऋतौ अनियमितवृष्ट्याः कारणात् नदीयाः, तरवाडीयाः जलं दूषितं भवति, अतः जलं न पिबितव्यम्। सत्तुः शीतजले मिश्रितः कफं च वर्धते। रात्रौ ओसस्य मध्ये निद्रा हानिकारकं भवितुम् अर्हति। सूर्ये आर्द्रतायाः कारणात् तस्य सेवनमपि निषिद्धम्। दिवा निद्रा कफं व्याधिं करोति। वर्षाकाले स्त्रीसहवासः मैथुनं वा निषिद्धम्। वर्षाकाले शारीरिकव्यायामः अपि हानिकारकः भवति। शरीरस्य तापमानं वर्धयित्वा न्यूनीकृत्य वा शारीरिकसन्तुलनं

बाधितुं शक्नोति। वर्षाकाले वर्धमानानां कीटमशकानां दंशाः परिहर्तव्याः। चलनं परिहरन्तु।

**6. शरद ऋतुचर्या** [Regimen of Beginning of Autumn Season] -

शरदः अन्तिमः भवति, अश्विन-कार्तित-मासैः युक्तः अस्ति। पित्तदोषः शरत्काले प्रधानः, यतः शरीरं वर्षाऋतौ शीतस्य अभ्यस्तं जातम्, तदनन्तरमेव शरदसूर्यस्य तापः मनुष्यशरीरे सञ्चितं पित्तं द्रवयति, तस्य दोषं च करोति, येन पित्तदोषः शरीरं प्रभावितं करोति संक्रमितः भवति। अत एव पित्तदोषा रोगारम्भात् पूर्वं दमनीया शुद्धा वा कर्तव्या। पित्तनाशाय विरेचनकर्म श्रेष्ठं मन्यते।

**(i) शरद्ऋतौ पथ्य(प्रशस्त) आहार-विहारः-** शरदऋतौ यदि क्षुधा भवति तर्हि कटु, मधुर, कसैला गुणयुक्तानि आहारपदार्थानि, तण्डुल, मूंग, शर्करा, आम्ला, परवाल, मधु, यव, गोधूम, ये सन्ति सुलभपच्यम्। शीतलं विकृतपित्तं शान्तं च आहारं सेवयेत्।

आयुर्वेदस्य अनुसारं वर्षाऋतुसमाप्तेः शरदस्य आगमनसमये तिक्तकघृतस्य, विरेचनकर्मस्य, रक्तमोक्षणकर्मस्य च सेवनं लाभप्रदं मन्यते। पित्तशमकक्रियासु विरेचन क्रिया श्रेष्ठा मन्यते। कार्तिके मासे अर्थात् शरदस्य अन्ते एतत् कर्तुं शुभम्। पित्तकारणात् रक्ते तापः भवति। रक्तस्रावः तस्य शान्तिं कृते लाभप्रदः अस्ति ।

वर्षाऋतौ जलं नवीनं भवति, अस्मिन् बहुविधाः दूषिततत्त्वानि, कृमिः इत्यादयः सन्ति। इदं जलं शरत्प्रभावात् निर्दोषं भूत्वा अगस्त्योदयेन शुद्धं भवति, दिवा सूर्यकिरणैः उष्णं भवति, रात्रौ चन्द्रकिरणैः शीतलं भवति, जलं शुद्धं च भवति। एतस्य जलस्य स्नानपानाय अवगाहं वा यात्रायां वा प्रयोगः अमृतं मन्यते।

शरदस्य सायंकाले चन्द्रकिरणानाम् सेवनं स्वास्थ्याय हितकरं भवति। रात्रौ यः

ओसः पतति सः हानिकारकः भवति। शरत्उत्पन्नपुष्पमालाः, अस्मिन् ऋतौ शुद्धवस्त्राणि च धारयितुं श्रेयः।

**(ii) शरदऋतौ अपथ्य आहार-विहारः-** शरदऋतौ सूर्ये उपविश्य पशुपक्षिणां मेदः, तैल, उरद, अनूप तथा मांसस्य सेवनं, क्षारं, दधिं, दिवा निद्रां कृत्वा पूर्ववायुः परित्यक्तव्यः। शरीरस्य हानिं कर्तुं शक्नोति। ओसः, पूर्णोदरभक्षणं च शरदं त्यक्तव्यम्। मद्यपानम् अपि हानिकारकम् अस्ति ।

एवं ऋतुसम्बद्धा आहारः, आहारः, विहारः च ऋतुसात्म्ये वर्णिताः सन्ति । नियमानुसारं स्वस्थं अस्वस्थं च भोजनं सेवनं न च सेवनं सुखं ददाति। आयुर्वेदस्य अनुसारं वर्तमानस्य ऋतुस्य अन्तिमसप्ताहः आगामिऋतुस्य प्रथमसप्ताहः च– एते चतुर्दशदिनानि ऋतुसन्धी इति उच्यन्ते, यस्मिन् आगामिऋतुविधिः क्रमेण परित्यज्य आगामिऋतुविधिः उपभोक्तव्या आरब्धः भवतु। सहसा त्यक्त्वा रोगहेतुः भवति शरीरं च व्याधिग्रस्तं भवति।

## सन्दर्भसूत्रनिर्देशाः

1.चरक.संहिता- 6अध्याय 19 श्लोक 2.चरक.संहिता- 6अध्याय 24 श्लोक
3. चरक.संहिता- 6अध्याय 27श्लोक 4.चरक.संहिता- 6अध्याय29श्लोक

## सन्दर्भ-ग्रन्थ-सूची

1.अष्टांगहृदयम् (वाग्भटः), सं. हरिशास्त्री भिषगाचार्यः राष्ट्रिय संस्कृत संस्थान, नई दिल्ली-110058 । (पुनर्मुद्रित सं. 2002)

2. आयुर्वेद का परिचयात्मक इतिहास ले. डा. ताराचन्द्र शर्मा प्रका० नाथ पुस्तक भंडार, रेलवे रोड, रोहतक सं. द्वितीय, 1984 ई.

3. ऋग्वेदसंहिता- सं. श्रीपाद दामोदर सातवलेकर प्रका. स्वाध्याय मण्डल, पारडी सं. षष्ठ, 1997

4. कायचिकित्सा सं. डा. शिवचरण ध्यानी प्रका. आयुर्वेदिक एवं तिब्बी अकादमी, लखनऊ प्रथम सं. 1982

5. कायचिकित्सा (4 खण्ड) लेखक वैद्य रामरक्ष पाठक । प्रका० चौखम्भा भारती अकादमी

सहकारी अध्यापकः, संस्कृतविभागः
शहीद-मातङ्गिनी-हाजरा-गभर्नमेन्ट जेनारेल-डिग्रि-
कलेज-फर-उइमेन
पूर्व-मेदिनीपुर, निमतौड़ि,पश्चिमवङ्गः

❑ ❑ ❑

# विशिष्टाद्वैतसिद्धान्ते श्रीभाष्यप्रमेयसंग्रहः

डा. एन्. आर्. सौम्यनारायणः

अखिलभुवनजन्मस्थेमभङ्गादिलीले विनतविविधभूतव्रातरक्षैकदीक्षे।
श्रुतिशिरसिविदीप्ते ब्रह्मणि श्रीनिवासे भवतु मम परस्मिन् शेमुषी भक्तिरूपा।।
तस्मै रामानुजार्याय नमः परमयोगिने।
यः श्रुतिस्मृतिसूत्राणां अन्तर्ज्वरमशीशमत्।।

**विशिष्टाद्वैतपदविचारः**

तत्र तावदादौ विशिष्टाद्वैत पदस्य विग्रहो ज्ञेयः। निर्विशेषाद्वैतमित्यस्य प्रतिकोटितया विशिष्टाद्वैतमिति प्रयुज्यते। श्रीभाष्ये तावद्युक्तं निर्विशेषमिति तत्तु सविशेषमेवेति श्रूयते। शाङ्करभाष्ये निर्विशेषमेव ब्रह्म सजातीयविजातीयस्वगत भेदशून्यमेकं ब्रह्म तत्वं, तदतिरिक्तम् अविद्याकल्पितं मिथ्यैव। श्रवणमनन निदिध्यासनादिभिः निरस्तायां समस्तभेदवासनायां "[1]तत्वमसि", "अहं ब्रह्मास्मी" - त्यादिवाक्यैरपरोक्षज्ञानं जायते। ततो ब्रह्मैक्यमेव सम्पद्यते। अत्र भेदपदंविशेषपरम्। सजातीयाः जीवाः, विजातीयमचेतनम्, स्वगतभेदः समस्तगुणगणः।

एतत् त्रयं व्यावहारिकं, ब्रह्मैव पारमार्थिकं, तद्व्यतिरिक्तं सर्वं मिथ्या, भेदभानन्तु भावरूपाविद्यामूलकम् इति साधितम्। एतन्निरसनार्थमेव जिज्ञासाधिकरणं प्रववृते। "यक्षानुरुपो बलिः" इति न्यायेनाद्यसूत्रभाष्यमेवातिविस्तृतम्। अतः सजातीयविजातीयस्वगतभेदविशिष्टम् (सविशेषमेव) ब्रह्म। भावरूपाज्ञाने

[1] छा1-6-3 .

श्रुत्यादिप्रमाणानि न सन्तीति प्रसाध्य, सविशेषब्रह्मैक्यं स्थापितं न तु निर्विशेषमिति। ततः विशिष्टाद्वैतमिति तत्समानार्थकव्यवहारः वेदार्थसङ्ग्रहव्याख्यायां श्रुतप्रकाशिकाचार्योपज्ञमेव। ततः प्रभृति विशिष्टाद्वैतमित्येव प्रयोगः दरीदृश्यते। सविशेषाद्वैतमित्यस्य समानार्थकमेवेदं पदम्। एवञ्जिज्ञासाधिकरणभाष्यसारांशः श्रीनिगमान्तमहादेशिकैः न्यायसिद्धाञ्जनप्रारम्भे अशेषचिदचित्प्रकारं ब्रह्मैकमेव तत्त्वम् इत्युक्तम्। तत्र प्रकार प्रकारिणोः मिथोऽत्यन्तभेदेऽपि विशिष्टैक्यादिविवक्षया एकत्वव्यपदेशः, तदितरनिषेधश्चेति, सिद्धान्तप्रमेयं सूत्रप्रायमन्वग्रहि।

ब्रह्म सविशेषमेव, न तु भवदुक्तरीत्या निर्विशेषम्। तन्निष्ठमेवैक्यं न तु निर्विशेषगतम्। तथाचाद्वैतं नामऐक्यं, तच्च विशिष्टनिष्ठमेवेति सिद्धान्तः इति आदावेव प्रादर्शि। तथा च चेतनाचेतनकल्याणगुणविशिष्ट (सविशेष) निष्ठमेवैक्यमित्यभिप्रायेण जिज्ञासाधिकरण सारांशः आदावेव प्रादर्शि न्यायसिद्धाञ्जने। अत्र केचित् एवं विग्रहः भाष्यकाराणामनभिमतः।

1) विशिष्टं च विशिष्टं च विशिष्टे तयोरद्वैतम्। सूक्ष्मचिदचिद्विशिष्टं कारणं, स्थूलचिदचिद्विशिष्टं च कार्यम्, तयोरद्वैतमित्येवविग्रहः कर्तव्यः "तदनन्यत्वमारम्भणशब्दादिभ्यः" इति सूत्रानुसारेण कार्यकारणयोर-भेदद्योतनाय इत्याहुः। अस्माकमप्ययं विग्रहः सम्मत एव। आरम्भणाधिकरणन्यायेन कार्यकारणयोरभेदस्य वक्तव्यत्वात्। तथा च (सविशेष) विशिष्टनिष्ठमैक्य मित्येकः (जिज्ञासाधिकरणप्रमेयसिद्धः)
2) विशिष्टञ्च, विशिष्टञ्च विशिष्टे तयोरद्वैतमिति द्वितीयः (सूत्रारूढः)। अन्योऽपि प्रकारः वक्तुं शक्यते अद्वैतपदस्याभेद इत्यर्थवर्णनेन विग्रहः

पूर्वमुक्तः। अद्वैतपदं धर्मिपरतया व्याख्याय विशिष्टमद्वैतमेकं तत्वमित्यपि विग्रहः सुसाधः। तदित्थम् न विद्यते द्वैतं भेदः यस्येतिरीत्या अद्वैतपदस्य एकमित्यर्थ परत्वात्। एतेन न्यायसिद्धाञ्जनप्रारम्भे विशिष्टनिष्ठमैक्यमिति जिज्ञासाधि करण भाष्यानुसारेण विग्रहवर्णनं श्रीभाष्यकाराणां हृदयारूढमेव। अत एव यदुक्तं निर्विशेषमिति तत्तु सविशेषमेव (विशिष्टमेव) इत्यसकृत् श्रीभाष्यकारैरनु गृहीतम्, इति।

3) अन्यः प्रकारः
द्वयोर्भावः द्विता, द्वितैव द्वैतं, न द्वैतम् – अद्वैतम्, विशिष्टस्य अद्वैतं विशिष्टाद्वैत मिति व्युत्पत्या, चिदचिच्छरीरक ब्रह्मणः अभेद इति विशिष्टाद्वैतपदस्यार्थः सजातीयद्वैता भाववदित्यर्थः। द्विधा ईतं द्वीतं तस्य भावो द्वैतम्। तदुक्तम् बृहदारण्यकवार्तिके सुरेश्वराचार्यैः "द्विधेतं द्वीतमित्याहुस्तदभावोद्वैतमुच्यते" इति। न विद्यते द्वैतं द्विधाभावो यत्र तदद्वैतम्। विशिष्टस्य अद्वैतं विशिष्टाद्वैतम्। इति।

**विशिष्टाद्वैतमते पदार्थः**

विशिष्टाद्वैतमते पदार्थानां द्वेधा द्वेधा विभजनम् इत्यस्ति कश्चित् विशेषः। यथा पदार्थः द्विविधः। प्रमाणं, प्रमेयश्चेति। प्रमाणं द्विविधम्। प्रत्यक्षमप्रत्यक्षमिति। अप्रत्यक्षम् द्विविधम्। अनुमानं, शब्द इति। प्रमेयं द्विविधं द्रव्यमद्रव्यमिति। द्रव्यमुभयम्। जडमजडमिति। जडमुभयम्। प्रकृतिः काल इति। कालो द्विविधः भूताऽभूत इति। अभूतो द्विविधः भविष्यत्, वर्तमान इति। प्रकृतिः द्विविधा। शरीरगता, अशरीरगता इति। शरीरगता द्विविधा- इन्द्रियगतम्, अनिन्द्रियगतम् इति। इन्द्रियं द्विविधम्। ज्ञानेन्द्रियं कर्मेन्द्रियमिति। ज्ञानेन्द्रियं द्विविधम्। अहंकारो मन इति।

अशरीरगता द्विविधा। भूतात्मकमभूतात्मकमिति। भूतात्मकं द्विविधं। तन्मात्रं, महाभूत इति। अभूतात्मको द्विविधः। प्रकृतिः, महदिति। अजडं द्विविधम्। पराक् प्रत्यगिति। पराक् द्विविधम्। नित्यविभूतिः, धर्मभूतज्ञानम् इति। प्रत्यक् द्विविधः। जीवः ईश्वर इति। जीवो द्विविधः। बद्धो2बद्धश्चेति। अबद्धो द्विविधः। मुक्तः नित्य इति। बद्धो द्विविधः बुभुक्षुः मुमुक्षुरिति। बुभुक्षुः द्विविधो अर्थकामपरः धर्मकामपरश्चेति। धर्मकामपरो द्विविधः। देवतान्तरपरः भगवत्परश्चेति। मुमुक्षुः द्विविधः कैवल्यपरः मोक्षपरश्चेति। मोक्षपरो द्विविधः भक्तिः प्रपन्नश्चेति। प्रपन्नो द्विविधः एकान्ती, परमैकान्तीति। परमैकान्तो द्विविधः दृप्तः आर्तश्चेति।

ईश्वरः लक्ष्मीनारायणाख्यं मिथुनम्। स द्विविधः परोऽपर इति। अपरो द्विविधः अवतार, आविर्भाव इति। अवतारो द्विविधः व्यूहो, विभव इति। व्यूहो द्विविधः केशवादि वासुदेवादि, आविर्भावो द्विविधः अन्तर्यामी अर्चेति। अर्चा द्विविधा पाञ्चरात्रिका वैखानसेति।

अद्रव्यं द्विविधं गुणक्रियाविभागेन। गुणोद्विविधः सत्वमसत्वमिति। असत्वं द्विविधं रजस्तम इति। क्रिया द्विविधा शरीरनिष्ठा इन्द्रियनिष्ठा इति। शरीरनिष्ठा द्विविधा संयोगः हानिरिति। इन्द्रियनिष्ठा द्विविधा सालम्बना, निरालम्बना चेति। सालम्बना द्विविधा स्पर्शरसेति। निरालम्बना द्विविधा शब्दगन्धेति।

**श्रीभाष्यम्**

श्रीविशिष्टाद्वैतमतप्रवर्तकाचार्य - श्रीभगवद्रामानुजाचार्यविरचितब्रह्मसूत्रभाष्यं श्रीभाष्यम् इतिप्रथामश्नुते। अस्य च गाम्भीर्यमनुभववेद्यं नात्र वक्तव्यं विशिष्य आहुश्चश्रीवेङ्कटनाथदेशिका अधिकरणसारावल्याम्।

"गम्भीरे ब्रह्मभागे गणयितुमखिलं कः प्रवीणः प्रमेयं

दिङ् मात्रं दर्शयन्तं अहमिह निपुणैः प्राध्वमध्यक्षणीयः।
माभून्निः शेषसिद्धिः तदपि गुणविदः स्फीतनिस्सीमरत्ने
मध्ये हारं निधेयं महति जहतिकिं मौक्तिकं लब्धमब्धौ।।"

इति तत्वहितपुरुषार्थविषयकज्ञानसम्पदिह श्रीशब्दांभिप्रेता। तत्सम्पातकत्वादिदं भाष्यं श्रीभाष्यमित्याख्यायते। तत्राद्याध्यायद्विकेन अशेषचिदचिच्छरीरक ब्रह्मरूपतत्वस्य, तृतीयेनाध्यायेन भक्तिप्रपत्यात्मक हितस्य, चतुर्थेन पुरुषार्थस्य च, प्रतिपादनात् श्रीभाष्यनाम भवत्यन्वर्थम्।

अथवा "ऋचस्सामानियजूंषि। सा हि श्रीरमृतासताम्" इति श्रुत्या ऋग्यजुस्सामरूपवेदत्रयं श्रीशब्दार्थः। तदनुगुणत्वादिदं भाष्यं श्रीभाष्यमित्युच्यते। यद्वा श्रीतत्वसिद्धाञ्जनदेशिकसिद्धान्तरहस्यादिप्रबन्ध प्रणेतारः शारीरकभाष्यं कृत्स्नमपि भगवन्तमिव लक्ष्मीमपि प्रतिपादयतीति सविस्तरं न्यरूपयत्। तदनुसारेतु श्रियः प्रतिपादकत्वादिदं भाष्यं श्रीभाष्यसमाख्यां भजते इत्यपि शक्यं प्रतिपत्तुम्। यद्वा श्रीः लक्ष्मी तत्प्रसादनिर्वृत्तं भाष्यं श्रीभाष्यम्। सर्वस्य कार्यस्य सिद्धौ विशिष्य च विद्यायाः, लक्ष्मीप्रसादः कारणमिति हि एतेषां मतम्। उक्तं हि श्रीवत्सचिह्नमिश्रैः –
श्रीस्तवे[1]

ऐश्वर्यं यदशेषपुंसि यदिदं सौवर्ण्यलावण्ययोः
रूपं यच्च हि मङ्गलं किमपि यल्लोके सदित्युच्यते।
तत्सर्वं त्वदधीनमेव यदतः श्रीरित्यभेदेन वा
यद्वा श्रीमदितीदृशेन वचसा देवि प्रथामश्नुते।।

इति "श्रीदेशिकरणैश्च सर्वार्थसिद्धौ यज्ञविद्येत्यादिना सर्वविद्यानां तादधीन्योक्त्या

[1] श्लो -18

सा ख्याप्येति लक्ष्मीरादौ कीर्त्यत" इति।

**4) ब्रह्मविद्या तत्प्रवर्तनं च**

नानाशब्दादिभेदात् (3-3-56) अत्रेदं भाष्यम् ब्रह्मविद्याः सर्वाः ब्रह्मप्राप्तिरूप मोक्षैकफलाः। सद्विद्या, दहरविद्या, अक्षरविद्यादिकाः एकशाखागताः, शाखान्तरगताश्चेति। तदुत्तरसूत्रेण "विकल्पोऽविशिष्टफलत्वात्" (3-3-57) इत्यनेन सूत्रेण आसां विद्यानां विकल्पश्च प्रत्यपादि। अतस्तुल्यफलकत्वमेव सर्वब्रह्मविद्यानामिति च निरणायि।

अत्र श्रुतप्रकाशिका – भाष्यस्याक्षरविद्यादिकामिति आदिपदेन न्यासविद्या विवक्षिता। सूत्रेऽपि शब्दादिभेदसद्भावात् इति । अयं भावः "उपासीत निदिध्यासितव्यः" इत्यादिषु सर्वपदानां एकार्थकत्वमेवेति शब्दभेदः नस्वरसतः सम्भवति। न्यासविद्यायाश्चाप्रयाणादुनुवर्तनाभावात् शब्दभेदः मुख्यो भविष्यति इति। अनेन न्यासविद्या (प्रपत्तिः) सूत्रभाष्यारूढेति च बोध्यम्। अत्र एवादावेव "विनतविविधभूतव्रातरक्षैकदीक्षे" इति मङ्गलश्लोकव्याख्यायां श्रीश्रुतप्रकाशिकायार्यैः" विशेषेणनताः प्रह्वीभूताः विनताः। न्यासोपासनात्मकाशेषविद्याविशेषनिष्ठाः सर्वे विवक्षिता" इति व्याख्यातम्। किञ्च ब्रह्मविद्या उपनिषत्सु निगूढा वर्तते। मिथो विरुद्धवदवभासमानाः भेदाभेदघटकश्रुतयः।

यथा भेदश्रुतयः "पृथगात्मानं प्रेरितारं च मत्वा[1]" "नित्योनित्यानां चेतनश्चेत नानाम्[2]" "द्वा सुपर्णा सयुजा सरवाया समानं वृक्षं परिषस्वजाते। तयोरन्यः पिप्पलं

---

[1] श्वे.3-1-6

[2] क.उ.5-3

स्वाद्वति अनश्नन्नन्यो अभिचाकशीति[1]।

यथा अभेद श्रुतयः "नेह नानास्ति किञ्चन[2]" "तत्वमसि[3]" "सदेव सौम्येदमेवाग्र आसीत्" "एकमेवाद्वितीयं ब्रह्म[4]"।

यथा घटकश्रुतयः "अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा[5]" "य आत्मनि तिष्ठन्नात्मनोऽन्तरोऽयमात्मा न वेद यस्यात्मा शरीरं आत्मानमन्तरो यमयति सत आत्मान्तर्याम्यमृत[6]" योऽक्षरमन्तरो संचरन् यस्याक्षरं शरीरं यमक्षरं न वेद एष सर्वभूतान्तरात्मा2पहतपाप्मा दिव्यो-देव-एको नारायणः इति[7]।

काशकृत्स्न-औडुलोमिप्रभृतयः स्वस्वाभिमतरीत्या वेदान्तार्थान् उपदिष्टवन्तो बभूवुः। भेदाभेदघटकश्रुतिसंम्पुटित तात्पर्यनिर्णयौपयिकन्यायनिबन्धन रूपाणि सूत्राणि भगवता व्यासमहर्षिणा प्रणीतानि। तेषां च सूत्राणां सूचनमात्रविश्रान्तानां संक्षिप्तानां मन्दमतिव्यामोहप्रशमनासमर्थानां तात्पर्यं भगवद्बोधायनमहर्षिप्रणीतलक्षग्रन्थात्मिकया वृत्या विवृतमास्ते।

यथा भगवता बादरायणेन इदमर्थान्येवसूत्राणि प्रणीतानि। विवृतानि च तानि गम्भीरन्यायसागरभाषिणा भगवता श्रीवत्साङ्कमिश्रेणापि। तथाप्याचार्यटङ्क भर्तृप्रपञ्च

---

[1] मु.उ.3-1-1

[2] कठो.3-4-10-11

[3] छा.3-6-2-1

[4] छा. 3-6-2-1

[5] तै.आ.3-11-21

[6] सु.उ.5-7-7

[7] सुब्रा.उ.7

भर्तृमित्र भर्तृहरिब्रह्मदत्त-शंकरभास्करादि विरचितसितासितविविधनिबन्धनश्रद्धा विप्रलब्धः बुद्धयः इति। भगवद्यामुनमुनिविरचितात्मसिद्धिग्रन्थगता सूक्तिः ब्रह्मविद्या प्रवर्तकानां नामनिर्देशने मूलं भवति।

**ब्रह्मशब्दार्थविचारः**

पूर्वमीमांसायां देवताकाण्डे अन्ते हरौ तद्दर्शनात् सविष्णुराह हि, तं ब्रह्मेत्याचक्षते, तं ब्रह्मेत्याचक्षते, इति ब्रह्मशब्दघटिततया शास्त्रमुपसंहृतम्। अत एव भगवान् व्यासार्यः कर्मविचारानन्तरं ब्रह्मविचारः कर्तव्य इत्याशयेन "अथातो ब्रह्मजिज्ञासा" इत्येव ब्रह्मकाण्डसूत्राणि प्रारम्भयत्। अत्र ब्रह्मशब्दः बृह, बृहिवृद्धौ, इति धातुभ्यां निष्पन्नो यौगिकः। तदित्थं बृंहे नौऽच्च, इत्युणादिसूत्रेण बृहिधातोः इदित्वान्नुमागमे, तस्याकारदेशे, ततो यणादेशे चकारात् कर्तरि मनिन् प्रत्यये च ब्रह्मेति रूपसिद्धिः। अस्य सूत्रस्य उपलक्षणत्वात् बृहधातोरपि मनिन् प्रत्यये उपधाया अकारदेशे च एवमेव रूपं सिद्धयति। अत एव बृहत्वात् बृहंणत्वाच्च तद्ब्रह्मेत्यभिधीयते इत्युक्तिस्सङ्गच्छते। अत्र श्रीमच्छ्रीभाष्यम् एवं वर्तते –

"[1]सर्वत्र बृहत्वगुणयोगेन हि ब्रह्मशब्दः। बृहत्वञ्च स्वरूपेणगुणैश्च यत्रानवधिकातिशयं सो2स्य मुख्योऽर्थः। स च सर्वेश्वर एव। अतोब्रह्मशब्दः तत्रैव मुख्यवृत्तः। तस्मादन्यत्र तद्गुणलेशयोगात् औपचारिकः। अनेकार्थ शक्ति कल्पनायाः अयोगात्। भगवच्छब्दवत्" इति। अतो ब्रह्मशब्दः यौगिक एव न तु योगरूढः इति।

श्रीविशिष्टस्यैव ब्रह्मपदवाच्यत्वमिति बृहत्वं व्यासज्यवृत्ति। आदावेव भगवद्भाष्यकाराः बह्मणि श्रीनिवासे इत्यनेनेममर्थमसूसुचन्। ब्रह्मशब्दः शब्दस्वभावात् अर्थसामर्थ्याच्च पुरुषोत्तमपरः। तत्र शब्दसामर्थ्यं नाम बृहति बृंहयति तस्मादुच्यते परं

[1] श्री भाअ.जि.

ब्रह्म। बृहत्वं नाम विभुत्वम्। बृंहणत्वं नाम चेतनस्य सकलज्ञानसंकोचनिवृत्तिपूर्वकं ज्ञानविकासहेतुत्वम्। बृंहणत्वं वृद्धिहेतुत्वं वृद्धिश्च धर्मभूतज्ञानस्य, न तु चेतनस्वरूपस्य। अतः श्रीभाष्ये तु "सर्वत्र बृहत्वयोगेन हि ब्रह्मशब्दः" इति भाषितम्।

यत् स्वरूपतो गुणतश्च अनवधिकातिशयबृहत् तत् ब्रह्म। तादृशानवधिकातिशय बृहत्वं ब्रह्मशब्दप्रवृत्तिनिमित्तम्। स्वरूपगतउत्कर्षः बृहत्वम्। गुणद्वारा उत्कर्षः ब्रह्मणत्वम्। अतः साक्षात् परम्परया चेति असङ्कोचेननिरतिशयोत्कर्ष विशिष्टमिति ब्रह्मशब्दार्थः।

यदि ब्रह्म बृहत्वमात्रगुणयोगी इति योगार्थ इष्येत तदा घटपटादावपि बृहत्वमत्वात् बृहत्वपदस्येव ब्रह्मपदस्यापि अविशेषेण प्रयोगः स्यात्। यत्र यत्र ब्रह्मशब्दः सर्वतावन्मात्रानुगतं प्रवृत्तिनिमित्तंच न लभ्यते। अतश्च योगरूढ्या स्वरूपेण गुणैश्च अनवधिकातिशयबृहत्वं पुरुषोत्तम एव भवतीति।

ननु "बृहति ब्रह्मयति तस्मादुच्यतेपरं ब्रह्म" बृहत्वात्, ब्रह्मणत्वाच्च तद्ब्रह्मेत्यभिधीयते इति श्रुतिस्मृतिभ्यां बृहत्वे ब्रह्मणत्वे च प्रवृत्तिनिमित्ततयाऽवगते (कथमिह त्वं) बृहत्वमात्रं निमित्तमुच्यतेगुणतो बृहत्वे ब्रह्मणत्वस्यान्तर्गतत्वात् इति ब्रूमः। बृहतीति बर्हतीति वा ग्राह्यम्। बृह बृहि बृद्धौ इत्येव धातुपाठात्। स चानन्त्याय कल्पते इत्यादि श्रुति प्रसिद्धसकलसंकोच निवृत्तिपूर्वक निरवधिकज्ञानविकास रूपानन्त्यावहत्वं हि ब्रह्मणत्वम्। तद्धि सकलहेयप्रत्यनीकत्व क्षान्तिकारुण्यादि मोक्षप्रदत्वौपयिकगुणगणवत्वम् इति। अत एव हि "स्वभावतो निरस्तनिखिलदोषः" इत्यादिकं प्रतिज्ञावाक्ये2भिहितम्।

ननु स्वरूपतो बृहत्वमेव निमित्तमस्तु किं गुणैरितिचेत् न ब्रह्मगुणादेरपि स्वरूपेण बृहत्वात् ब्रह्मशब्दवाच्यत्वप्रसंगात्।

तर्हि गुणतो बृहत्वमेवास्तु निमित्तमितिचेत् न शब्दशक्तेः असङ्कोचस्य स्वतःप्राप्तत्वात् स्वरूपेणच बृहत्वसद्भावात् "सत्यं ज्ञानमनन्तं ब्रह्म" इति हि श्रुतिः[1]। गुणतो बृहत्वं नाम सद्वारकबृहत्वं। गुणद्वारा हि तत्। अतः स्वरूपेण गुणैश्च निरतिशयबृहत्ववद्वस्तु पुरुषोत्तमो नारायण एवेति भावः।

**प्रकारान्तरमाह –**

"इदं ब्रह्म याति" "तस्मादेतद्ब्रह्म नामरुपमन्नं च जायते" इत्यादौ ब्रह्मशब्दस्य जीवप्रकृत्यादावपि प्रयोगदर्शनात् तद्व्यावृत्यर्थं ब्रह्मशब्दं विवृणोति ब्रह्मशब्देन च.....पुरुषोत्तम इति।

यस्मात् क्षरमतीतोऽहं अक्षरादपिचोत्तमः।
अतो2स्मिलोके वेदे च प्रथितः पुरुषोत्तमः[2]।।

इति भगवतैव स्वस्मिन् पुरुषोत्तमत्वस्य गीतत्वात् पुरुषोत्तमोऽभिधीयत इत्यर्थः। स्वभावतः इत्येतत् विशेषणद्वयस्यापि समानम्। निरस्ता निखिला दोषा येनेति स्वाश्रितज्ञान संकोचलक्षणदोषनिरासकत्वं तदर्थः। ज्ञानविकासलक्षणानन्त्यहेतुत्वं फलितार्थः। ततश्च ब्रह्मणत्वं भवति। अनवधिकाशय इत्यनेन गुणतो बृहत्वमुक्तम्। विभुत्वस्यापि गुणान्तर्भावात् स्वरूपतो बृहत्वमप्यर्थादुक्तं भवति। एवं च बृहत्व ब्रह्मणत्वे ब्रह्मशब्दस्य प्रवृत्ति निमित्ते दर्शिते भवतः।

"तेजोबलैश्वर्यमहावबोधसुवीर्यशक्त्यादि गुणैकराशिः।
परः पराणां सकला नयत्र क्लेशादयः सन्ति परावरेशे"[3]।।

---

[1] ते.उ. 2

[2] भजी. 18-4

[3] विपु.. 3-6

इति भगवता पराशरेण पुरुषोत्तम एव निर्दोषत्व कल्याणगुणाकरत्वयोराम्नानात् तस्यैव ब्रह्मत्वमिति भावः। यद्यपि बृह्मणत्वमपि गुणतो बृहत्वेऽन्तर्भवति, तथापि "बृहत्वात् बृह्मणत्वाच्च" इत्यादिस्मृत्यनुसरात् आदरातिशयद्योतनाय गोबलीवर्दन्यायेन पृथगुक्तमिति द्रष्टव्यम्। बृहते र्धातोर्मनिन्प्रत्यये निष्पन्नस्य ब्रह्मशब्दस्य बृहत्वं यौगिकार्थः।

**दृष्टान्त उच्यते –**

लोके हि समर्थः इत्युक्ते प्रकरणोपपदादिसंकोचकाभावे सर्वसामर्थ्यं प्रतीयते। एवमिहाप्यसंकोचस्य स्वतः प्राप्तत्वात् प्रकरणोपपदादिसंकोचकाभावादसंकोचेन सर्वविधं बृहत्वं प्रतीयते। अतो प्रवृत्तिनिमित्त पौष्कल्यात् पुरुषोत्तमएव ब्रह्मशब्दस्य मुख्यार्थः, व्यापिबृहत्वस्यात्यागे ब्रह्मशब्दगतबृहत्वशक्तेरसंकोचात्। मुख्यत्वं च शीघ्रप्रतीतिकत्वम्। मुखमिव प्रादुर्भवतीति हि मुख्यशब्दव्युत्पत्तिः। उक्तं च श्रीमति गारुडे पुराणे –

वेदे भूरिप्रयोगाच्च गुणयोगाच्च शार्ङ्गिणि।
तस्मिन्नेव ब्रह्मशब्दो मुख्यवृत्तो महामुने[1]।।

इत्यारभ्य –

यस्मिन्प्रयुज्यमाने तु गुणयोगः सुपुष्कलः।
तत्रैव मुख्यवृत्तोऽयं अन्यत्रह्युपचारतः[2]।। इति ।

गारुडपुराणवचनेन परब्रह्मण्येव बृहत्व ब्रह्मणत्वयोः पुष्कलत्वात् ब्रह्मशब्दः परब्रह्मण्येव मुख्यवृत्तिः इति।

[1] गा.पु. 2-6

[2] गापु.. 3-3

अत एव जन्माद्यधिकरणे उपलक्ष्यं हि अनवधिकातिशय बृहत् बृंहणञ्चेति, बृहत्वं बृंहणत्वे ब्रह्मशब्द प्रवृत्तिनिमित्ते इति वक्ष्यति। ईदृशस्य स्वरूपतो गुणतश्च बृहत्वस्य परब्रह्मण्येव पुष्कलत्वात् ब्रह्म शब्दमुख्यार्थः इत्युक्तम्।

केचित्तु एवं वदन्ति बृहत्वमात्रं न ब्रह्मशब्दप्रवृत्तिनिमित्तम्, अपितु निरतिशय बृहत्वम्। तत्तश्च जीवादिकेषु प्रवृत्ति निमित्ताभावात् माणवके सिंहशब्दवत् तेषु ब्रह्मशब्दो गौणमिति।

अत्रान्तरत्वाधिकरणभाष्यम् – ब्रह्मशब्दस्य परमात्मासाधारणत्वेऽपि प्रत्यगात्मन्यपि कदाचिदौपचरित प्रयोगदर्शनात् तद्व्यावृत्या परमात्मप्रतिपत्तये - "यत् साक्षात् ब्रह्म इति विशेषणं क्रियत इति"। एतेन परं ब्रह्म इत्यादि शब्दाः अपि व्याख्याताः।

**अयमत्र सिद्धान्तः –**

विष्णुशब्दस्य व्यापकत्वं हि प्रवृत्तिनिमित्तम्। तस्यातिप्रसक्तत्वात् रूढिं स्वीकृत्य नारायण एव प्रयोगः उपपद्यते। अतः योगरूढोऽयं शब्दः। योगार्थ सहकृत रूढ्यर्थस्वीकारात्। तथा स्वरूपतो गुणतश्च बृहत्वरूप प्रवृत्तिनिमित्तं कुत्रापि न सम्भवतीति यौगिकपक्ष एव श्रीभाष्यकाराणामभिमतः इति बोध्यम्।

तर्हि आद्यमङ्गलश्लोके ब्रह्मणि श्रीनिवासे इत्यत्र "श्रीनिवासे[1]" इति विशेषणं किमर्थमिति चेत् पूर्वोक्तरीत्या ब्रह्मशब्दस्यौपचारिकार्थमादाय दोषापादन करणे विवृतं कृतम्।

एवं रीत्या मुख्यवृत्या परब्रह्मणि, उपचारवृत्या प्रकृत्यादिषु ब्रह्मशब्दप्रयोगः सम्भवति सति प्रकृत्यादिषु मुख्यवृत्तिस्वीकारः नोचितः। तदभिप्रायेणैव अनेकार्थ

---

[1] श्री भा-1

कल्पनायोगादिति श्रीभाष्यम्। श्रीविष्णुपुराणे वासुदेव एव भगवच्छब्दस्य मुख्यवृत्तत्वम्, अन्यत्रौपचारिकत्वं च समर्थितम्। तद्वत् अत्राऽपि ब्रह्मशब्दविषयेऽपि तन्न्यायोऽनुसन्धेयः, इत्याशायेन भगवच्छब्दवदिति भाषितम्। तदेवं शब्दसामर्थ्यात् ब्रह्मशब्दःपुरुषोत्तमपरः। अर्थसामर्थ्यमपि तापत्रयातुरैरमृतत्वाय स एव जिज्ञास्यः इति श्रीभाष्येऽभिहितम्। मोक्षरूपफलमुद्दिश्य ब्रह्मजिज्ञासा प्रस्तूयते। पुरुषोत्तमव्यतिरिक्तस्य मोक्षप्रदत्वायोगात् अयोगरूपार्थ सामर्थ्यात् ब्रह्मजिज्ञासा सूत्रविवक्षितं ब्रह्म पुरुषोत्तम एव इति "तमेवं विद्वान् अमृत इह भवति" इति श्रुतिरिहानुसन्धेया।

**शाङ्करपक्षे –**

जगतो मिथ्यात्वाभ्युपगमात् – तत्रास्तीत्येव सिद्धम्। ब्रह्मणोऽपि निर्विशेषत्वा भ्युपगमात् – ब्रह्मास्तीत्युक्तौ अस्तित्वरूपविशेषवत्त्वप्रसङ्गभिया तथाकथनासंभवे – तदपि नास्तीत्येव सिद्धम्। एवंनिर्गुणत्वेनाभ्युपगतस्य ब्रह्मणस्तदनुभवितुर्मुक्तस्य चावाङ्गनसगोचरानवधिकातिशयानन्दवत्त्वं श्रुतिभिर्जोघुष्यमाणं कथमुपपद्येत? न खलु पाषाणस्य केवलस्य तदनुभवितुर्वाऽवाङ्गनसगोचरानवधिकातिशयानन्दवत्त्वं सुमन्दधियापि केनचित्सुवचम् – तस्माच्छाकरा वेदवादच्छद्मप्रच्छन्नं बौद्धभावं दुरपह्नवमेव भजन्त इति विवेकिभिः सर्वैः सुगमम्।

**भास्करपक्षे –**

जगतः सत्यत्वाभ्युपगमेऽप्यचिदात्मनोर्द्वयोरेव तत्त्वयोरभ्युपगमादात्मनोऽच्छेद्य-वस्तुत्वाच्चोपाधिभेदेऽपि सर्वत्रावस्थितस्यात्मन एकत्वेन सकलसंसारिजीवात्मानुभूय मानाध्यात्मिकादितापत्रयादिलक्षणसर्वदोषाकरत्वस्य ब्रह्मण्येव प्रसङ्गात् – निरस्तनिखिलदोषत्वसमस्तकल्याणगुणाकरत्वयोर्ब्रह्मणि सर्वत्र श्रुतिस्मृतिभिर्जोघुष्य माणयोरनुपपत्त्या सर्वशास्त्रविरोधोऽपि दुर्वारः। किंच – शरीरलक्षणोपाध्यवच्छिन्नब्रह्मण

एव जीवात्मरूपत्वस्वीकारात् – ब्रह्मणो विभुत्वेन गमनागमनाभावात् – शरीरसंसर्गविमोकयोरेव बन्धमोक्षरूपत्वाच्च शरीरगमनागमनदशायां प्रतिक्षणं बन्धमोक्षप्रसङ्गोऽपि दुर्वारः। अपिच – आत्मभेदानङ्गीकारेण बद्धमुक्तविभागा संभवात्मुक्तस्यैव पुनःपुनर्बद्धत्वसंभवाच्च मुक्तस्य पुनरावृत्त्यभावशास्त्र विरोधोऽपि दुर्वारः। एवमितस्ततः शरीरापगमदशायां घटाद्यपगमदशायामाकाशस्य पूर्वदेशावच्छेदेन तत्संयोगविमोकवच्छरीरसंयोगविमोकसंभवान्मोक्षः सुगमोवेति तदर्थं ब्रह्मविद्याद्यनुष्ठाना नावश्यकत्वेन तद्विधायकवेदान्तशास्त्राद्यानर्थक्यप्रसङ्गोऽपि दुर्वार एव। तस्माद्भास्कर पक्षोऽप्यनुपपन्न एव।

**यादवपक्षे –**

ब्रह्मण एकस्यैव चिदचिल्लक्षणसर्वजगद्रूपेण परिणामाङ्गीकारात्सविकारत्व सकलहेयदोषाकरत्वयोर्ब्रह्मण्येव स्वीकाराच्च – ब्रह्मणो निर्विकारत्वनिरस्तनिखिल दोषत्वसमस्तकल्याणगुणाकरत्वादिप्रतिपादकसर्वशास्त्रविरोधेनेतो जघन्यो न कश्चित्पक्षः।।

किंच – प्रतिकल्पं ब्रह्मणैव संकल्पपूर्वकं बहुभवनस्वीकारस्य श्रुतिसिद्धत्वाद्बहु भवनदशायां सकलदुःखाकरत्वस्य ब्रह्मण्येव संभवाच्च ब्रह्मणः सर्वलोकसर्वशास्त्रविरुद्ध स्वानर्थैकप्रवृत्तिस्वीकारप्रसङ्गो हि दुरपह्नव एव पक्षत्रयेऽपि। नहि कश्चित्सुमन्दमतिरपि स्वमस्तक एव महाप्रस्तरप्रपतनप्रसङ्गानुकूलं व्यापारं कुर्यात्। एवं प्रतिकल्पं सृष्टिदशायां बन्धस्य महाप्रलयदशायां मुक्तेश्च स्वत एव संभवात्मोक्षार्थं ब्रह्मविद्याध्ययनादि विधाननैरर्थक्यप्रसङ्गः पक्षत्रयेऽपि तुल्ययोगक्षेम एव। अत्र केचित्स्वमतस्वरूपयाथात्म्य ज्ञानविधुराः पूर्वोत्तरमीमांसयोरैकशास्त्र्यं नास्ति – किंतु भिन्नशास्त्रत्वमेवेति वदन्ति। तत्त्वविवेकविलसितमेव – शास्तीति शास्त्रमिति व्युत्पन्नस्य शास्त्रशब्दस्य

शासनज्ञापकत्वप्रवृत्तिनिमित्तकत्वात् – शासनस्येशेशितव्यरूपचेतनयोर्द्वयोरीशचेतन कर्तृकेशितव्यचेतनकर्मकनियमनरूपत्वात् – एतन्मते चेशेशितव्यरूपचेतनद्वयस्यैवानङ्गी कारेण शास्त्रशब्दार्थस्यैव गगनकुसुमायमानत्वाच्च शास्त्रशब्दार्थसद्भावमङ्गीकृत्य तत्र द्वयोरैकशास्त्र्यप्रतिषेधपूर्वकं भिन्नशास्त्रत्वकथनस्यातिमुग्धजल्पितत्वात्। प्रपञ्चसत्यत्व स्वतः सिद्धजीवेश्वरभेदवाद्यास्तिकमतेतु शास्त्रप्रसिद्धिरैकशास्त्र्यं च सर्वं सुनिरूपम्। अक्षरराशिरूपशास्त्रस्य स्वरूपत एकत्वासंभवात्साक्षात्परंपरया वैकपरमफलोद्देश्यक-प्रवृत्तिजनकशास्त्रत्वस्य वैकग्रन्थव्याख्यानरूपत्वस्य वैकशास्त्रत्वरूपताया वक्तव्यत्वात् – सर्वकर्मणां तत्तदवान्तरफलाभिसन्धित्यागपूर्वकमनुष्ठितानां ज्ञानजनकतायाः, ज्ञानस्य मोक्षजनकतायाश्च शास्त्रेणैव सिद्धत्वात् – कर्मपरपूर्व्मीमांसाशास्त्रस्य परविद्यापरोत्तरतमीमांसाशास्त्रस्य च साक्षात्परम्परया मोक्षरूपैकपरमफलजनकतायाः संभवाद्वेदरूपैकशास्त्रव्याख्यानरूपत्वाच्च तयोर्द्वयोः शास्त्रयोरेकशास्त्रत्वं सुगममेव ह्यास्तिकमते। तदिदं स्पष्टमेव निरूपितं श्रीभाष्यश्रुतप्रशिकयोः। तस्मादास्तिका भासकल्पितमुक्तमतत्रयमसमञ्जसमेव।

भगवद्रामानुजमुनयस्तूक्तपक्षत्रये दर्शितानुपपत्तिप्रभृतिपरः सहस्रानुपपत्तिजालं शारीरकमीमांसातात्पर्यं बोधायनादिमहर्षिप्रदर्शितसरण्या यथावदवधार्य प्रागुक्तशंकरादि पक्षनिरसनपूर्वकं यथावस्थितवेदान्तशास्त्रतात्पर्यगर्भान् वेदार्थसङ्ग्रह-वेदान्तसार-श्रीभाष्य-वेदान्तदीप-गीताभाष्यादिग्रन्थांश्चक्रुः।

**शंकरादयो हि** – तत्त्वमसि सर्वं खल्विदं ब्रह्मेत्यादिवेदान्तशास्त्रगतसमानाधि करणनिर्देशतात्पर्यं यथावदनवधार्य स्वोत्प्रेक्षामात्रेण जीवात्मपरमात्मनोः स्वरूपैक्यमेव ततो निश्चित्य तदनुगुणं व्याकुर्वन्त एव कृत्स्नं शारीरकमीमांसाशास्त्रं वेदान्तजालं च व्याकुलीचक्रुः।

श्रीभाष्यकृतस्तु बोधायनादिमहर्षितात्पर्यमनुसृत्य तदनुगुणमेव व्याख्यानादनुप पत्तिसम्पर्कलेखविधुरं शारीकमीमांसाशास्त्रं वेदान्तशास्त्रं च समञ्जसमेव विवव्रुः। तथाहि – सूत्रकारेण भगवता बादरायणेन – **नेतरोऽनुपपत्तेः**[1], **अनुपपत्तेस्तु न शारीरः**[2], **नच स्मार्तमतद्धर्माभिलापाच्छारीरश्**[3], **उभयेऽपि हि भेदेनैनमधीयते**[4], **विशेषणभेदव्यपदेशाभ्यां च नेतरौ**[5], **भेदव्यपदेशात्**[6], **इतरपरामर्शात्स इति चेन्नासंभवात**[7], **सुषुप्त्युत्क्रा न्त्योर्भेदेन**[8], **अधिकं तु भेदनिर्देशात्**[9], **अधिकोपदेशात्तु बादरायणस्यैव तद्दर्शनात्**[10] इत्यादिसूत्रेषु जीवात्मपरमात्मनोः स्वरूपतो भेदस्यैवासकृदनेकस्थलेषु स्पष्टं निर्देशात् – तद्विरोधेन चेतनाचेतनयोः स्वरूपाभेदस्य सुतरामेवासंभवेन च – तदनन्यत्वमारम्भण शब्दादिभ्यः इत्यधिकरणे तदभिप्रायेणैव नामरूपव्याकरणश्रुत्या स्थूलचिदचिद्विशिष्टब्रह्मण एव कार्यभूतजगद्रूपतां सूक्ष्मचिदचिद्विशिष्टब्रह्मण एवोपादानकारणतां चाभिसन्धायैव जगद्ब्रह्मणोः कार्यकारणभूतयोरनुप्रवेशनिबन्धनशरीर शरीरिभावलक्षणतादात्म्येनैवानन्यत्व समर्थनात्

---

1 ब्र.सू 1-1-7
2 ब्र.सू 1-2-3
3 ब्र.सू 1-2-20
4 ब्र.सू 1-2-21
5 ब्र.सू 1-2-23
6 ब्र.सू. 1-1-18
7 ब्र.सू 1-1-17
8 ब्र.सू. 1-1-43
9 ब्र.सू 1-1-22
10 ब्र.सू 3-4-8

– तत्त्वमसि श्वेतकेतो इति छान्दोग्यश्रुतौ[1] सन्मूलाः सोम्येमाः सदायतना सत्प्रतिष्ठा ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा इति प्रथमं कार्यकारण भावनिबन्धनशरीरात्म-भावलक्षणतादात्म्यस्यैव सामानाधिकरण्यनिर्देशबीजतां प्रदर्श्यैव – तत्त्वमसीति तत्त्वंपदयोः परमात्मजीवात्मपरयोः सामानाधिकरण्येन निर्देशात् – सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपसीत इति। छान्दोग्यश्रुतावपि – सर्वं खल्विदं ब्रह्मेति सामानाधिकरण्यनिर्देशस्य – तज्जलानित्यनेन प्रागुक्तरीत्या कार्यकारणभावनिबन्धन-शरीरशरीरिभावलक्षणतादात्म्यमूलकताया एव प्रदर्शनात् – तत्सृष्ट्वा – तदेवानुप्राविशत् – तदनुप्रविश्य – सच्च त्यच्चाभवत् इति तैत्तिरीयकोपनिषद्यपि – सच्च त्यच्चाभवदिति सामानाधिकरण्यनिर्देशस्य तत्तदनुप्रवेशमूल शरीरशरीरिभावलक्षणतादात्म्यनिबन्धनताया एव प्रदर्शनात् – प्रायशः सर्वत्रेत्थमेव – परमात्मनः जीवात्माचेतनयोश्च सामानाधिकरण्यनिर्देशानां तत्र तत्रैव शरीरशरीरि भावलक्षणतादात्म्यनिबन्धनताया एव प्रदर्शनात् – स्वरूपैक्यनिबन्धनताया दुर्वचत्वाच्च परमात्मजीवात्माचेतनानां त्रयाणामपि तत्त्वानां स्वरूपतो भिन्नत्वं तत्रापि जीवात्मना मणुत्वं च स्वाभाविकमेवानुसन्धाय तदनुगुणमेव व्याख्यानात्प्रागुक्त पक्षान्तरोक्तदोषाणां स्वपक्षे संभवस्यैवानवकाशेन तादृशदोषप्रसङ्गलेखविधुरं सुसमञ्जसमेव श्रीभाष्यादि ग्रन्थजातं भगवान् श्रीरामानुजमुनिः प्रणिनाय इति।

## उपयुक्त ग्रन्थसूची

1. श्रीभाष्यम्
2. न्यायसिद्धाञ्जनम्

[1] छा.उ 3-12-1

3. श्रीस्तवम्
4. तै उपनिषत् –
5. छान्दोग्योपनिषत्
6. गरुडपुराणम्
7. विष्णुपुराणम्
8. भगवद्गीता
9. अधिकरणसारावली
10. कठोपनिषत्
11. सुबालोपनिषत्
12. श्रुतप्रकाशिका

सहायकाचार्यः
परिशोधन-प्रकाशनविभागः
श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः,
तिरुपतिः

❑ ❑ ❑

# पुष्पिकायाः अध्ययनेन ग्रन्थकारस्य वंशपरिचयः

**मैत्रेयी नंदकुमार मणेर**

[विषयसारः – हस्तलिखितशास्त्रम् इति विषयानुगुणं मातृकाणां स्वाध्यायनम् आरभामहे तर्हि नैकाः समस्याः उद्भवन्ति। मातृकाणां प्राप्तिः, तासामुपलब्धता, वाचनाय सुलभता असुलभता, लिपिज्ञानं, लेखकस्य ग्रन्थकारस्य च सूचनाः आदि विषयाः स्पष्टाः चेत् मातृकाणां वाचनम् अध्ययनं च सौकर्याय भवति। अतः मातृकायाः पुष्पिका समुपलब्धा तर्हि मातृकायाः प्राथमिकस्तरे सम्यक् संसूचनाः लब्धुं शक्यते। कस्मिन् काले हस्तलेखस्य लेखनं पूर्णं, मातृकायाः विषयः, ग्रन्थस्य नाम किम्, कः विषयवस्तुः, मातृकालेखनस्य उद्देश्यानि आदि विषयाः प्राथमिकस्तरे अध्ययनीयाः। तदर्थं केवलं पुष्पिकाः एव सहाय्यीभूताः। अतः तासामध्ययनम् अतीव आवश्यकम्। अस्मिन् लेखे मातृकाणां पुष्पिकायाः अध्ययनेन ग्रन्थकारस्य वंशविषये परिचयःकृतः। ऐतिहासिकदृष्ट्या ग्रन्थकारस्य अयं परिचयः महत्त्वपूर्णः। अतः वंशविषये मूलानि कथम् अन्वेष्टव्यानि ? तस्य प्रविधिः संदर्शितः अस्मिन् लेखे।]

**शब्दसूची –**
मातृका – मातृकाध्ययनम् – लिपिः – लिपिप्रकाराः - लिपिपरिचयः – ग्रन्थविश्लेषणसूची – मातृकाविवरणम् – पुष्पिका – पुष्पिकाविवरणम् – ग्रन्थकारस्य परिचयः – ग्रन्थकारस्य वंशवृक्षः – ग्रन्थकारस्य वंशनिर्धारणम् – ऐतिहासिकानि प्रमाणानि।

मातृ + “इवे प्रतिकृतौ ” ५.३.९६ इति सूत्रेण कन् - टाप् प्रत्ययेन मातृकाशब्द सिद्ध्यते। मातृका इत्युक्ते वर्णमाला। इति मेदिनी। लेखनम् इति

नपुसकलिङ्गशब्दस्य अक्षरविन्यासः इति अर्थः मेदिनीकारः[1] वदति। Writing, painting, scratching & transcribing[2] – इत्यर्थाः वि.एस् आपटे Sanskrit to English कोशे तथा मोनिअर.विल्यमस् Sanskrit to English कोशे लेखन n. the leaf of the palm tree or लेखन n. writing down, transcribing Katha[3]। अतः विविधलेखनपटेषु लिखितानां मातृकाणाम् वैज्ञानिकदृष्ट्या अध्ययनं कृत्वा भूतकालस्य ज्ञानराशेः समृद्धता प्रकाशिता भवति। मातृकाध्ययनाय लिपिविज्ञानं, भूगोलः, इतिहासः, पुरातत्वविद्या, ज्योतिषं, भाषाशास्त्रं, साहित्यादि शास्त्राणि सहाय्यभूतानि सन्ति सर्वदा।[4] येषामध्ययनेन हस्तलेखस्य मूलं किं स्यात् इति प्रश्नस्य विविधानि उत्तराणि संशोधितानि भवन्ति। तदर्थं सर्वप्रथमं लिपिज्ञानम् अत्यावश्यकम्। तेन मातृकाध्ययनस्य प्रारम्भः भवति। लिपिज्ञानेन मातृकागतविषयस्य आकलनं सुकरं भवति। लिपिज्ञानेन हस्तलेखस्य भाषा, विषयवस्तुः, कालः, लेखनस्वरूपं, प्रयोजनादि अङ्गानि प्रकाशितानि भवन्ति। यदि लिपिः एव न ज्ञाता तर्हि मातृका केवलं दर्शनमात्रा एव।

लेखनसाधनभूता भवति लिपिः । लिपिशब्दस्य प्रयोगः महर्षिणा पाणिनिना प्रणीते व्याकरणग्रन्थे अष्टाध्यायी, 3.2.21[5] उपलभ्यते। परन्तु तत्काले देशे

---

1 https://sa.wiktionary.org/wiki/%E0%A4%AE%E0%A4%BE%E0%A4%A4%E0%A5%83%E0%A4%95%E0%A4%BE

2 Apate, V.S. , Sanskrit- English Dictionary, Gopal Narayen & co., Bombay, second edition, page434

3 Williams Monier M, A Sanskrit to English Dictionary ,Motilal Banarasi Das ,Jan. 2011, page 901

4 डॉ. सत्येन्द्र, पाण्डुलिपि विज्ञान, राजस्थान हिन्दी ग्रन्थ अकादमी, जयपूर, प्रथमसंस्करण-1978, प.स. 9

5 दिक्षितपुष्पा, अष्टाध्यायीसूत्रपाठः,ज्ञानभारतीप्रकाशन,नईदिल्ली, प्रथमसं. 200926

कतिप्रकारिकाः लिपयः आसन्, तासां नामानि कानि इत्येतेषु विषयेषु विस्तरः तत्र न कोऽपि उल्लिखितः वर्तते। कौटिल्यस्य अर्थशास्त्रे (2.1.2) अपि राजपुत्रेभ्यः पाठनीयविषयत्वेन लिपिः उल्लिख्यते। ततोऽधिकं तथ्यं तु नैव लभ्यते तत्र अपि। अशोकस्य शिलालेखेषु 'लिपिः', 'लिबि', 'दीपि' इति शब्दाः दृश्यन्ते।[1] ते सर्वे लेखनसम्बन्धं द्योतयन्ति। डॉ. सायन्त माहातो संस्कृतभारत्या प्रकाशितस्य मेमासस्य मासिके प्राचीनभारतीयाः लिपयः इति लेखे विलिखति यत् जैनसूत्रग्रन्थेषु पन्नवणासूत्रे, समवायाङ्गसूत्रे, भगवतीसूत्रे च अष्टादशानां लिपीनां नामानि प्राप्यन्ते तथा ललितविस्तरग्रन्थे ६४ लिपीनाम् उल्लेखः अस्ति।[2] तत्र द्वयोः स्थानयोः द्राविडलिपिः इति उल्लेखः अस्ति। सूक्ष्मनिरीक्षणेन अधिकांशलिपीनां गेषु पञ्चदशविभागाः कर्तुं शक्यन्ते – १.भारतस्य प्राचीनसर्वप्रचलितालिपिः, २. भारतस्य उत्तरपश्चिमभागयोः सीमिता लिपिः ३. भारते परिचिताः वैदेशिकलिपयः ४. प्रदेशानुगुणं लिपयः ५. जात्यानुगुणं लिपयः ६.साम्प्रदायिकाः लिपयः ७.चित्रलिपिः लिपयः ८.साङ्केतिक्यः लिपयः ९.उत्कीर्णाः लिपयः १०.शैलीविशिष्टाः लिपयः ११.यौगिकान्तरिकाः लिपयः १२.अनुलेखनम् १३.ग्रान्थिकशैलीविशिष्टाः लिपयः १४.गणनाशैलीविशिष्टाः लिपयः १५.काल्पनिक्य पारलौकिकाः लिपयः च।[3] तासु प्रदेशानुगुणं लिपिविभागे द्राविडलिपेः समावेशः भवति। केवलं संस्कृतभाषायां ग्रन्थानां लेखनं कर्तुं ग्रन्थलिपेः उपयोगः भवति स्म। ग्रन्थलिप्यां मातृकाणां लेखनम् अधिकतया तमिळनाडुराज्ये अभवत्। तमिललिप्यां महाप्राणाल्पप्राणौ तथा घोषाघोषौ

---

[1] माहातो सायन्त,सम्भाषणसन्देशः,संस्कृतभारती,वैशाखमासः मे 2023, प.स. 20

[2] माहातो सायन्त,सम्भाषणसन्देशः,संस्कृतभारती,वैशाखमासः मे 2023, प.स. 21

[3] माहातो सायन्त,सम्भाषणसन्देशः,संस्कृतभारती,वैशाखमासः मे 2023, प.स. 22,23

लेखनाय भिन्नानि वर्णात्मकचिह्नानि न सन्ति। किन्तु मल्यालं वर्णाः सन्ति अतः द्वयोः लिप्योः एकत्रीकरणेन मणिप्रवालशैल्यां संस्कृतग्रन्थाः लिखिताः। अतः सैव ग्रन्थलिपिः इति कथिता। ख्रैस्त त्रयोदश-चतुर्दशशतके अस्याम् अभिलेखाः उपलभ्यन्ते। तमिळनाडुतः केचन विद्वांसः केरल-कर्नाटकादि स्थलेषु निवसिताः आसन् अतः सद्यकाले तमिळनाडु-केरल-कर्नाटकस्थानेषु ग्रन्थलिपिमातृकाः प्राप्यन्ते। इति वदति -

Manuscriptology: An entrance – Grantha is originated from Tamilu cave Brahmi. A.H. Dani says that this script is result of development of square headed letters found in Gunture region in Andhrapradesh. ग्रन्थलिपेः विकासस्य चत्वारः स्तराः भवन्ति।[1] - प्राचीनग्रन्थलिपिः (५ -६ ख्रैस्ताब्धः – बदामी-पलक्कड-दशनापुर-महालिंगम्-महाबलिपुरम्-कांचीपुरम्-शिलालेखेषु), मध्यग्रन्थलिपिः (७०० – ९५० ख्रैस्ताब्धे पल्लवानां हस्तलेखाः), संक्रमणकालीना ग्रन्थलिपिः (१०-१३ ख्रैस्ताब्धः शासनराजा-उत्तमचोल-राजेन्द्रचोलनां कालः), आधुनिककालीनग्रन्थलिपिः – उदा. कुम्भकोणम् – शैवागममातृका – आधुनिकी ग्रन्थलिपिः या सुन्दराक्षरैः संगणके टङ्कयते। ग्रन्थलिप्याः अध्ययनाय एकः हस्तलेखः प्राप्तः। सः प्राप्य तस्य पुष्पिकायाः अध्ययनेन ग्रन्थकारस्य विषये मम संशोधनम् अस्मिन् लेखे प्रस्तौमि।

प. युधिष्ठिरमीमांसकमहोदयेन स्वीये 'संस्कृतव्याकरणशास्त्र का इतिहास (भागः १)' इति ग्रन्थे अष्टाध्याय्याः महाभाष्यात् प्राचीनास्ववीचीनासु विविधैः वृत्तिकारैः प्रणीतवृत्तीनामुल्लेखो विहितः। काशीनाथ वासुदेव अभ्यंकरवर्यस्य ओरिएंटल इन्स्टिट्यूट,

---

[1] S.J.Jagannatha , Manuscriptology : An Entrance , Parimal Publication, Edition – 2007, page19

वडोदरातः 1961 प्रकाशिते A Dictionary of Sanskrit Grammar पुस्तके[1] तथा प.युधिष्ठिरमीमांसकस्य 'संस्कृतव्याकरणशास्त्र का इतिहास (भागः १)' इति ग्रन्थे अप्पयदीक्षितकृतस्य सूत्रप्रकाशस्य[2] उल्लेखो वर्तते। तथा च एतस्याः वृत्तेः एका प्रतिलिपिः अडियारग्रन्थालये हस्तलिखितरूपेण उपलब्धा इत्यपि लिखितम्। तदाधारेण अडियारग्रन्थालयस्य आन्तर्जाले अन्वेषणं कृत्वा उपलब्धस्य ग्रन्थविश्लेषणसूच्याः[3] (भागः – ६) अवलोकनेन विज्ञातं यद् सूत्रप्रकाशग्रन्थस्य मातृका उपलब्धा। तस्याः मातृकायाः वृत्तिकारस्य नाम अप्पादीक्षितः। अप्पयदीक्षित इति उल्लेखः वस्तुतः दोषपूर्णः इति ग्रन्थविश्लेषणसूच्याः अवलोकनेन वाचनेन मया ज्ञातम्। सः अप्पादीक्षितः यः अप्पयदीक्षितस्य एव अष्टमवंशजो अस्ति। अडियारग्रन्थालये प्रत्यक्षः संपर्कं कृत्वा अस्मिन् विषये पृष्टे सति अस्य हस्तलेखस्य उपलब्धेः सूचना प्राप्ता। तदाधारेण मया अस्य हस्तलेखस्य समग्रा एका मूलप्रतिः प्राप्ता। अस्य ग्रन्थस्य स्वरूपान्तरमातृका अपि उपलब्धा अस्ति। कर्गजे कृष्णरक्तवर्णमसीप्रयुक्ता देवनागरीलिप्यां विद्यमानया स्वरूपान्तरमातृकया प्रमुखरूपेण 'सूत्रप्रकाश' इति पाणिनिसूत्रक्रमानुसारिवृत्तेः संरक्षणं कृतम्। इतः आरभ्य मूलमातृका (अ), स्वरूपान्तरमातृका (आ) इति संकेतेन निर्दिश्यते।

अ – मातृकायाः विवरणम् इत्थम् –

---

[1] Abhyankar , K.V.A Dictionary of Sanskrit Grammar, Oriental Institute , Baroda, First Edition,1961,p. 31

[2] मीमांसक,युधिष्ठिर, संस्कृत व्याकरणशास्त्र का इतिहास, भारतीय प्राच्यविद्या प्रतिष्ठान, अजमेर, प्रथमसंस्करण, वि.स.2020, प.स. 450

[3] Krushnamacharya V.Descriptive Catalogue of Sanskrit Manuscript in the Adyar library, Vol.VI , The Adyar Library , 1947 , pp. 40, 141

| | अ मातृका | विवरणम् |
|---|---|---|
| क्र. | ग्रन्थस्य नाम | पाणिनीय सूत्रप्रकाशः |
| 1 | ग्रन्थसूचीविश्लेषण क्रमांक | 141. 19.H.5 - पर्णसंख्या 40 |
| 2 | प्राप्तस्थानम् | अडियार राजकीय पुस्तकालयः, Adyar-TR-1147.1, .2-0001-0018 |
| 3 | रचयिता | अप्पादीक्षितः |
| 4 | ग्रन्थकारस्य कालः | प्रायः ईसवीय 1700 – मध्यकालः |
| 5 | रचयितुः स्थानम् | - |
| 6 | रचनातिथिः | - |
| 7 | लेखकः | - |
| 8 | लेखकस्य कालः स्थानञ्च | - |
| 9 | समग्रपत्रसंख्या | 155 |
| 10 | वाच्यपत्रसंख्या | 155 |
| 11 | अवाच्यपत्रसंख्या | - |
| 12 | लिपिः | ग्रन्थः |
| 13 | लिप्यासनम् | ताडपत्रम् |
| 14 | लेखनसामग्री | ताडपत्रम्, टङ्कणसूची, कृष्णामसी |
| 15 | लेखनशैली | सुवाच्या |
| 16 | मातृकायाः आकारः | 16*1.8 inches |
| 17 | पङ्क्तिसंख्या | 11 to 14 |

| | | |
|---|---|---|
| 18 | विषयः | अष्टाध्याय्याः वृत्तिः |
| 19 | प्रतिलिपेः उद्देश्यम् | प्रतिलिपिः - स्वरूपान्तरमातृका अस्ति।<br>हेतुः - मूलहस्तलेखस्य रक्षणम्। |
| 20 | लिप्यन्तरणम् | देवनागरीलिपिः |

हस्तलेखे पुष्पिकाणां समावेशः अस्ति। तेषां सूक्ष्मतया परिशीलनेन हस्तलेखस्य इतिवृत्तं ज्ञातुं शक्यते। ग्रन्थस्य नाम, ग्रन्थकारस्य नाम, लेखकः, लेखकस्य नाम, कालः, ग्रन्थस्य विषयः, रचनाहेतुः, ऐतिहासिकाः उल्लेखाः – राजा- तस्य विजयादि कारणानि – राजस्तुतिः, आराध्यदेवता, लेखकस्य ग्रन्थकारस्य वा वंशवृक्षः इत्यादि महत्वपूर्णाः विषयाः केवलं पुष्पिकाध्ययनेन ज्ञातुं शक्नुमः।

अ -पुष्पिकायां केवलं ग्रन्थकारस्य वंशवृक्षस्य विषये एव संसूचनाः प्राप्यन्ते। लेखकः, तस्य कालः, लेखकस्य वंशः इत्यादिविषयेषु न किमपि ज्ञायते। अ – पुष्पिकायाः विवरणेन ग्रन्थकारस्य नाम, तस्य वंशवृक्षः कीदृशः एतावत् विवरणम् अधोलिखितम्।

**पुष्पिकायाः विवरणम्**

| अध्यायः | पादः | (अ) | | पुष्पिकाः |
|---|---|---|---|---|
| प्रथमाध्यायः | प्रथमपादः-<br>आरम्भः | 1A | 01 | श्री गुरूभ्यो नमः।।<br>नत्वा साम्बसदाशिवमुक्त्वा बा......खट...।<br>आरच्यते पत...... |
| | प्रथमपादः- | 3B | 13 | सितसूत्रप्रका........।। |

| | | | | |
|---|---|---|---|---|
| | अन्तः | | | इति सूत्रप्रकाशेप्रथमस्याध्यायस्य प्रथमः पादः ।। श्रीशिवार्पितमस्तु ।। |
| द्वितीय अध्यायः- प्रथमपरिच्छेदः | चतुर्थपादः अन्तः | 26 B | 117 118 | इति सूत्रप्रकाशे द्वितीयस्याध्यायस्य चतुर्थः पादः ।। अध्यायश्च समाप्तः । श्रीमदभयाम्बिकागौरीमायूरनाथाभ्यां नमः । श्रीगुरूभ्यो नमः इति श्रीमद्भारद्वाजकुलजलधिश्रीकण्ठमतप्रतिष्ठापनाचार्य श्रीकण्ठावतार श्रीमदप्पयदीक्षितवंश्यस्य तत्पौत्रश्रीमत्सिंहमप्पयदीक्षितनप्तृभूतश्रीवेंकटसुब्रह्मण्यदीक्षितपौत्रस्य श्रीमद्धर्मराजवेंकटेश्वरदीक्षितपुत्रस्य विशालाक्षीगर्भसम्भवस्य श्रीमदप्पादीक्षितस्य |

| | | | | |
|---|---|---|---|---|
| | | | | श्रीमन्महादेवानुग्रहपात्रस्य श्रीगोपालकृष्णाभिधविद्वन्मकुटाधीतपातञ्जलमहातन्त्रस्य श्रीविश्वेश्वरसाग्निचित्यातिरात्रयोजितो लब्धवाक्यप्रमाणतात्पर्यस्य कृतौ पाणिनीसूत्रप्रकाशे संज्ञासमासकारक-विभक्त्यादिविधानं नाम प्रथमः परिच्छेदः। शुभमस्तु। |
| चतुर्थाध्यायः | प्रथमपादः – अन्तः | 50 B | 257 | इति पातञ्जलसूत्रप्रकाशे चतुर्थस्य प्रथमपादः। |
| पञ्चमाध्यायः | तृतीयपादः – अन्तः | 71 A | 382 | इति पाणिनीयपातञ्जलसूत्रप्रकाशे पञ्चमस्याध्यायस्य तृतीयपादः। |

| | | | | |
|---|---|---|---|---|
| अष्टमाध्यायः | चतुर्थपादः – अन्तः | 25/ 119 A | 658 | इति सूत्रप्रकाशे अष्टमस्य चतुर्थपादः ।। प्रकाशश्च संपूर्णः ।। |
| | | | 659 | संपूर्णस्य प्रकाशस्य स्फुरता हि स्वभावतः । विद्याविनयसम्पन्ने सा विशेषात् प्रसीदति ।। |
| | | | 660 | अप्पादीक्षितरचिता वृत्तिः सूत्रस्य पाणिनीयस्य। बालानां सुखदा हेतुः भूयादेषा बुधेषु कृततोषा ।। इति श्रीमद्भारद्वाजकुलजलधि श्रीमदप्पयदीक्षितानां साक्षादष्टमेन अप्पादीक्षितेन दीक्षितानां कृपावीक्षितेन निर्मिते पाणिनीयसूत्रप्रकाशे अष्टमस्याध्यायस्य चतुर्थः पादः सम्पूर्णः ।। |

1947-तमे वर्षे प्रकाशितः प. व्ही. कृष्णमाचार्यकृत अडियारग्रन्थालयस्य हस्तलिखितस्य ग्रन्थविश्लेषणसूच्याः षष्ठ्याः मालिकायाः व्याकरणविषयकग्रन्थ-विश्लेषणसूच्याः षष्ठखण्डस्य चत्वारिंशत्तमे पृष्ठे 141 अनुक्रमाङ्के सूत्रप्रकाश

इत्याख्यग्रन्थस्य सम्यक् विश्लेषणं प्रदीयते। तदधिगतसूचनानुसारेण सूत्रप्रकाश इति ग्रन्थलिप्यां ताडपत्रे हस्तलिखितग्रन्थस्य प्रथमपरिच्छेदस्य द्वितीयाध्यायस्य चतुर्थपादस्य समाप्त्यनन्तरं तथा अष्टमस्य अध्यायस्य चतुर्थपादस्य समाप्त्यनन्तरं विलिखितयोः पुष्पिकयोः विवरणेन ज्ञायते यत् ग्रन्थकर्ता भारद्वाजकुलोत्पन्नः शिवभक्तः शैवानुयायी वा आसीत्। सः व्याकरणाचार्यगोपाळकृष्णस्य शिष्यः आसीत्। श्रीमदप्पादीक्षितः यः श्रीमदप्पयदीक्षितपौत्रस्य श्रीमत्सिंहाप्पयदीक्षित-नप्तृभूतस्य श्रीवेङ्कटसुब्रह्मण्यदीक्षितपौत्रस्य श्रीधर्मराजवेङ्कटेश्वरदीक्षितस्य तथा मातुः विशालाक्ष्याः पुत्र आसीत्।[1] ग्रन्थकारस्य वृद्धप्रपितामहस्य, वृद्धपितामहस्य, जनन्याः, जनकस्य, गुरोः च नामानि, गोत्रम्, आराध्यदेवता, पन्थः, गुरोः विशेषणानि च अनया पुष्पिकया विशेषतया ज्ञायते।

उपर्युक्तपुष्पिकासु ज्ञायते यत्, सूत्रप्रकाशग्रन्थस्य ग्रन्थकारः भारद्वाजकुलोत्पन्नः शिवभक्तः शैवानुयायी वा व्याकरणाचार्यगोपाळकृष्णस्य शिष्यः तथा श्रीमदप्पयदीक्षितस्य साक्षादष्टमवंशजः श्रीमद् अप्पादीक्षितः विद्यते। द्वितीये अध्याये चतुर्थपादस्य अन्ते, अष्टमे अध्याये चतुर्थपादस्य अन्ते च अयं महत्वपूर्णः उल्लेखः अस्ति। अतः अप्पयदीक्षितस्य वंशवृक्षः तथा गोपालकृष्णस्य कालः, तस्य कृतयः अथवा एतयोः ऐतिहासिक्यः संसूचनाः आदीनां अभ्यासेन ग्रन्थविश्लेषण-सूचीकोशादिपुस्तकेषु तेषां विषये संसूचनाम् अन्विष्य च कः एषः अप्पादीक्षितः ? इति ज्ञातुं शक्यते। नामनिर्धारणं किमर्थम् आवश्यकम् ? पट्टमडई के.शिवस्वामी

[1] Krushnamacharya V.Descriptive Catalogue of Sanskrit Manuscript in the Adyar library, Vol.VI , The Adyar Library , 1947, pp. 40, 141

अय्यरमहाभागेन ख्रै.2011 तमे वर्षे प्रकाशिते पुस्तके Family tree of Appaya Nilkantha's तथा आन्तर्जाले विद्यमानस्य पट्टमडई के.शिवस्वामी अय्यरमहाभागेन कृतस्य familytreemaker.genealogy.com/users/s/i/v/Pattamadai-K-Sivaswami इति सङ्केतस्थले अप्पयदीक्षितस्य वंशवृक्षस्य अनुसारेण अप्पा इति नाम्ना अनेकाः जनाः सन्ति।

अधुना अप्पय, अपय्य, अप्प दीक्षित वा इति विषये संशोधः भवेत्। भाण्डारकरग्रन्थालये उपलभ्यमाने डा.नरेन्द्रनाथशर्मणालिखिते अप्पय दीक्षित – इति पुस्तके वेदान्तव्याकरण-मीमांसाभ्यासकस्य अप्पयदीक्षितस्य कालविषये[1] तथा नामभिन्नतायाः विषये च विवरणं कृतमस्ति। तादृशमेव विवरणं पं.युधिष्ठिरमीमांसकस्य संस्कृत व्याकरणशास्त्र का इतिहास इति पुस्तकेऽपि उपलभ्यते। मूलतः तस्य नाम्नी एव मतभेदाः सन्ति – अप्पयदीक्षितः, अप्पय्यदीक्षितः अप्पदीक्षितः[2] वा। किन्तु द्वयोः मतानुसारेण अप्पयदीक्षित इति नाम स्वीकृत्य तस्य अच्चनदीक्षित- इति भ्रातृपौत्रस्य शिवलीलार्णवकाव्यात् ज्ञायते यत् अप्पयदीक्षितः द्विसप्ततिः वर्षपर्यन्तं अजीवत्। तावति काले अप्पयदीक्षितेन शतग्रन्थानां रचना कृता[3]। काव्यशास्त्रे

---

[1] डा. शर्मा नरेन्द्रनाथ ,Re.No. 34540 , अप्पय दीक्षित, 1st Editionभाण्डारकरग्रन्थालयः, पुणे.प.स. – 8-11.

[2] मीमांसक,युधिष्ठिर, संस्कृत व्याकरणशास्त्र का इतिहास, भारतीय प्राच्यविद्या प्रतिष्ठान, अजमेर, प्रथमसंस्करण, वि.स.2020, प.स. 450

[3] मीमांसक,युधिष्ठिर, संस्कृत व्याकरणशास्त्र का इतिहास, भारतीय प्राच्यविद्या प्रतिष्ठान, अजमेर, प्रथमसंस्करण, वि.स.2020, प.स. 450-455, https://vishwakosh.marathi.gov.in/26906

अप्पयदीक्षितेन कुवलयानन्दनाम्नी कृतिः रचिता। तत्र साहित्यशास्त्रविषये चर्चा अस्ति यस्य सन्दर्भाः जयदेवस्य चन्द्रालोकेऽपि उपलभ्यन्ते । अपि च अप्पयदीक्षितस्य कतिचन मतानां खण्डनं प्रसिध्दः आलङ्कारिकः पण्डितराजजगन्नाथः स्वग्रन्थे[1] कृतवान्न। विद्वांसैः मन्यते यत् अप्पयदीक्षितस्य नामकरणसंस्कारानुसारेण अस्य मूलनाम – (शर्मन् नाम ) नाम विनायकसुब्रह्मण्यः आसीत्। अप्पय दीक्षित इति नाम तस्य पितामहस्य नाम अनुसृत्य कृतः आसीत्। एते सर्वे तमिल् जनाः। एषा प्रथा अद्यावधिः तमिल् जनेषु विद्यते। अप्पय दीक्षित इति शब्दस्य विवरणे वास्तविकप्रथया सह सम्बन्धः अस्ति। familytreemaker.genealogy.com/ users/s/i/v/Pattamadai-K-Sivaswami इति सङ्केतस्थलात् अप्पयदीक्षितस्य विषये वंशवृक्षस्य संसूचनाः प्राप्ताः। तेन मया अप्पा दीक्षितः कः स्यात् इति विषये अन्वेषणं कृतम्।

अप्पयदीक्षितस्य अष्टमः वंशवृक्षः अयम् -

अप्पयदीक्षितः (प्रथमवंशः)

नीलकण्ठदीक्षितः (द्वितीयवंशः)

(तृतीयवंशः) -

ज्ञानेश्वरदीक्षितः

प्रभाकरदीक्षितः

सिंहमप्पयदीक्षितः – मिनाक्षीवल्लभदीक्षितः, भवानीशङ्करदीक्षितः (चतुर्थवंशः)

भवानीशङ्करदीक्षितः - वेंकटेश्वरदीक्षितः (पञ्चमवंशः)

---

[1] डा. शर्मा नरेन्द्रनाथ, Re.No. 34540, अप्पय दीक्षित, 1st Edition भाण्डारकरग्रन्थालयः, पुणे.प.स. – 8-11.

वेंकटेश्वरदीक्षितः - वेंकटसुब्रह्मण्यदीक्षितः (षष्ठवंशः)
वेंकटसुब्रह्मण्यदीक्षितः – कुप्पदीक्षितः, विश्वनाथदीक्षितः (सप्तमवंशः)
कुप्पदीक्षितः - सुब्बदीक्षितः, भवानीशङ्करदीक्षितः (अष्टमवंशः)
विश्वनाथदीक्षितः – वेंकटय्यदीक्षितः, नीलकण्ठः (अष्टमवंशः)

प्रथमं तावत् दीक्षितशब्दस्य कः अर्थः इति चेत् कल्पद्रुमानुसारेण दीक्षितः, त्रिषु लिङ्गेषु - दीक्ष + कर्त्तरि क्तः। यद् वा, दीक्षा सञ्जाता अस्येति। तारकादित्वात् इतच्। दीक्षित इति सन्दर्भे तत्रैव लिखितम् - दीक्षितो यज्ञदत्ताख्यो यज्ञविद्याविशारदाः ॥ [1]वेदवेदाङ्गवेदार्थवेदोक्ताचारचञ्चुरः। राजमान्यो बहुघनो वदान्यः कीर्त्तिभाजनः ॥ अग्निशुश्रूषणरतो वेदाध्वयनतत्परः ॥ आपटेवर्यस्य कोशे लिखितम् यत् - A person who or whose ancestors may have performed a grand sacrificial ceremony, such as or Consecrated, initiated (as for a religious ceremony) ज्योतिष्टोमादि।[2]

अस्य वंशवृक्षस्य उपलब्धसूचनाभिः ज्ञायते यत्, अ - पुष्पिकायाम् उल्लेखितानि नामानि सत्यापितानि सन्ति। तत्रोक्तायां नामावल्यां श्रीमदप्पयदीक्षितपौत्रस्य श्रीमत्सिंहाप्पयदीक्षितनप्तृभूतस्य श्रीवेङ्कटसुब्रह्मण्य-दीक्षितपौत्रस्य – इति यावत् पर्यन्तं नामानि अनेन वंशवृक्षेण सह संयुक्तानि सन्ति। श्रीमत्सिंहाप्पयदीक्षितनप्तृभूतस्य – अस्य अन्वेषणं कृत्वा ज्ञायते यत्

---

[1]https://sa.wiktionary.org/wiki/%E0%A4%A6%E0%A5%80%E0%A4%95%E0%A5%8D%E0%A4%B7%E0%A4%BF%E0%A4%A4
[2]https://sa.wiktionary.org/wiki/%E0%A4%A6%E0%A5%80%E0%A4%95%E0%A5%8D%E0%A4%B7%E0%A4%BF%E0%A4%A4

श्रीमत्सिंहाप्पयदीक्षितस्य पुत्रः भवानीशङ्करदीक्षितः। भवानीशङ्करदीक्षितस्य एको एव पुत्रः वेंकटेश्वरदीक्षितः – तस्य पुत्रः वेंकटसुब्रह्मण्यदीक्षितः। वेंकटसुब्रह्मण्यदीक्षितस्य उल्लेखः अ – मातृकायाम् अस्ति। कल्पद्रुमानुसारेण नप्तृ शब्दस्य अर्थः पुत्रस्य पुत्रः वा पुत्र्याः पुत्रः। किन्तु वेंकटसुब्रह्मण्यदीक्षितः सिंहमप्पयदीक्षितस्य प्रनप्ता अस्ति। किन्तु अ – मातृकायाः नामावली षष्ठवंशपर्यन्तं योग्या इति अनुमन्यते मया। अतः प्रायः ग्रन्थकारः अप्पादीक्षितः इमां पुष्पिकां स्वयं न लिखितवान् स्यात्। प्रायः यः लेखकः सः अयं सम्बन्धः न जानाति अथवा तस्य लेखने वा सूचनायां दोषः अस्ति। किन्तु अ मातृकायाम् उल्लेखानुसारेण वेंकटसुब्रह्मण्यदीक्षितस्य क्रमः अप्पादीक्षितस्य वंशवृक्षे अस्ति। तद् क्रमानुसारेण एव अप्पादीक्षितः अष्टमः वंशजः स्यात्।

अधुना पुष्पिकायाम् इतोऽपि एकः महत्त्वपूर्णः सन्दर्भः - श्रीमन्महादेवानुग्रहपात्रस्य श्रीगोपालकृष्णाभिधविद्वन्मकुटाधीतपातञ्जलमहातन्त्रस्य, श्रीविश्वेश्वरसाग्निचित्यातिरात्रयोजितो लब्धवाक्यप्रमाणतात्पर्यस्य इति द्वौ उल्लेखौ। अनेन ज्ञायते यत् श्रीगोपालकृष्णः, श्रीविश्वेश्वरः अनयोः शिष्यः अप्पादीक्षितः। श्रीगोपालकृष्णेन शाब्दिकचिन्तामणिग्रन्थस्य रचना कृता या महाभाष्यस्य व्याख्या। श्रीविश्वेश्वरेण सिद्धान्तसुधानिधिग्रन्थस्य रचना कृता। उभयोः उल्लेखाः 1947-तमे वर्षे प्रकाशितः प. व्ही. कृष्णमाचार्यकृत अडियारग्रन्थालयस्य हस्तलिखितस्य ग्रन्थविश्लेषणसूच्याः षष्ठ्याः मालिकायाः व्याकरणविषयकस्य ग्रन्थविश्लेषणसूच्याः षष्ठखण्डस्य 38,39,40 तमेषु पृष्ठेषु 138,139,140 क्रमाङ्कानुसारेण वर्तन्ते।[1]

[1] Krushnamacharya V.Descriptive Catalogue of Sanskrit Manuscript in the Adyar library, Vol.VI , The Adyar Library , 1947 , page 38-40, no. – 138 - 140

गोपालकृष्णशास्त्रीवर्यस्य समानाः सन्दर्भाः NCC ग्रन्थविश्लेषणसूच्याः 33 तमे भागे 257 तमे पृष्ठे शाब्दिकचिन्तामणि[1] इति ग्रन्थकारस्य विवरणं दीयते। तथा मद्रासससंस्कृतमहाविद्यालयस्य एकस्मिन् कोशे 136 तमे पृष्ठे गोपालकृष्णशास्त्री[2] इति नाम्ना विद्यते। तत्रापि अडियारग्रन्थालयस्य हस्तलिखितस्य ग्रन्थविश्लेषणसूच्याः समानाः अनुक्रमाङ्काः सन्ति। तथा महत्वपूर्णः सन्दर्भः अस्ति यत् – गोपालशास्त्रीवर्यस्य शिष्यः अप्पादीक्षितः, कः अप्पादीक्षितः इति पृष्टे सति उत्तरमस्ति - NCC ग्रन्थविश्लेषणसूच्याः 6 तमे भागे 136 तमे पृष्ठे यः समानः अनुक्रमाङ्कः लिखितः सन्दर्भः सः एव अडियारग्रन्थालयस्य हस्तलिखितस्य ग्रन्थविश्लेषणसूच्याः षष्ठखण्डस्य चत्वारिंशत्तमे पृष्ठे 141 - सूत्रप्रकाशस्य ग्रन्थस्य। अतः अनेन गुरुशिष्ययोः सहसंबंधः स्पष्टः। गोपालकृष्णशास्त्रीवर्यः यः महाभाष्यम् इत्यभिधानेन अपि प्रसिद्ध आसीत्। सर्वे ऐतिसाहिकाः सन्दर्भाः परस्परं संमिल्लिताः। अतः केवलं ग्रन्थकारस्य अप्पादीक्षितस्य तथा तस्य पितुः नाम्नः सन्दर्भे एव अन्यविकल्पैः गवेषणीयः।

इत्थं ग्रन्थकारः अप्पादीक्षितः तस्य वंशवृक्षे अप्पयदीक्षितस्य एव अष्टमवंशजः इति प्रमाणितम्। एवं प्रकारेण मातृकायाः सूक्ष्माध्ययनेन ऐतिहासिकसन्दर्भैः च ग्रन्थकारस्य वंशवृक्षविषये प्रामाणिकाः सूचनाः प्राप्तुं शक्यन्ते। अयं विषयः

[1] https://vmlt.in/ncc/search?page=1&q=%u0936%u093E%u092C%u094D%u0926%u093F%u0915%u091A%u093F%u0928%u094D%u0924%u093E%u092E%u0923%u093F

[2] https://vmlt.in/ncc/search?page=1&q=%u0917%u094B%u092A%u093E%u0932%u0915%u0943%u0937%u094D%u0923%u0936%u093E%u0938%u094D%u0924%u094D%u0930%u0940

हस्तलिखितशास्त्रस्य दृष्ट्या अभ्यसनीयः महत्तवपूर्णः च वर्तते।

**सन्दर्भग्रन्थाः –**

1) अष्टाध्यायी,सम्पादकः, ब्रह्मदत्तजिज्ञासु, रामलालकपूर ट्रस्ट रेवली, 1998 ई., हरियाणा

2) मीमांसक पं.युधिष्ठिर, संस्कृत व्याकरण शास्त्र का इतिहास,प्रथम भाग,सम्पादकः, भारतीय प्राच्य विद्याप्रतिष्ठान, 2007 अजमेर

3) Pandit.V.Krishnamacharya, Descriptive Catalogue of Sanskrit Manuscript in the Adyar Library, vol–6 Grammar,Prosody and Lexicography, 1947

4) गौरी शङ्कर ओझा, भारतीय प्राचीन लिपिमाला, मुन्शीराम मनोहरलाल,1971,दिल्ली

5) https://books.google.co.in/books/about/ Descriptive_Catalogue_of_Sanskrit_Manusc.html?id= 9FDgAAAAMAAJ&redir_esc=y

6) S.J.Jagannatha, Manuscriptology : An Entrance, Parimal Publication, Edition – 2007

7) A Sanskrit to English Dictionary, Williams Monier M, Motilal Banarasi Das,Jan. 2011

8) Apate, V.S., Sanskrit- English Dictionary, Gopal Narayen & co., Bombay, second edition

9) डॉ. सत्येन्द्र, पाण्डुलिपि विज्ञान, राजस्थान हिन्दी ग्रन्थ अकादमी, जयपूर, प्रथमसंस्करण- 1978

10) डा. शर्मा नरेन्द्रनाथ,Re.No. 34540, अप्पय दीक्षित, 1st Editionभाण्डारकरग्रन्थालयः, पुणे

11) दिक्षितपुष्पा, अष्टाध्यायीसूत्रपाठः,ज्ञानभारतीप्रकाशन,नईदिल्ली, प्रथमसं. 2009
12) सम्भाषणसन्देशः,संस्कृतभारती,वैशाखमासः मे 2023
13) https://ashtadhyayi.com
14) https://sa.wiktionary.org/wiki
15)https://www.sanskrit-lexicon.uni-koeln.de/scans/MWScan/2020/web/webtc2/index.php
16) familytreemaker.genealogy.com/users/s/i/v/Pattamadai-K-Sivaswami
17) https://archive.org/details/descriptivecatal
18) https://vmlt.in/ncc
19) https://vishwakosh.marathi.gov.in/26906

**मैत्रेयी नंदकुमार मणेर**
केन्द्रियसंस्कृतविश्वविद्यालयः
क.जे.सोमैय्या परिसरः, मुम्बई.
दूरवाणी – 9867870828
ईमेल – maitreyee17mm@gmail.com

❑ ❑ ❑

महस्विनी – विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452)
कुसुमम् : जनवरी - जुलै २०२२ सम्पुटम् : प्रथमम्

# प्राचीनशिक्षाग्रन्थानां पूजनं प्रति आस्था कालादेव अपेक्षितम्

डॉ. कैलाश चन्द मीणा,
डॉ. जगदीश कुमार जाट:

**प्रस्तावना**

सामानन्द सम्प्रदायः श्री सम्प्रदायनाम्ना ख्यातो वर्तते। सम्प्रदाय प्रवर्तिका तीपराम्बा श्री सीता मन्यते। वैष्णव सम्प्रदाये अस्य मतावलम्बिन: बहवो विद्यन्ते। तिलकं प्रामुख्येन सनातनधर्मे सर्वत्र दृश्यते श्रूयते च । समाजे पण्डितो वदति -

अतिलकं ब्राह्मणं दृष्ट्वा सद्यश्चाण्डालदर्शनम् ।

**विवेचनाः**

यस्य देशस्य तिलकं प्रति आस्था प्राचीन कालादेव वर्तते। ब्राह्मणो भूत्वा भाले तिलकं नैव रचयति तत्रैवोपर्युक्तः आक्षेपः यस्य ब्राह्मणस्य भाले सम्प्रदायोचितं तिलकं नास्ति स चाण्डालसमो ज्ञेयः । चाण्डाल: सर्वथा त्याज्य: अस्पृश्यश्च मन्यते । ब्राह्मणस्य ब्राह्मणत्व रक्षणे तिलकस्य योगदानं महत्वपूर्ण भवति। लोकाचारे सामान्येन श्रूयते ब्राह्मणस्योर्ध्वपुण्ड्रं, क्षत्रियस्य त्रिपुण्ड्रं, वैश्यस्यार्धचन्द्रं शूद्रस्य बिन्दुमात्रतिलकम्।

वैष्णव सम्प्रदाये ऊर्ध्वपुण्डं सर्वैः धार्यते । ऊर्ध्वपुण्ड्रं भाले, बाहौ, हृदि, उदरे, कण्ठे च प्रामुख्येन दृश्यते। रामानन्दस्य श्री सम्प्रदाये द्वादशतिलकानां निर्धारणमपि दृश्यते। तिलकं सम्प्रदायस्य चिह्नमिव मन्यते। सम्प्रदाये दीक्षितोऽवश्यमेव तिलकं धारयति । संप्रदाये परम्परया दीक्षादिने शिष्यमवबोधयति गुरुः केन प्रकारेण तिलकं कुर्यात् । सम्प्रदायस्य नियमः आचार्यैः उद्घोष्यते । स च नियमः परम्परा प्राप्त एव मन्यते। तस्मिन् नियमे परिवर्तनं नैवाङ्गी क्रियते । आचार्यस्य

सम्पूर्णे भारते परम्परा प्रचलिताऽस्ति। वैदिकी परम्परा काचिद्भिन्ना प्रतीयते। तत्र प्रामुख्येन भस्मधारणस्य वैशिष्ट्यमुक्तम्। भस्महोमसकाशात् प्राप्तं भवेत्। तत्र द्विविधं भस्मधारणमुपन्यस्तम् । प्रथमं सजलं भस्म, शुष्कं भस्मचेति । भस्मधारणस्य प्रमुखः मन्त्रः कर्मकाण्डे सम्पूर्णे भारते प्रचलितो वर्तते तद्यथा -

त्र्यायुषजमदग्नेः कश्यपस्य त्र्यायुषम् ।
यद्देवेषु व्यायुषंतन्नोऽस्तु न्यायुषम् ॥[1]

द्वितीयोमन्त्रः पारस्कर गृह्यसूत्रे उपन्यस्तः स च मन्त्रः उपनयनादौ पठ्यते तद्यथा -

सुचक्षा अहमक्षीभ्यां भूयासम । सुवच्चि मुखेन । सुश्रुतकर्णाभ्यां भूयासम् ।[2]

स्वयं मध्यमाङ्गुष्ठेन स्वललाटे गन्धतिलकं कुर्यात् इति उपर्युक्तेन मन्त्रेण भस्म ललाटे ग्रीवायां दक्षिणवामबाह्वोर्हदि च र्धायम् ।

बोदिकपरम्परायां गन्धतिलकस्य कथनं शास्त्रान्तरे श्रूयते । गन्धतिलकमित्युक्ते सुगन्धितिलकं ज्ञेयम् । आह्निक सूत्रावल्यां वैद्य नारायणशर्मणा । गन्धद्रव्याणि लिखितानि तत्प्रमाणं उदाह्रियते -

कस्तूरी कुङ्कुमं फल्गु सिन्दूरं रक्तचन्दनम् ।
गोरोचना गन्धकाष्ठं जलं चागरु गोमयम् ।
धात्री मूलस्यमृदऊगन्धो हरिद्रागोगृहस्थ च ॥[3]

अयं प्रश्नः स्वभावत उदेति । कथं तिलकं कुर्यात् किं फल तस्य । अकरणे किं भवति। अस्य सम्पूर्णस्योत्तरं शास्त्रेषु पठितम् श्लोकाः एव लिख्यन्ते -

स्नानान्ते सर्ववर्णानामाश्रमाणां तथैव च ।
एतानि तिलकान्याहुः सन्ध्यादि सर्वकर्मसु ॥
काम्यं नैमित्तिकं नित्यं यत्किञ्चित्कर्म नारद ।

वर्णाश्रमाणां तन्नास्ति स्नानान्ते तिलकं विना ॥
कर्म वर्णाश्रमाणां स्यादैवं पित्र्यं न तत्फलम् ।
स्नानं सन्ध्यां पञ्चयज्ञान् पैत्र्यं होमादिकर्म यः ॥
विना तिलकदर्भाभ्यां कुर्यात्तनिष्फलं भवेत् ॥[4]

तिलकधारणविषये कश्चित् विचारः तत्रैव प्रकारान्तरेणोपस्थापितः अधः लिख्यते -

ऊर्ध्व पुण्ड्रं द्विजः कुर्यात् क्षत्रियाणां तथैव च ।
वैश्यानां तु तथा ज्ञेया शूद्राद्यैर्मण्डलाकृतिः ॥
ललाटदक्षिणे ब्रह्मा वसेद्वामे महेश्वरः ।
मध्ये विष्णु वसेन्नित्यं तस्मान्मध्यं न लेपयेत् ।।

शूद्रस्यैकाङ्गुलं प्रोक्तमायतं द्वयङ्गलं दिशि । क्षत्रिये व्यङ्गुलं तद्वद्ब्रह्मणे चतुरङ्गुलम् ।

नासिकायास्त्रिभागैको भागो मानेन यो भवेत्।
भ्रुवोर्मध्यादधः स्थानं मूलमाहुर्मनीषिणः।

ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा । कुर्यात् यदूर्ध्वपुण्ड्रं तद्वैष्णवो हरिमन्दिरम् ॥

गन्धधारणप्रकार: -

अङ्गुष्ठः पुष्टिदः प्रोक्तो मध्यमा पुष्टिकारिणी ।
अनामिकान्नदा नित्यं मुक्तिदा च प्रदेशिनी ॥
एतैरङ्गुलभेदैस्तु कारयेन्न नखैः स्पृशेत् ।

अन्यत्रापि -

वर्तिदीपाकृतिर्वापि वेणुपत्राकृतिस्तथा ।
पद्मं च मुकुलो वापि शंखाकारमतः परम् ॥
मत्स्यकूर्माकृतिर्वापि तथैव मुकुलाकृतिः ।

ब्राह्मणैस्तिलकं कुर्यादनेन विधिना सह ॥
अभ्यङ्ग स्नानं कुर्याच्चेद्धार्यं चन्दनमेव च ।
ललाटे भस्म नो धार्य सन्ध्योपासन कर्मणि ॥
अनामिक्या च देवस्य ऋषीणाञ्च तथैव च ।
गन्धानुलेपनं कार्यं प्रयत्नेन विशेषतः ॥
पितृणामर्पयेद् गन्धं तर्जन्या च तथैव हि ।
तथैव मध्यमाङ्गुल्या धार्यं गन्धं स्वयं बुधैः ॥

वैष्णवानां कृते ऊर्ध्वपुण्ड्रस्यैवाश्यकता शास्त्रेषु दृश्यते । सम्प्रदाय भेदेन शैवानां कृते तिर्यक् त्रिपुण्डं पुनः वैष्णवानां कृते च ऊर्ध्वपुण्ड्रमेव प्रशस्तम् उक्तञ्च -

शिवागमे दीक्षितैस्तु धार्यं तिर्यक् त्रिपुण्ड्रकम् ।
विष्णवागमे दीक्षितैस्तु ऊर्ध्वपुण्ड्रं विधारयेत् । ।[5]

तिलकस्थानं गात्रे कस्मिन्नौं कुर्यात् इति ग्रन्थेषु सम्यक् विचारितम् ।

स्मार्तानां तिलकं कर्णमूलेऽपि दृश्यते तत्रैव वैष्णवसम्प्रदाये कर्णयोः तिलकं न दृश्यते यद्यपि पुराणे वचनमिदं प्राप्यते -

"विप्रस्य दक्षिणेकणे सर्वास्तिष्ठन्ति देवताः"

पुनः ब्रह्माण्ड पुराणस्य वचनमधः प्रस्तूयते -

ललाटे केशवं विद्यान्नारायण मथोदरे । माधवं हृदये न्यस्य गोविन्दं कण्ठकूर्परे ।
विष्णुं च दक्षिणे कुक्षौ तद्भुजे मधुसूदनम् । त्रिविक्रमं कर्णमूले वामकुक्षौ तु वानम् ॥
श्रीधरं च हृषीकेशं वामयोर्बाहुकर्णयोः । पद्मनाभं पृष्ठदृशे ककुद्दामोदरं न्यसेत् ॥
मूर्ध्नि मूलेन मन्त्रेण शेषैर्वादश नामभिः ।
संकर्षणादिभिः कृष्णे शुक्ले चेत् केशवादिभिः ॥

तथा च शौनकः –

निटिले बाहुवच्चैव दण्डवत्कर्णपल्लवे ।
हृदये कमलाकारमुदरे दीपवल्लिखेत् ॥
वणुपत्रसमाकारं बाहुमध्ये समालिखेत् ।
अधः पृष्ठे स्कन्ददेशे लिखेज्जम्बूफलाकृतिम् ।
दशाङ्गुलप्रमाणं तु उत्तमोत्तममुच्यते ॥
नवाङ्गुलं मध्यमं स्यादष्टाङ्गुलमतः परम्।
लिङ्गाकारं ललाटे तु हृदयेऽश्वत्थ पत्रकम् ।
'पंत्र पत्राकृतिर्बाह्वोः शेष दीपकलाः स्मृताः

तिलकविषये शास्त्रेषु बहुविधं चिन्तनं कृतं वर्तते । केन द्रव्येण तिलकं विधेयम् । कालः को भवेत् । सुगन्धिद्रव्यस्यापि माङ्गल्यतिलकमुक्तम् ।

यथा चाह नागदेवः -

न पादुकस्थो नादर्श न जले वा विलोकयेत्। न प्रावृतशिराः कुर्यात्तिलकं धर्मवर्धनम्॥
प्रभाते विपुलं विन्द्यान्मध्याह्ने च त्रिपुण्ड्रकम्।
अपराह्ने पर्वमानं तिलकं त्रिविधं स्मृतम्॥ गोपीचन्दनलिप्ताङ्गो यं यं पश्यति चक्षुषा।
तं तं पूतं विजानीयान्नात्र कार्या विचारणा॥
ऊर्ध्वपुण्ड्रं द्विजस्येष्टं क्षत्रियस्य त्रिपुण्ड्रकम्।
अर्धचन्द्रं तु वैश्यस्य वर्तुलं सर्वजातिषु॥

विष्णुधर्मोत्तर पुराणे मङ्गलतिलकविषये स्वतन्त्रं चिन्तनं दृश्यते तद्यथा -

तिलकं कुङ्कुमेनैव सदामङ्गलकर्मणि ।
कारयित्वा सुमतिमान् न श्वेतचन्दनं मृदा ॥

शंखवचनं शास्त्रान्तरे संकलितं तच्च उदाह्रियते -

शंखचक्राद्यङ्कनं च तुलसीदल भक्षणम् ।
यः कुर्यान्नियतं भक्त्या स याति परमां गतिम ॥

श्रीमदेवी भागवतं परमशाक्तस्य ग्रन्थः विद्यते विदुषां सभायां श्रूयते । किन्तु एकत्र देव्याः चरितं परिगीतम् अपरत्र विष्णोः अवताराणां विस्तरेण भणितम् । अस्मिन महापुराणे एकादशस्कन्धे विभूतिधारणविषये बहुधा प्रोक्तम्। विभूतिधारणं नाम भस्मलेपनम्। तच्च भस्म कुतः ग्राह्यं कथं संस्करणीयं कश्च भस्मधारणे अधिकारी स्यात् इति सर्वं त्रिभिरध्याये वर्णितम्। पुनः एकादशस्कन्धस्य पञ्चदश अध्याये ऊर्ध्वपुण्ड्रस्य माहात्म्यं सप्रमाणमुपन्यस्तम् । वैष्णवागमे यो हि भावः वैष्णवानां कृते लिखितः तत् सर्वमादाय सारांशेन व्यासः प्रवचनं चकार अतः ऊर्ध्वपुण्ड्रस्य विवेचनं पुराणसम्मतं क्रियते -

ऊर्ध्वपुण्ड्रविधिं चैवाप्यधिकारि विभेदतः ।
प्रवक्ष्ये मुनिशार्दूल वैष्णवागमलोकनात् ॥
ऊर्ध्वपुण्ड्रप्रमाणानि दिव्यान्यङ्गिलेभेदतः ।
वर्णाभिमंत्रदेवांश्च प्रवक्ष्यामि फलानि च ॥
पर्वताग्रे नदीतीरे शिवक्षेत्रे विशेषतः ।
सिंधुतीरे च वल्मीके तुलसीमूलमाश्रिते ॥
मृद एतास्तु संग्राह्या वर्जयेदन्यमृतिकाः ।
श्याम शान्तिकरं प्रोक्तं रक्तं वश्यकरं भवेत् ॥
श्रीकरं पीतमित्यादुर्धर्मदं श्वेतमुच्यते ।
अशुष्ठः पृष्टिदः प्रोक्तो मध्यमायुष्करी भवेत् ॥

अनामिकान्नदा नित्यं मुक्तिदा च प्रदेशिनी ।
एतैरङ्गुलभेदैस्तु कारयेन्न नखैः स्पृशेत् ॥
बर्ति दीपावलिकृति वेणुपत्राकृतिं तथा ।
पद्मस्य मुकुलाकारं तथा कुर्यात् प्रयत्नतः ॥
मत्स्य कूर्माकृतिं वापि शंखाकारं ततः परम् ।
दशाङ्गुलिप्रमाणं तु उत्तमोत्तममुच्यते ॥
नवाङ्गुलं मध्यमं स्यादष्टाङ्गुलमतः परम् ।
सप्तषड्पञ्चभिः पुण्ड् मध्यमं त्रिविधं स्मृतम् ॥
चतुस्त्रिद्वयंगुलैः पुण्ड्रं कनिष्ठं त्रिविधं भवेत् ।
ललाटे केशवं विद्यान्नारायणमथोदरे ॥
माधवं हृदि विन्यस्य गोविन्दं कंठकूपके ॥
उदरे दक्षिणे पार्श्वे विष्णुरित्यभिधीयते ।
तत्पार्श्व बाहुमध्ये च मधुसूदनमेव च ॥
त्रिविक्रमं कर्णदेशे वामकुक्षौ तु वामनम् ।
श्रीधरं बाहुके वामे हृषीकेशं तु कर्णके ॥
पृष्ठे तु पद्मनाभं च ककुद्दामोदरं स्मरेत् ।
द्वादशैतानि नामानि वासुदेवेति मूर्धनि ।
पजाकाले च होमे च सायंप्रातः समाहितः।
नामान्युच्चार्य विधिना धारयेदूर्ध्वपुण्ड्रकम् ॥
अशुचिर्वाप्यनाचारो मनसा पापमाचरेत् ॥
शुचिरेवभवेन्नित्यं मूर्ध्नि पुण्ड्रांकितो नरः ।

ऊर्ध्वपुण्ड्रधरो मर्त्यो म्रियते यत्र कुत्रचित् ॥
श्वपाकोऽपि विमानस्थो मम लोके मदीयते ।
एकांतिनो महाभागा मत्स्वरूपविदोऽमलाः ॥
सांतरालान् प्रकुर्वन्ति पुण्ड्रान्विष्णुपदाकृतीन् ।
परमैकांतिनोप्येवं मत्पादैकपरायणः ॥
हरिद्राचूर्णसंयुक्ताञ्छूलाकारांस्तु वाऽमलान् ।
अन्ये तु वैष्णवाः पुण्ड्रानच्छिद्रानपि भक्तितः ॥
प्रकुर्वीरन्दीपपद्मवेणुपत्रोमाकृतीन् ।
अच्छिद्रानपि सच्छिद्रान्कुर्युः केवलवैष्णवाः ।
अच्छिद्रकरणे तेषां प्रत्यवायो न विद्यते ॥
एकांतिनां प्रपन्नानां परमैकान्तिनामपि ।
अच्छिद्रपुण्ड्राकरणे प्रत्यवायो महान्भवेत् ॥
ऊर्ध्वपुण्ड्रं तु यः कुर्याद्दण्डाकरं तु शोभनम् ।
मध्येछिद्रं वैष्णवाश्च नमोन्तै: केशवादिभिः ॥
विमलान्यूर्ध्वपुण्ड्राणि सांतरालानि यो नरः ।
करोति विपुलं तत्र मन्दिरं मे करोति सः ॥
ऊर्ध्वपुण्ड्रस्य मध्ये तु विशाले सुमनोहरे ।
लक्ष्म्या साकं सहासीनो रमते विष्णुरव्ययः ॥
निरंतरालं यः कुर्यादूर्ध्वपुण्ड्रं द्विजाधमः ।
स हि तत्र स्थितं विष्णुं श्रियं चैव व्यपोहति ॥
अच्छिद्रमूर्ध्वपुण्ड्रं तु यः करोति विमूढधीः ।

स पर्यायेण तानेति नरकानेकविंशतिम् ॥
ऋजूनि स्फुटपाङनि सांतरालानि विन्यसेत् ।
ऊर्ध्वपुण्ड्राणि दण्डाब्जदीपमत्स्य निमानि च ।
शिखोपवीतवद्धार्य मूर्ध्व पुण्ड्रं द्विजेन च ॥
विना कृताश्चेद्विफलाः क्रियाः सर्वाः महामुने ।
तस्मात् सर्वेषु कार्येषु कार्यं विप्रस्य धीमतः ॥
ऊर्ध्वपुण्ड्रं त्रिशूलं च वर्तुलं चतुरस्रकम् ।
अर्धचन्द्रादिकं लिंगं वेदनिष्ठो न धारयेत् ॥
जन्मनालब्धजातिस्तु वेदपंथानमाश्रितः ।
पुण्ड्रांतरं भ्रमाद्वापि ललाटे नैव धारयेत ॥
ख्यातिकां त्यादिसिद्ध्यर्थं चापि विष्ण्वागमादिषु।
स्थितं पुण्ड्रांतरं नैव धारयेद्वैदिको जनः॥[6]

वैष्णवानां कृते संप्रदायभेदेन वस्त्र धारणं वर्तते । दण्डी, शिखी, जटी, मुण्डी इत्यादयो भेदाः दृश्यन्ते । नैष्ठिक ब्रह्मचारिणां कृते श्वेतवस्त्रं, पीतवस्त्रं च दृश्यते । संन्यासिनां वैष्णवानां च कषाय वस्त्रं प्रोक्तम्। रामानन्द संप्रदायेऽपि श्वेतवस्त्रधारिणः महात्मानः दृश्यन्ते तत्रैव राजस्थान प्रान्तस्य अग्रर्देवाचार्यस्य रसिकभक्ताः पीतवस्त्रं धारयन्ति। रेवासापीठे विशेषतः अस्यानुपालनं भवति ।

कौपीनवस्त्रं, धौतवस्त्रञ्च धारणं नियमेन भवति। मषीवर्णं वस्त्रं प्रायेण सर्वत्र निषिद्धमेव। अतः श्वेतवस्त्रं, पीतवस्त्रं, कषायवस्त्रञ्च विशिष्य श्रूयते । पूजनं रामानन्दसंप्रदाय समेषां वैष्णव भक्तानां कृते प्रोक्तम् । तत्रापि भगवतो रामस्य सपरिकस्य अर्चाविग्रहः प्रामुख्येन भवति ।

पूजायाम् क्रमः -

दक्षिणे लक्ष्मणो यस्य वामे च जनकात्मजा। पुरतो मारुतिर्यस्य तं वन्दे रघुनन्दनम्॥

**निष्कर्षः**

रामानन्दसम्प्रदाये पूजने दुराग्रहो नास्ति। दशावताराणां तथा शिवस्य पजनेऽपि रामानन्दस्य वैष्णवाः प्रसन्नाः भवन्ति । हनुमतः प्रतिष्ठायां प्रसन्नाः भवन्ति । हनुमतः प्रतिष्ठा श्रीसम्प्रदाये सर्वत्र साक्षात् दृश्यते। अस्य सम्प्रदायस्य वैष्णवः कदाचित् रामस्य प्रतिमां विनैव हनुमतः पूजनं करोति ।

रामानन्दस्य समग्र प्रमुख विभागस्य तत्वान्वेषणेन वक्तुं शक्यते रामानन्द सम्प्रदाये सनातनधर्मस्य स्थानं सर्वत्र वरीवर्ती। देव्याः पूजनं भवेत् उत वा पशुपक्षीणां आदरः सर्वोऽपि सम्प्रदाये ग्राह्यः वर्तते। रामानन्दस्य साधवः तीर्थयात्रायां, अन्नदाने, राष्ट्ररक्षायां, लोकसेवायां च मनोयोगेन सहयोगं कुर्वन्ति ।

"मठश्छात्रादिनिलयः" रामानन्द सम्प्रदायस्य ध्येयवाक्यं वर्तते । मठः अध्ययनाय भवति । अतः रामानन्दस्य साधोः कार्य सम्पूर्णे भारते वर्षे राष्ट्रिय महत्वस्य कार्यं द्रष्टुं शक्यते ।

**सन्दर्भग्रन्थाः**

1. शुक्ल यजुर्वेद संहिता
2. पारस्कर गृह्यसूत्रम्
3. वाज. आह्निक सूत्रावलिः पृ. २२६
4. वाज. आह्निक सूत्रावलिः पृ. २२६
5. नागो जी भट्ट संहितायाम्

6. श्रीमद्देवीभागवतम् ११.७७ – १०५

डॉ. कैलाश चन्द मीणा
Assistant Professor, Dr. Kailash Chand Meena,
Shri Lal Bahadur Shastri National Sanskrit University
A Central University, New Delhi
&
डॉ. जगदीश कुमार जाट:
एसोसिएट प्रोफेसर, स्व. लक्ष्मी कुमारी बधाला गर्ल्स पी. जी. कॉलेज
गोविन्दगढ़ चौमूँ, जयपुरम्

❑ ❑ ❑

महस्विनी – विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452)
कुसुमम् : जनवरी - जुलै २०२२ सम्पुटम् : प्रथमम्

# गीताद्युक्तः अहिंसास्वरूपविमर्शः

**विनयकुमारः**

सर्वो लोकः सुखजीवनमिच्छति। सुखं शान्त्या, शान्तिः अहिंसया लभ्यते। अतः सुखार्थमवश्यमहिंसानुष्ठेया । हिंसया परस्परद्वेषः मानसिकक्लेशः मनसि विकारः अहिंसया परस्परप्रीतिः मनसि आनन्दः जायते। युद्धादिना किमपि साधयितुं न शक्यते। अहिंसया एव सर्वं सध्यम् इति महात्मना गान्धीमहोदयेन भणितम्। तन्मतानुयायिनश्च जगत् सत्यं मिथ्या वा ? ईश्वरः वर्तते वा न वा ? इत्यादिनानाविषयेषु विवदमानैः विचारेषु विभिन्नदृष्टिपन्थानमनुसरद्भिरपि सर्वैरपि मताचार्यैः [१]अहिंसा परमोधर्मः इति एककठेन प्रतिपादितमस्ति । परन्तु अहिंसास्वरूपः दार्शनिकैः भिन्नभिन्नरीत्या न्यरूपि । तदत्र निरूपितम्।।

**भगवद्गीतायाम् अहिंसा**

महाभारतयुद्धकाले समुद्भूतमहाभारतपुष्पमधुभूतगीतायां अहिंसाप्राधान्यं प्रतिपादितम् [३]अहिंसा प्रथमं पुष्पं`` इति अहिंसायाः प्राधान्यं निरूपितम्। [४]"अहिंसा सत्यमस्तेयशौचमिन्द्रियनिग्रहाः यमाः`` इति यमेषु प्रधान्यमपि दत्तम्। "न योत्स्य इति गोविन्दं" वदन्तम् अर्जुनं प्रति कृष्णः युद्धं कुरु इति बोधयति। युद्धं तु हिंसारूपम् एव। हिंसा सर्वथा न कार्या। अहिंसा परमो धर्मः इति तु सर्वशास्त्राणां सारः। परन्तु भगवान् बोधयति युद्धं कुरु हिंसां कुरु इति। अत्र संशयः भवति। किम् अहिंसा कर्तव्या ? उत हिंसा वा अनुष्ठेया ? इति । तथैव केचन अर्वाचीना अपि भगवद्गीता हिंसां बोधयति इति आक्षिपन्ति। अत्र कृष्णेनैव उत्तरं दत्तम्। कृत्स्नगीताशास्त्रेण भगवन्माहात्म्यज्ञानतद्भक्तिपूर्वकं भगवदाराधनरूपतया स्वविहितवृत्तित्वेन वाऽनुष्ठीयमानो नारायणद्विट् तदनुबन्धिनिग्रहः क्षत्रियाणां परमो धर्मः । तं धर्मं

बन्धुस्नेहात् न त्याज्यम् । उक्तरूपो निग्रह एव परमधर्मः, तद्विरुद्धः सर्वोऽपि अधर्म इति बोधयिष्यन् गीताचार्येण कृष्णेन अर्जुनं प्रति अहिंसा एव बोधिता । यतः सज्जनरक्षणार्थं क्रियमाणा हिंसा तथैव धर्मरक्षणार्थं क्रियमाणा हिंसा अहिंसा एव ।सा हिंसा न दोषाय । तादृशहिंसा-अकरणमेव दोषाय भवति । यतः युद्धाकरणेन सज्जनहानिः लोके अधर्मश्च भवतः । तदर्थं युद्धं कार्यमेव । तदा भविष्यमाणा हिंसा नैव दोषकारणं भवति । उत्तरत्र स्वयं कृष्णः वक्षति-

**परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।**
**धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥**

इति। कृष्णस्य वचनात् साधूनां रक्षणाय धर्मसंस्थापनाय क्रियमाणहिंसा न दोषकारणम् इति स्पष्टं भवति। अत्र गीताचार्यः यत्र हिंसा कर्तव्या यत्र अकर्तव्या इति सुस्पष्टम् आज्ञापितवान्। एवं रीत्या अहिंसायाः स्वरूपं गीताचार्येण निरूपितम्।।

**पुराणेषु अहिंसा**

श्रूयते च अहिंसामाहात्म्यम् अग्निपुराणे -

[२]**भूतापिडा ह्यहिंसा स्यात् अहिंसा धर्म उत्तमः।**
**यथा गजपदेऽन्यानि पदानि पथगामिनाम् ।**
**एवं सर्वमहिंसायां धर्मार्थमभिधीयते॥** इति ॥

नारदपुराणे -

**अहिंसा परमो धर्मः पुराणे परिकीर्तितः ।।**
**हिंसया वर्तमानस्य व्यर्थो धर्म्मोभवेदिति ।।**
**कुर्वन्नपि वृथा धर्मान्यो हिंसामनुवर्तते ।। १०-७ ।।**

अहिंसा परमोधर्मः। हिंसया वर्तमानधर्मः पुण्यश्च व्यर्थौ भवतः। अहिंसाचरणं

न करोति चेत् निरन्तरं पुण्यकार्याणि कुर्वन्नपि सः सुकृतं न प्राप्नोति। तस्य पुण्यकार्याणि वृथा भवन्ति इति अहिंसायाः उत्कृष्टत्वं निरूपितम् । यमनियमादिष्वपि प्रथमस्थानं अहिंसासत्यमस्तेयशौचमिन्द्रिय-निग्रहाः यमाः इति अहिंसायाः एव दत्तमस्ति। उक्तं च अहिंसासामान्यलक्षणं -

**[५]कर्मणा मनसा वाचा सर्वभूतेषु सर्वदा ।**
**अक्लेशजननं प्रोक्तमहिंसा परमर्षिभिः ॥**

इति कूर्मपुराणे मनोवाक्कर्मेभ्यः सर्वभूतेषु क्लेशाजननम् अहिंसा इत्युक्तम् । सा अहिंसा नैकजनैः विविधस्तरे आचरिता। तत्कारणं तु तत्सिद्धान्तगत-अहिंसास्वरूपभेद एव ।

**जैनमते अहिंसा**

सर्वभूतेषु दया करणीया इति सर्वैः अङ्गीकृता । परन्तु तद्विषये अतीवनिष्ठा जिनानुयायिभिः प्रदर्शिता । तत्सूचनार्थमिव सर्वत्र महावीरस्य प्रतिमायाः अधः अहिंसा परमो धर्मः इति वाक्यं दृश्यते। उमास्वामिविरचिते तत्वार्थसूत्रनामके जैनमूलग्रन्थे हिंसा लक्षणमेवं भणितम् [६]" प्रमत्तयोगात् प्राणव्यारोपणं हिंसा `` इति। अस्यार्थः इन्द्रियदोषः प्रमादः । तेन युक्तः प्रमत्तः । तादृशेन प्रमत्तेन यथाकथमपि इन्द्रियाणां विनियोगकरणं हिंसा इत्युच्यते। अतः जैनैः आसने, आहारे, व्यवहारे च नियमविशेषाः आचरिताः वर्तन्ते । मोक्षसाधनतया पञ्चविधसमितयः न्यरूपयत् जैनयोगशास्त्रकारः हेमचन्द्रसूरिः। १) ईर्यास्मितिः २) भाषासमितिः ३) एषणासमितिः ४) अदानसमितिः ५) उत्सर्गसमितिः [७] इति । हेमचन्द्राचार्यः तदर्थान् व्याचष्टे । यत्र जनानां गमनागमनं बहु दृश्यते, तेन मार्गेणैव सञ्चारः कर्तव्यः । जनसमूहे सति तत्र प्राणिसञ्चरः न भवति । अतः हिंसा निवर्तते । सूर्योदयादारभ्य सूर्यास्ताभ्यन्तरसमये एव सञ्चारः विहितः । तदतिरिक्ते रात्रि समये सञ्चारे क्रियमाणे आलोकाभावनिमित्तेन

प्राणिनामुपरि पादनिक्षेपादिना प्राणिहिंसा भवति । प्रातः अपि यत्र जन्तवः न स्युः तत्रैव पादनिक्षेपादिकं कृत्वा गमनं कर्तव्यम् । इषा ईर्यासमितिः इत्युच्यते । तदेवोक्तम्

लोकातिविहिते मार्गे चुंबिते भास्वदंशुभिः ।
जन्तुरक्षार्थमालोक्य गतिरीर्या मता सताम् ॥ इति ।

भाषासमितेः लक्षणं तु उत्तमवाचा व्यवहारः, अपशब्दादीनां अप्रयोगः, सर्वजनहितकारिविषयप्रयोगः।

अवद्यत्यागतःसर्वजनोनं मितभाषणम् ।
प्रिया वाचयमानां सा भाषासमितिरुच्यते ॥[९]

द्विचत्वारिंशद्दोषैःविमुक्तं भिक्षान्नभोजनम् एषणासमितिरिति कथ्यते।

द्विचत्वारिंशता दोषैर्नित्यमदूषितम् ।
मुनिर्यदन्नमादत्ते सैषणासमितिर्मता ॥[१०]

प्राणिपीडा यथा न स्यात् तथा आसने उपविष्य ध्यानकरणम्, तानि आसनादीनि ग्रहणसमये स्थापनसम्ये च रजोहरणादिना शुद्दीकरणं , तदनन्तरमेव तेषां उपयोगः आदानसमितिरिति उच्यते॥

आसनादीनि संवीक्ष्य प्रतिलिख्य च यत्नतः ।
गृह्णीयात् निक्षिपेद्वा यत्सादानसमितिस्स्मृता ॥[११]

कफमूत्रमलविसर्जनसमयेपि जन्तवः यत्र न स्युः , तादृशप्रदेशे जागरूकतया विसर्जनं उत्सर्गसमितिरिति कथ्यते ।

कफमूत्रमलप्रायैः निर्जन्तुजगतीतले ।
यत्नाद्यदुत्सृजेत्साधुः सोत्सर्गसमितिर्भवेत् ॥[१२]

परन्तु जन्तवः सर्वत्र सन्ति, उक्तञ्च,

[१३]जले जन्तुः स्थले जन्तुः आकाशे जन्तुरेव च।
जन्तुमालाकुले लोके कथं भिक्षुरहिंसकः ॥

इति स्वयमेव प्रश्नं कृत्वा तत्वार्थसूत्रटीकाकारः भास्करानन्दः समाधानमपि प्रदत्ते। जन्तवः द्विविधाः स्थूलाः सूक्ष्माश्च। जैनभिक्षवः सदा ध्यानज्ञानपरायणाः अतः इन्द्रियदोषनिमित्तेन तैः हिंसा न विधीयते। सूक्ष्माः जन्तवः अशरीरिणः इति तेषां हिंसा एव कर्तुं न शक्यते। एतादृशदोषविमुक्ताः एव मोक्षार्हाः। "अप्रमत्तः स मोक्षार्हो नेतरो जैनशासने``। अन्ये निरयार्हाः इति जैनसिद्धान्तः। जिनदत्तसूरिणा जैनभिक्षुलक्षणमुक्तम् – "सरजोहरणाः भैक्ष्यभुजः लुञ्छितमूर्धजाः`` इति । ते हस्ते पिच्छीकां गृहित्वा सञ्चारसमये सूक्ष्मप्राणिनां गमनागमनं यथा न स्यात्, तथा करप्रसणादिपूर्वकं गच्छन्ति ।स्वशरीरस्थकेशानपि केशोल्लुण्ठनं परमसुखमिति सुखैनैव निष्कासन्ति। यदि कर्तर्या वपनं क्रियते , तदा केशमध्यपतितप्राणीनां हिंसा स्यात् इति तेषाम् आचरणाभिप्रायः। सायाह्नानन्तरं ते भिक्षां न स्वीकुर्वन्ति । कौशेयं न धरन्ति, मधु न पिबन्ति। जैनानां एतादृशानि आचारणानि जगति बहु प्रयाससाध्यानि।

**महाभारते अहिंसा**

**अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहा ।**
**क्षेत्रदारहरश्चैव षडेते आततायिनः ॥**
**आततायिनमायान्तं हन्यादेवाविचारयन् ॥**

आततायिनम् अविचारयन् हन्यादेव। ते जगतः क्षयकारिणः । **स्वरक्षणार्थं लोकरक्षणार्थं क्रियमाणा हिंसा न दोषाय कारणम् अनुशासनपर्वे निरूपितम् ।**

अहिंसा परमो धर्मः इति रणाङ्गणे शरतल्पे शयानेन भीष्मेन अहिंसाचातुर्विध्यं नीरूपितम् - १) कायिकी २) वाचिकी ३) मानसिकी ४) जैह्विकी चेति।

**कायिक्यहिंसा** - क्रोधाद्वा क्रीडार्थं वा प्राणिहिंसा अकरणं कायिक्यहिंसा । तदाह बृहस्पतिः –

[१४]अहिंसकानि भूतानि दण्डेन विनिहन्ति यः ।
आत्मनः सुखमन्विच्छन् न स प्रेत्य सुखी भवेत् ॥

आत्मसंरक्षणार्थं, हिंस्रपशूनां आक्रमणेन अन्येषां संरक्षणार्थं तेषां हननं युज्यते, न पुनः विनोदार्थम् । अत एव दिलीपादिज्ञानिराजानः मृगयां प्रति गच्छन्ति स्म । अन्यथा वने हिंस्रपशूनामेव सङ्ख्या अधिकं भवति । यदा हिंस्रपशूनां सङ्ख्या वने अधिकं भवति तदा ते वने आहारं अप्राप्य समीपपल्लीस्थबहूपयोगिगोमहिषादीनां भक्षणं कुर्युः । अतः प्रकृतौ समत्वरक्षणार्थं मृगया इति प्रक्रियां आचरन्ति स्म । "लिप्यते न हि दोषेण नचैतत्पातकं विदुः`` इति विषयमेतत् समर्थितमपि ।

**वाचिक्यहिंसा** - यत्सतां अत्यन्तहितप्रदं तादृशवाग्व्यापारः वाचीकी अहिंसा इति गीयते। कठोर-कटु-तीक्ष्ण-अवाच्य-पदानां वाक्यानां प्रयोगः अत्र निषिध्यते । प्रियवाक्यप्रयोगः अत्र विधीयते । एवं रूपेण अत्र वाचिक्यहिंसायाः स्वरूपः कथितः ।

**मानसिक्यहिंसा-** मनसापि अन्येषां पापाचिन्तनं रागद्वेषाणां अनिग्रहणं मानसिकी- अहिंसा इति कथ्यते । रागद्वेषत्यागः कठिनतमविचारः । मनसा अपि पापचिन्तनं न कर्तव्यम् इति विचारः कष्टकरः । अतः मानसिक्यहिंसा आचरणं कठिणतमम् इति विद्वांसैः अङ्गीक्रियते ।

**जैह्वीक्यहिंसा** - मांसभक्षणं जैह्विकी हिंसा भवति । तच्चोक्तम्

[१५]स्वमांसं परमांसेन यो वर्धयितुमिच्छति ।
नारदः प्राह धर्मात्मा नियतम् सोऽचसीदति ॥

अतः यःअध्यात्मज्ञानं शास्त्रज्ञानं वा अर्जितुमिच्छति, तेन अवश्यं मांसभक्षणं

त्याज्यम्। ननु ऋषयः महाभारतादिकालेषु मांसभक्षणं चक्रुः, अथापि ते आध्यातिमिकौन्नत्यं प्रपतुः। अतः आध्यात्मसिद्दयै मांसभक्षणत्यागः नानिवार्यकर्म इति केचन आक्षिपन्ति । सत्यम्, ऋषयः मांसभक्षणं चक्रुः।परन्तु तदा मांसभक्षणं कृत्वापि आध्यात्मौन्नत्यसाधनसामर्थं तेषां आसीत् । अथ च स युगान्तरविषयः सनातनपद्दतौ प्रतियुगं कालानुरोधेन विभिन्ननियमाः धर्मशास्त्रे विहिताः। तदनुरोधेन विप्राणां आध्यात्मौन्नत्यमिच्छतां मांसभक्षणं कलियुगे सर्वथा निषिद्धमेव। अन्यैरपि हिंसाकारणतः त्याज्यं मांसभक्षणम् । ननु अह् मया हिंसा न विधीयते, यः कोपि घातयति , मया तु मांसः केवलं भक्ष्यते , मम पापं नास्ति इति वादः मनसि जायते । तस्यापि उत्तरं महाभारते समुल्लिखितं । वधः त्रिविधः भवतुमर्हति – १) यः धनेन मांसं क्रीणाति सः हन्ता ,२) यः खादति सोपि घातकः ,३) यः घातयति बन्धयति सोऽपि हन्तकः । अन्यच्च -

[१६]यदि चेत्खादको न स्यात् न तदा घातको भवेत् ।
घातकः खादकार्थाय तं घातयति वै नरः ॥

अतः यदि वयं न मांसं न भक्षयामः तर्हि हिंसा निवर्तते । अतः मांसभक्षणं न कर्तव्यं इति भावः । अन्यच्च कारणं निरूपितं तत्रैव -

[१७]मां स भक्षयते यस्मात् भक्षयिष्ये तमप्यहम् ।
इति मांसस्य मांसत्वं ................................ ॥

अतः भयनिमित्तेन वा पापनिमित्तेन वा अहिंसावृतरूपकारणेन वा मांसभक्षण – अकरणं श्रेयः इति महाभारताभिप्रायः ।

**योगशास्त्रे अहिंसा**

योगसूत्रस्य साधनपादे यमनियमाः अवश्यम् अनुष्ठेयाः इति न्यरूपि

[१८]अहिंसासत्यमस्तेयब्रह्मचर्यापरिग्रहाः यमाः इति यमेषु अहिंसायाः प्रथमस्थानं प्रदत्तम्। तत्रैव अहिंसासाधनेन परिपक्वस्य पुरुषस्य माहात्म्यमपि उक्तं [१९]"अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः`` इति । अस्यार्थः अहिंसावृतेन परिपक्वस्य पुरुषस्य परिसरे वैरभावः,द्वेषभावः अपगच्छति । भाष्यकारः सर्वप्राणिनां भावति इति भाष्यं जगाद। अस्यार्थः न केवलं मनुष्याणां, हिंस्रपशूनां मिथोपि वैरत्यागः भवति। सिंहः हरिणश्च ,नकुलः सर्पश्च एकत्र निवसन्ति। अतः पूर्वं ऋष्याश्रमे हिंस्राः साधवश्च प्राणिनः एकत्र वैरभावं त्यक्त्वा निवसन्ति स्म इति श्रूयते ।

**द्वैतमते अहिंसा**

द्वैतमतस्थापकमध्वाचार्याः स्वरचिते तन्त्रसार [२०]" अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहौ यमाः" इति अहिंसायाः स्वरूपं अपूर्वतया आविश्चक्रुः। ब्राह्मणवैश्यशूद्राणां च दण्डाधिकारः नास्त्येव। क्षत्रियाणां विशेषतः दण्डाधिकारः अस्ति इति आचार्येण निरटङ्कि । उक्तञ्च महाभारततात्पर्यनिर्णये –

[२१]शरीरदण्डसन्त्यागः पुत्रभार्यादिकान् ऋते ।
तत्रापि नाङ्गहानिस्यात् वेदना वा चिरं न तु ॥

विप्रस्य सामस्त्येन दण्डत्यागः । किन्तु पुत्रस्य शिष्यस्य च शिक्षणादिविषये दण्डनार्हताऽस्ति । परन्तु दण्डेन तेषामङ्गवैकल्यं, अङ्गहानिः वा चिरवेदना च न भवेत्। अतः उपवासादिलघुदण्डः दातुं शक्यते । सा हिंसा इति न कथ्यते इति भावः । अन्यच्च [२२]"शरीरदण्डविषये वैश्यादीनां च विप्रवत्"यदि क्षत्रियाणाम् अहिंसा विधीयते तर्हि लोकव्यवस्थायां नीतिव्यवस्थायां च अव्यवस्था स्यात् । मांसभक्षणमपि सर्वेषां निषिद्दम् इति कस्मिन्नपि स्मृतिग्रन्थे उत् गृह्यसूत्रे धर्मशास्त्रग्रन्थे वा नोक्तः । सर्वत्र विप्राणां मांसभक्षणाधिकारः नास्ति ।अपि च इतराणां मांसभक्षणं न श्रेयस्करम् इत्येव

विहितम् । आचार्योपि भागवत्तात्पर्ये –

[२३]घ्राणभक्षोऽथवा यज्ञे दैवे सर्वस्य चेष्यते ।

क्षत्रियादेः न विप्राणां विप्रो दोषेण लिप्यते ।

इति अश्वमेधयज्ञादिषु मांसभक्षणं विहितमपि घ्राणभक्षणं एव कुर्यात्। क्षत्रियाणां तु मांसभक्षणं न् दोषाय इति तात्पर्यम्।

**अर्वाचीनानां दृष्ट्या अहिंसा**

आधुनिकभारते अहिंसव्रतप्रवर्तकः वर्यः महात्मा गान्धीजी इति विदितप्रायमेव। 'अहिंसया हिंसां निवारयेत् इति तस्य मतम् '। तस्य विचारसरणिः इत्थमस्ति "मम महाभारतस्य कृष्णः नेष्टः ,किन्तु भगवदीतायाः कृष्णः इष्टः "। अथ च महाभारते युद्धनिरूपणं कृतम् ।अतः पाण्डवकथा न एतिहासिकी ।"यदी एकः पुरुषः कपोले ताडयति चेत् अपरं कपोलं ताडनार्थं प्रदर्शयतु" इति तस्य प्रसिद्दं वाक्यम् । "आदर्शपुरुषोऽपि रामः अन्ते रावणेन साकं युद्धं कृतवान् इति खेदकरः विषयः।" जुलै ४,१९४० अमृतबजार् इत्याख्यपत्रिकायां ब्रिटन् प्रधानमन्त्रिणं प्रति सन्देशं प्रकटितवन् यत् "हिट्लर् महोदयाय इङ्ग्याण्ड देशं समर्प्य, द्वितियविश्वयुद्दविरामवार्तां घोषयन्तु" इति । तस्य वाक अत्र उल्लिखितमस्ति -

"I appeal for cessation of hostilities because war is bad in essence. You want to Nazism , your soldiers are doing the same work of destruction as the Germans. I want you to fight Nazism without arms, or with non-violent arm . Invite Herr Hitler and Signor Mussolini to take what of the countries you call your possession. You will give all these but not your souls, nor your minds"

तात्पर्यन्तु हे आङ्ग्लाः भवन्तः हिट्लर् महोदयस्य सन्येन साकं निरायुधेन वा अथवा अहिंसाख्यायुधेन वा युद्धं कुर्वन्तु । एष एव धीरसैनिकानां युद्धमार्गः । ते

भवतां देशं आक्रमन्ति किल क्रियतां नाम, सर्वं दीयतां, विना आत्ममनांसि । एतेन युद्देन लोकस्य मरणं निवारयितुं शक्यते इति । जन्मभूमिः नाम जननी एव । पराक्रमणं नूनमस्माभिः युद्धादिना निवार्यम् । परन्तु अत्र एतत्वादसरणिं श्रुतवतः अत्यन्तमन्दस्यैव अत्र प्रश्नः समुदेति , "मातुः मानहरणसमये पुत्रः हिंसया तं निवारयेत् अथावा अहिंसाख्यायुधेन युद्धं कुर्यात् "इति। अहो महात्मनः विचारमाहात्म्यम् ।

### वचनधर्मे अहिंसा

वचनकारः बसवण्णः दयेये धर्मद मूलवय्या इत्युक्त्या परोक्षेण अहिंसां प्रतिपादितवान् । सर्वभूतेषु दया कार्या । हिंसा न कार्या। अहिंसा एव सर्वथा अनुष्ठेया इति तस्य मतम् । तथैव वचनकारेष्वन्यतमः शरणदसरय्यः वृक्षेभ्यः पुष्पाणां छेदनमपि हिंसा एव भवति। तदर्थं वृक्षेभ्यः पतितपुष्पाणामेव ग्रहणं कार्यम् इति स्ववचनेऽपि तीव्ररूपेण अहिंसां प्रतिपादितवान् ।

### क्रैस्त - इस्लां मते अहिंसा

क्रैस्तमते अहिंसा सर्वप्रयत्नेन अनुष्ठेया इति प्रतिपादितम् । बुभुक्षितवैरिभ्यः अपि आहारं दातव्यं । प्रीत्या एव सर्वं साधितं भवति । अतः न तेषां हननं कार्यम् इत्येवं रूपेण अहिंसा प्रतिपादिता । इस्लां मतम् अहिंसां प्रतिपादयति इति तन्मतानुयायिनः आहुः। इस्लां नाम शान्तिः तथैव अहिंसा इत्येव इस्लां मतानुयायिनः व्याख्यानं कुर्वन्ति । अहिंसा भगवतः अन्यत् नाम इति फ़ात् उल् बरी नामकग्रन्थे न्यरूपि। तत्रापि हिंसा अकरणमेव पुण्यकारणमिति प्रतिपादितम्। भगवता परोपकाराय देहः दत्तः वर्तते । सर्वथा हिंसा न कार्या इति तेषां धर्मबोधकेष्वन्यतमः अबुदावुद् सुलैमान् अल् अज्दि इत्यनेन प्रतिपादितम् । परन्तु तत्रैव एकदेवविचारं ये

नाङ्गीकुर्वन्ति ते निश्चयेन हन्तव्याः इत्यपि निरूपितं वर्तते । अत्र हिंसा अहिंसाविषयेषु विवादः वर्तते इव दृश्यते ।

**उपसंहारः**

अहिंसा परमो धर्मः इत्यस्य अहिंसापि परमो धर्मः इत्यर्थः। क्वचित् हिंसापि विहितमेव। सामान्यतः भ्रूणहत्या पातकं मता। किन्तु प्रसूतिकाले यदि शिशुः योनिमार्गे बाधारूपेण आगच्छेत् तर्हि तस्य च्छेदनमेव इष्यते । तत्र हिंसा एव साधु । अति-अहिंसावादिनः केचन मताचार्याः नैकान् क्षत्रियराजान् स्वमतियान् कृत्वा, अहिंसाबोधनं चक्रुः। नपुंसकक्षत्रियान् असृजन् । तत्परिणामेन अशोकराजानन्तरकाले भारतदेशः अरबाणां म्लेच्छानां च आक्रमणं सोढुं असमर्थः जातः । अतः अहिंसाचारणं व्यक्तिस्तरे विहितधर्मः। समूहस्तरे राष्ट्रस्तरे वा तस्य विधानम् अश्रेयस्करम् । गीताचार्यपन्थानुसारी श्रीशिवाजीमहाराजः हिन्दूसाम्राज्यं स्थापितवान् । अहिंसायाः आचरणे श्रीकृष्णमतं नूनमवलम्बनीयम् इत्यनेन ज्ञायते ।

**सन्दर्भग्रन्थाः**

१) मध्वविजयव्याख्या ५/८ । संवत्सरः – २०१०। रचयिता - विश्वपतितीर्थाः। सम्पादकः - एस्.आर्. पाण्डुरङ्गिः । प्रकाशनसंस्था – द्वैतवेदान्ताध्ययनसंशोधन-प्रतिष्ठानम् बेङ्गलूरु

२) अग्निपुराणम् ३७२/२ । संवत्सरः -२००९ । रचयिता – महर्षिवेदव्यासः । प्रकशनसंस्था –गीताप्रेस् गोरखपुर।

३) तन्त्रसारसङ्ग्रहः ४/१३७ । संवत्सरः – २००९ । रचयिता – मध्वाचार्यः । सम्पादकः – डा. तिरुमल कुलकर्णिः । प्रकाशनसंस्था – पूर्णप्रज्ञसंशोधनमन्दिरम् बेङ्गलूरु ।

४) महाभारतम् । संवत्सरः – १.१.१३ । रचयिता - महर्षिवेदव्यासः । सम्पादकः – पि .एस् शेशगिरि आचार्यः । प्रकाशनसंस्था – तत्वसंशोधनसंसत् उडुपि ।

५) कूर्मपुरणम् ११.१४। संवत्सरः -२०१६। रचयिता - महर्षिवेदव्यासः । प्रकाशनसंस्था –गीताप्रेस् गोरख् पुर् ।

६) तत्वार्थसूत्रम् । संवत्सरः -२०११। रचयिता – उमास्वमी । सम्पादकः – विजय् के जैन् । प्रकशनसंस्था –वीरशसनसङ्घ . कल्कत्ता ।

७) योगसूत्रम् ३४ । संवत्सरः -२००६ । सम्पादकः – प्रो. के.एस्.अर्जुन वडकर । प्रकशनसंस्था –भण्डार्कर् ओरियण्टल् रिसर्च इन्स्टिट्यूट् . पुणे ।

८) योगसूत्रम् ३५। संवत्सरः -२००६ । सम्पादकः – प्रो. के.एस्.अर्जुन वडकर । प्रकशनसंस्था –भण्डार्कर् ओरियण्टल् रिसर्च इन्स्टिट्यूट् . पुणे ।

९) योगसूत्रम् ३७ । संवत्सरः -२००६ । सम्पादकः – प्रो. के.एस्.अर्जुन वडकर । प्रकशनसंस्था –भण्डार्कर् ओरियण्टल् रिसर्च इन्स्टिट्यूट् . पुणे ।

१०) योगसूत्रम् ३८। संवत्सरः -२००६ । सम्पादकः – प्रो. के.एस्.अर्जुन वडकर । प्रकशनसंस्था –भण्डार्कर् ओरियण्टल् रिसर्च इन्स्टिट्यूट् . पुणे ।

११) योगसूत्रम् ३९ । संवत्सरः -२००६ । सम्पादकः – प्रो. के.एस्.अर्जुन वडकर । प्रकशनसंस्था –भण्डार्कर् ओरियण्टल् रिसर्च इन्स्टिट्यूट् . पुणे ।

१२) तत्वार्थसूत्रव्यख्या ७.१३ । संवत्सरः -२००९ । रचयिता –भास्करानन्दः । सम्पादकः – पं.सुखललजी सङ्घ्वी । पर्श्वाथविद्यापीठम् वारणासी

१३) महाभारतम् । संवत्सरः –२०१२। रचयिता - महर्षिवेदव्यासः । सम्पादकः –पि .एस् शेशगिरि आचार्यः । प्रकाशनसंस्था – तत्वसंशोधनसंसत् उडुपि ।

१४) महाभारतम् । संवत्सरः –२०१२। रचयिता - महर्षिवेदव्यासः । सम्पादकः –पि

.एस् शेशगिरि आचार्यः । प्रकाशनसंस्था – तत्वसंशोधनसंसत् उडुपि ।
१५) महाभारतम् । संवत्सरः –२०१२ । रचयिता - महर्षिवेदव्यासः । सम्पादकः –पि .एस् शेशगिरि आचार्यः । प्रकाशनसंस्था – तत्वसंशोधनसंसत् उडुपि ।
१६) मनुस्मृतिः । संवत्सरः –२०१३ । रचयिता – मनुः । सम्पादकः – शिवरज आचार्यः । प्रकाशनसंस्था – चौखम्भा विद्याभवन वारणासी ।
१७) योगसूत्रम् २.३० । संवत्सरः -२००६ । सम्पादकः – प्रो. के.एस्.अर्जुन वडकर । प्रकशनसंस्था –भण्डार्कर् ओरियण्टल् रिसर्च इन्स्टिट्यूट् . पुणे ।
१८) योगसूत्रम् २.३५ । संवत्सरः -२००६ । सम्पादकः – प्रो. के.एस्.अर्जुन वडकर । प्रकशनसंस्था –भण्डार्कर् ओरियण्टल् रिसर्च इन्स्टिट्यूट् . पुणे ।
१९) तन्त्रसारसङ्ग्रहः ४/१३७ । संवत्सरः – २००९ । रचयिता – मध्वाचार्यः । सम्पादकः – डा. तिरुमल कुलकर्णिः । प्रकाशनसंस्था – पूर्णप्रज्ञसंशोधनमन्दिरम् बेङ्गलूरु ।
२०) महाभारततात्पर्यनिर्ण्यः । संवत्सरः – २०११ । रचयिता – मध्वाचार्यः । सम्पादकः –पं.हयवदनपुराणिक आचार्यः । प्रकाशनसंस्था – पूर्णप्रज्ञसंशोधनमन्दिरम् बेङ्गलूरु ।

विनय कुमार
शोधच्छात्रः, कर्नाटकसंस्कृतविश्वविद्यालयः, बेङ्गलूरु
Ph.no 7975377382
Email – vinaykumardesai1991@gmail.com

❑ ❑ ❑

# संस्कृतच्छात्राणां बुद्धिविकासे संगणकसहकृताधिगमस्य (ICT) उपयोगिता

**चन्दन पाल्**

वैचित्रस्मिन्संसारे प्राणीसमूहेषु मानवः श्रेष्ठः जीव इति परिगण्यते। बुद्धिक्षमतास्ति इत्यस्मात् कारणेन ते श्रेष्ठाः। मनुष्याणां परस्परविचारविनिमयव्यापारः न प्रकाशपथवतरेत् यदि जगतीतले भाषा नाम न स्यात्। यद्यप्यन्ते जन्तवोऽपि स्वस्वध्वनिविशेषं प्राप्नुवन्ति तथापि ज्ञानेनैव प्राप्तश्रेयस्को मानव एवं व्यवस्थितध्वन्यङ्गैरभिव्यक्तवर्णात्मकं शव्दं भाषामाणो भाषावान् भवति। सामान्यरूपेण भाषानाम भावाभिव्यञ्जनमेव। अस्याः दृष्टेः अनुसारं पशुपक्ष्यादीनाम् आलापोऽपि भाषेति प्रकथ्यते। इङ्गितऽपि भाषा भवति। भाष्यते अनेन भाषा इत्यत्र भाष् व्यक्तायां वाचि इति धातुना निष्पन्नोऽयं शब्दः अभिव्यक्तावाणी इति पदस्य अर्थस्य सुस्पष्टः। तत् उच्चारित वाचिकभाषायामेव सम्भवः वरिवर्ति यत्र च सुक्ष्मातिसुक्ष्मार्थवोधकध्वनिसङ्केतानाम समूहः विद्यते। अस्माकं स्वाधीनभारतवर्षे वहुभाषा मानवाः भाष्यते तथ्यते च। भाषाद्दष्टा जनाः निवसन्ति। वयं सर्वे जानिमः सर्वेषां भाषाणां जननीभवति संस्कृतभाषा। संस्कृतभाषात् एव सर्वेषां भाषाणां सृष्टिः जाता। प्राचीनकालात् आरभ्यः एका एव भाषया छात्राणां पाठदानमासीत् तद् भवति संस्कृतभाषा। संस्कृतभाषया ये पठन्ति ते भवन्ति संस्कृतछात्राः ये पाठयन्ति ते भवन्ति संस्कृताध्यापकाः। प्राचीनकाले गुरुगृहे विद्यार्जनार्थं केवलं ब्राह्मणानां अनुमतिमासीत् जातीगतभेदकारणात्। कालान्तरगते वा इदानीं सर्वेषां समानरूपेण अध्ययणार्थं अनुमतिः कल्प्यते। पठनार्थं छात्राणां मध्ये किमपि भेदः नदृश्यते। सर्वेषां कृते समानं

अवसरं कल्पते। प्राचीनकाले केवलं कण्ठस्थकरणमाध्यमेण शिक्षाप्रदानमासीत् परन्तु इदानीं तु विभिन्न आधुनिकयन्त्राणां तन्त्राणां तथा प्रणाली उपागमस्याधारेण अध्यापकाः छात्राणां पाठयन्तः अस्ति। प्रत्यादिनं शिक्षापद्धत्याः उन्नतिः वा सुधारः भवति। तत्र आधुनिकयन्त्रणां सहायेन पाठनेन छात्राणां कृते लाभदायकं भवति न वा एवञ्च छात्राणां बुद्धिविकासः भवति न वा तद् आग्रे आलोच्यते

❖ **बुद्धिः**

बुद्धिः मनुषस्य जन्मनात् क्षमता। अयं क्षमता वहिस्तात् द्रष्टुं न शक्यते। आचरणमाध्यमेण ज्ञातुं शक्यते वयम्। बुद्धिः एकः एतादृशः शब्दमस्ति,येषां उपयोगं वयं स्मरणार्थं, शिघ्रं किमपि शिक्षणार्थं, तार्किकचिन्तनार्थं, विषयावगमनार्थञ्च व्यवहारं कृयते। बुद्धिः प्रत्यक्षरूपेण द्रष्टुं नशक्यते। परन्तु बुद्धिः इत्यस्य प्रभावमस्ति वा न तत् मन्दबुद्धिः प्रभावशालीबुद्धिः अनयोर्मध्ये विभाजनं करोमि चेत् ज्ञातुं शक्यते। मनोविज्ञानशास्त्रानुसारेण बुद्धिः वंशानुक्रमानुसारं निर्धारणं भवति परन्तु वंशानुक्रम केवलं बुद्धि इत्यस्य प्रसारः परिसीमाश्च निर्धारयति। मनोवैज्ञानिकेषु बुद्धिशब्दस्य उपयोगः सामान्यार्थात् विशेषऽर्थेशु उपयोगं भवति। बुद्धिक्षमता इत्यस्य विकास कथं भवति एतस्य निर्धारणं वातावरणम् द्वारा कर्तुं शक्यते। विविधेषु जीवेषु मानवः बुद्धिकारणादेव श्रेष्ठः भवति। बुद्धि एव मानवः पशुभ्यः पृथककरोति। विश्वबाङ्मयदर्शनेषु पुरातने भारतीयबाङमयेऽपि वहवः विद्वांसानां मतम् तत्र उल्लेखितमस्ति। बुद्धिरन्तः करणस्याङ्गरूपेणपि मन्यते। आधुनिकयुगे बुद्धिर्ज्ञानरूपा मन्यते। उदाहरणरूपेण वदामः श्चेत् कश्चन बालकः स्वकीयं पाठ्यविषयः शीघ्रम अवगच्छन्ति चेत् सः बुद्धिमान बालकः इति वक्तुं शक्यते एवञ्च कोऽपि छात्राः यदि प्रश्नस्य शीध्रम उत्तरं वा समाधानं ददन्ति श्चेत् सःमेधावी बालकः वक्तुं शक्यते वयम्।

❖ **बुद्धेः परिभाषाः -**

1. विद्वांसः बुद्धिम् एवं परिभाषन्ते -**नवसु परिस्थितिषु आत्मसायोजनयोग्यतैव बुद्धिः।**
2. बुद्धिः ज्ञानार्जनस्य क्षमता अस्ति –**वुडरोमहोदयः**
3. **क्रुजमहोदयानुसारम्**विभिन्नपरिस्थितिषु सम्यक् प्रकारेण -बुद्धिः नवीन - समायोजनस्य योग्यता वर्तते।

मनोवैज्ञानिकाः मानवानां तथा छात्राणां बुद्धिशक्तिः कथं वर्धनं कर्तुं शक्यते एतद चिन्तयित्वा सिद्धान्ताः निर्मिताः। अध्यापकाः सिद्दान्तानां अनुसरणेन छात्राणां बुद्धिशक्तिवर्धनार्थं मार्गं प्राप्तुं शक्यते। बुद्धिविकासार्थं अनेकाः सिद्धान्ताः वर्तते तद्यथा-

| **क्र. सं.** | **सिद्धान्तः** | **प्रववर्तकः** | **वर्षम्** |
|---|---|---|---|
| 1. | Two Factor Theory (द्वितत्तकारकसिद्धान्तः) | Charles Spearman | 1904 |
| 2. | Unifactor Theory (एककारकसिद्धान्तः) | Alfred Binet | 1905 |
| 3. | Three Factor Theory (त्रिकारकसिद्धान्तः) | Charles Spearman | 1911 |
| 4. | Group Factor Theory (समूहकारकसिद्धान्तः) | Thurstone | 1937 |
| 5. | Multifactor Theory (बहुकारकसिद्धान्तः) | E. L. Throndike | 1983 |
| 6. | Serial Factor Theory(धारावाहिककारकसिद्धान्तः) | Siril Barnan | |
| 7. | Tri Dimensional Theory | Guilford | 1967 |

| | | | |
|---|---|---|---|
| | (त्र्यायामिकसिद्धान्तः) | | |
| 8. | Sampling Theory | G.H. Thomson | |
| 9. | क - ख Factor Theory | Havv | |
| 10. | Various Types Factor | Grdner | 1960 |
| 11. | Liquid Rough Theory | R.B. Cattel | 1967 |
| 12. | बुद्धिनिर्माणसिद्धान्तः(Theory of Structure of Intelligence) | Guilford | 1965 - 1967 |
| 13. | सामाजिकबुद्धिः (Social Intelligence) | Edward Thorndike | 1920 |
| 14. | भावनात्मकबुद्धिः (Emotional Intelligence) | Dan Goleman | 1990 |
| 15. | आध्यात्मिकबुद्धिः(Spiritual Intelligence) | Danah Zohar | 1997 |
| 16. | प्रतिदर्शसिद्धान्तः | थामसनमहोदयस्य | |
| 17. | पदानुक्रमिकसिद्धान्तः | वर्नर एवञ्च बर्टमहोदयः | |
| 18. | मात्रासिद्धान्तः | थार्नडइकमहोदयः | |

**संगणकयन्त्रस्य परिचयः**

आधुनिकयुगे कृत आविष्कारेषु अन्यतम अत्यन्तं प्रभावशाली च भवति। सङ्गणकयन्त्रस्य सहायेन द्वयोः प्रान्तयोः मध्ये संयोगस्थापितुं शक्यते। सङ्गणकयन्त्रेण सर्वेषु क्षेत्रेषु महति आवश्यकता विद्यते। विशेषणेशिक्षाक्षेत्रे सङ्गणकयन्त्रं महत् परिवर्तनं आनैषीत्। शिक्षाक्षेत्रे स्वल्पसमये अनेकान् छात्राणां पाठयितुं शक्यते छात्राणां पाठाः वोधयितुं शक्यते। तस्य ज्ञानात् प्राक् सङ्गणकयन्त्रसंरचना विषये किञ्चित् प्रस्तुयते। सङ्गणकयन्त्रप्रकाराः अधोनिर्दिष्टरीत्या भवन्ति।




Pc

तथैव एकस्मिन् सङ्गणकयन्त्रे त्रयः घटकाः भवन्ति।

1. Input
2. Output
3. C.P.U

उदाहरणार्थम्- की बाई घटकेऽस्मिन् सङ्गणकयन्त्रस्य उपयोगकर्ता विभिन्नान् विचारान् सङ्गणकस्यान्तः स्थापयति। एतदर्थं यानि साधनानि उपयुज्यते तानि Input नाम्ना उच्यते।

Input is a devise to information instructions text etc. In a computer system or Pogroms.

Ex. Key Board

केन्द्रियप्रकम् Central Processing unit (C.P.U)

Input द्वारा अन्तः प्रेषितानां विषयाणां सम्पूर्णकार्यविधिनं घटकेऽस्मिन् भवति।

अतैव घटकोऽयं अत्यन्तं प्रमुकम्। अत्र एते भागाः भवन्ति-
Central Processing unit (C.P.U) is the brain and heart of a computer which performance at processing Operation.

**स्मृतिव्यवस्था(Memory System)**

सङ्गणकयन्त्रान्तः प्रेषितविषयाः साङ्केतिकरूपेण अस्मिन् उपघटके संरक्षन्ते।

This is the storage place of computer in which electrical circuit system which functions in a similar manners human brain works.

**अङ्गणितीयविभागः**(Arithmetic & Logical Unit)
अत्र अङ्गणितीयविभागःMemory system मध्ये स्तापितविषयाणामुपरि प्रयुज्यन्ते।
ALU is digital circuit Which carries out all sorts of arithmetical calculations like addition subtraction multiplication and division and logical decisions. I. e Comparisons.

**नियन्त्रणभागः(Control Units)**
केन्द्रियकार्यप्रणालीनां नियन्त्रणं सञ्चालनञ्च अत्र भवति।
Cu Control Directs and supervises the functions of all hardware Operations.

3. Output – Output साधनानि सङ्गणकयन्त्रोपयोक्तै फलितांश नैकान्

विषयांश्च प्रदास्यन्ति।

Output devises give the result or information to the user.

आत्र गणकद्वयमस्ति।

क. Hard Copy ख .soft copy

Output साधनानि त्रिधा विभक्तुं शक्यते।

Output

Display output Devises
1. VDC (Monitor
2. L.C.D

Printing Output devises
1. Printers
2. Plotters

Speech Output
1. Speakers
2. Head Phone

❖ **ICT इत्यस्य सामान्यपरिचयः**

ICT इत्यस्य आङ्गलभाषया Information comminution Technology इति उच्यते। आधुनिकयन्त्राणां नाम संगणकयन्त्रम् दूरवाणी, अन्तर्जालः(Application, Apps) विभिन्न यन्त्रणां तन्त्राणां समन्वये सम्पर्कस्थापनाय एक माध्यमः भवति ICT । येषां सहायेन तथ्य संग्रहणं, विश्लेषणं, सरक्षणं कर्तुं शक्यते। प्राचीनकाले तु छात्राः गुरुकुलमध्ये भाषणकौषलमाध्यमेन

पठन्तः आसीत्। गुरुमुखात् विषयः श्रुत्वा श्रुत्वा एव कण्ठस्थिकुर्वन्तः आसीत्। छात्राणां मुल्याङ्कनमपि भाषणकौषलमाध्यमेन आसीत्। आधुनिककाले या शिक्षाप्रचलति ताः नवीन शैल्याः कथ्यन्ते। अध्यापकः आधुनिकोपकरणम् उपयुज्य संस्कृतं पाठयति छात्राणाम् ।अनेन संस्कृतविषयावगमनम् सरली भवति। छात्राः तथा अध्यापकाः पठने आनन्दं प्राप्स्यन्ति। छात्राणां रूचिवर्धनं भवति। संस्कृतपठनार्थं आधुनिकपोकरणं तथा ICT अत्यन्तं आवश्यकम्।

१९८० तमे सम्वत्सरे शैक्षनिकशोधकैः प्राकप्रथमत्वया व्यवहृतम् परन्तु १९९७ सम्वत्सरे सर्वकारैः दत्तं प्रतिवेदनैः अयं शब्दः प्रसिद्धाप्राप्ताः। पुनः २००० तमे सम्वत्सरे आमेरिकायां राष्ट्रियपाठ्यपुस्तके समविष्टम्। आधुनिकयुगे आधुनिक यन्त्राणां सहायेन Application, Apps, Link, माध्यमेन संयोगस्थापनं भवति दृश्यश्रव्योपकरणस्य माध्यमेण छात्राणां पाठनं मूल्याङ्कनं अपि भवति। ICT इत्यस्य आगमनेन अर्थनैतिकव्यायः न्युनं जातम्। छात्रेभ्यः भाषाशिक्षणार्थम्, विषय अधिगमसम्पादनार्थं विषयस्य स्पष्टीकरणार्थं च प्रतिकृतिचित्रादीनां दृश्यश्रव्योपकरणानां प्रयोगः एव सामग्रिशब्देन स्वीक्रियते। सूचनासम्प्रेषण प्रदानार्थं ICT इत्यस्य आधारितयन्त्रणां तन्त्राणां व्यवहृयते। ऐच्छिकरूपेण विराजमाने वर्तमानकालिकसंस्कृतशिक्षणे अध्ययने च नूतनविधिना साकं दृश्यश्रव्यसाधनानां प्रयोगः संस्कृतज्ञैः क्रियते। संस्कृतभाषा सरलतया प्रयोक्तव्या, जनानां मनसि संस्कृतभाषा कठिनेति भावना दूरीकरणीया। निरसकक्षा सरसः करणार्थं ICT यन्त्रणां उपयोगं कृयते उपकरणरूपेण। भाषाशिक्षणार्थं, पाठितविषयः अवगमनार्थं बहवः उपायाः सन्ति। तेषु अन्यतमः दृश्यश्रव्योपकरणानां प्रयोगः। 'फ्रोबेल्', 'मण्टसेरी' च नवीनशिक्षणपद्धतिषु दृश्यश्रव्यसाधनानाम् उपयोगस्य सर्वाधिकं महत्त्वपूर्णं स्थानं

प्रदत्तम्। दृश्यश्रव्यसाधनानां प्रयोगेण अध्ययनं प्रभावशाली रोचकञ्च भवति। संस्कृतभाषाशिक्षणे दृश्यश्रव्यसाधनानां प्रयोगः कर्तव्यः। एतेषां साधनानां प्रयोगेण संस्कृतशिक्षणं रोचकं भवति छात्राश्च संस्कृतं प्रति अत्यधिकमाकृष्टा भवन्ति। विषयः शीघ्रमवगच्छति, पठनाय जामिता न भवन्ति। पठनाय रूचिः वर्धनं भवति। छात्राणां बुद्धिविकासः भवति। छात्राणां विषयमगमनाय वहवः उपकरणं सहायं कुर्वन्ति तदुपोकरणानां विभागद्वये विभक्तुं शक्यते ते यथा- दृश्योपकरणं अपरः श्रव्योपकरणं च। दृश्योपकरणं श्रव्योकरणान्तर्गते के के भवन्ति निम्ने लिखामः

**दृश्योपकरणानि(Audio-visual Tools)**

वर्णनां, पदार्थानां स्वरूपं प्रदर्शयितुम् उपयुज्यमानानि साधनानि दृश्यसाधनानि भवन्ति।

१ श्यामफलकम् (Black Board)।

२ मानचित्रम् (Map)।

३ आलेखः (Graph Paper)।

४ प्रातिरूपम् Model)।

५ स्फोरकपत्रम् (Flash Card)।

६ चित्रम् (Picture)।

७ रेखाचित्रम्(Black Board Sketch)।

८ पट्टिका (Chart)।

९ भित्तिचित्रम्(Wall Chart)

१० संग्रहालयः(Museum)

**श्रव्योपकरणानि**

विभिन्नान् ध्वनीन् शब्दान् च श्रोतुमुपयुक्तानि साधनानि श्रव्यसाधनानि भवन्ति।

१ आकाशवाणी (Radio )

२ ध्वनिपट्टिका (Tape-Recorder)

३ ध्वनियन्त्रम् (Gramophone)

दृश्यश्रव्योपकरणानि -द्रष्टुं, श्रोतुञ्च उपयुक्तानि दृश्यश्रव्यसाधनानि भवन्ति।

1 नाटकम् (Drama)

2 चलनचित्रम् (Cinema)

3 दूरदर्शनम् (T.V.)

4 सङ्गणकयन्त्रम् (Computer)

एतेषां कुत्र विशिष्टोपयोगः इति विविच्यते-

1 **संस्कृतभाषायाः काठिन्यापनोदनाय** – संस्कृतस्य काठिन्यनिवारणाय अस्य आवश्यकता वरीवर्ति। संस्कृतशब्दानां सामान्यवाक्यानां च अध्यापने प्रत्यक्षपद्धतिः उपयोक्तव्या।

2 **संस्कृतपदानाम् अध्यापने** – विविधसंस्कृतपदानां, नामवाचकानाम् अवगमने मूलवस्तूनि उपयुज्यन्ते चेत् तानि सौलभ्येन अवगम्यन्ते।

3 **संस्कृतशब्दोच्चारणशिक्षणे** – अनेन बालकः स्वस्य उच्चारणगतं दोषं दूरीकृत्य समीचीनतया वक्तुं चेष्टते। श्यामपट्टस्य उपयोगः अत्र बाहुल्येन कर्तुं शक्यते।

4 **वार्तालापशैलीशिक्षणे** – भाषणकलाकुशलः जनः यत्र कुत्रापि स्थितान् जनान् प्रभावयितुं शक्नोति। आकर्षकसंस्कृतवार्तालापशैलीं शिक्षयितुं ध्वनिपट्टिका

उत्तममुपकरणं भवितुमर्हति।

5 **गानकलाशिक्षणे** – कालिदासादीनां श्लोकानां, गीतानां च शिक्षणं टेप् रिकार्डर्, रेडियो, दूरदर्शनयन्त्रम् इत्यादिभिः उपकरणैः कर्तुं शक्यते ।

❖ **दृश्यश्रव्योपकरणैः अध्ययनस्य आवश्यकता** (Need of the study)

यद्यपि संस्कृतभाषाविकासः नैकैः उपकरणैः कौशलैश्च प्रभावितं भवति। तथापि दृश्य- श्व्योपकरणानाम् अस्ति कश्चन विशेषः। कौशलेषु प्रधानतमं कौशलं श्रवणं भवति, भाषा सम्भाषणेन खलु अन्यस्य श्रवणं तदनन्तरम् एकस्य भावः इतरं सम्प्रेषितो भवति। अत्र श्रवणमपि मुख्यं भवति। यदा स्वयं सम्भाषणस्य प्रभावं परिमापयामः तदा भावः समीचीनतया परस्परमासादितो वा न वा इत्यपि मापयामः। विद्यालयेषु पारम्परिकतया पाठ्यमाने विषये रूचिः न भवति। यतोहि केवलं मुखकथनेन वाचोभङ्ग्या विषयस्य प्रतिपादनं छात्राणामवगाहस्तरम् अधिरोहति। अतः प्रकृतये दृश्यश्रव्योपकरणयोः पाठनं छात्राणां महान्तमुपकारं जनयेत् इति मत्वा अनुसन्धात्रा अयं विषयः आश्रितः।

साम्प्रतं विद्यालयेषु पाठनाय दृश्य-श्रव्योपकरणानि बहुशः उपलभ्यन्ते तेषु संस्कृतमुद्रिकाः देशात्मकबोधकगीतमुद्रिकाः प्रभृतयः उपकारकाः प्रधानतया विद्यन्ते।

तदानुसारं स्वीकृतविषयसम्बद्धसाहित्यस्य अध्ययनं कृतम्। यत् द्वितीयाध्याये प्रस्तुतम्। अग्रे च तृतीयाध्याये सामग्रीसंकलनविवरणं, चतुर्थे मापनपद्धतिः निर्माणम्, विश्लेषणञ्च विहितम्। पञ्चमे सारांशः निष्कर्षः भाविसूचना न प्रदर्शितः।

❖ **अध्यापनयोजनान्तर्गते दृश्यश्रव्योपकरणानि**

अस्माकम् अध्यापनकल्पनानुगुणं छात्रस्तरानुगुणञ्च दृश्यश्रव्योपकरणानि परिकल्पियितुं शक्यन्तेएतानि सन्दर्भानुगुणं सामुहिकवैय्यक्तिकाध्यायनार्थम् उपयोगाणि

भवन्ति। अध्यापनकल्पनायाम् उपयुक्तव्यानि दृश्यश्रव्योपकरणानि शिक्षोद्देश्यानां पाठ्यांशानां पाठनविधिनामनुगुणं निश्चतव्यानि। दृश्यश्रव्योपकरणानि-अध्यापनप्रक्रियायां आनुषङ्गानि भवन्तिइति प्राचाम् अभिप्रायः। नैतत्सत्यम् नवीन मतानुसारम् एतानि अध्यापनकार्ये प्रमुखं स्थानं वहन्ति ।

❖ **अधिगमे दृश्यश्रव्योपकरणस्य आवश्यकता-**

यद्यपि संस्कृतभाषाविकासःअनेकोपकरणैः कौशलैः च प्रभावितम्अस्ति। तथापि दृश्यश्रव्योपकरणानां कञ्चनविशेषत्वं वर्तते। कौशलेषु प्रधानकौशलं श्रवणं भवति। सम्भाषणेनअन्यत्सर्वं श्रूयते भावञ्च ज्ञायते। यदा स्वयं सम्भाषणप्रभावं मापयामि तदा भावः समिचीनतया आस्वाद्यत् न वा इत्यपि परिमापयितुं शक्नुमः। विद्यालयेषु पारम्पारिकपाठ्ये रूचिः नायाति। यतोहि छात्रैः वाचा भङ्गिना च कक्षायां विषयावगमनं क्रियते। अतः प्रकृते दृश्य-श्रव्योपकरणानां पठने छात्राणां महान्तमुपकारं जनयेदितिधिया अनुसन्धाता विषयचयनं करोति। सम्प्रति विद्यालयेषु पठनपाठनाय दृश्यश्रव्योपकरणानि बहुत्र प्रयुज्यन्ते। तेषु संस्कृतमुद्रिका-देशात्मबोधगीतमुद्रिकावत् तर्कसंग्रहस्यापि चित्रफलकदर्शनेन पाठनीयम्। तर्कसंग्रहः दृश्यश्रव्योपकरणैः सम्यक् पाठयितुं शक्यते। छात्राः अवगच्छन्ति न वेति तदपि ज्ञातुं शक्यते। दृश्यश्रव्योपकरणैः प्रचाल्यमानकक्ष्यास्वरूपम्-

॥ १ ॥ कक्ष्याशिक्षणं प्रभावपूर्णम् एवञ्च रोचकं भवति।

॥ २ ॥ वातावरणं क्रियाशीलं भवति।

॥ ३ ॥ जटिलविषयः सरलंभवति।

॥ ४ ॥ झटिति अवगम्यते।

॥ ५ ॥दृश्यश्रव्योपकरणानि प्रेरयन्ति प्रभावयन्ति च छात्रान्।

एतेन अनुसन्धानं सुनिश्चितं सुसम्पन्नं च भवति। तर्हि तदाधारेण शिक्षणप्रक्रियायां व्यवहारिकपरिर्वतनं कर्तुं शक्यते अध्यापकैः, एवमेव छात्राः अपि तादृशाध्यायनेनतर्कसंग्रहस्थविषयं सम्यग्रूपेणअवगच्छन्ति,रूचिश्च जायते किञ्च स्वयम् अध्ययनेउत्सुकः भवति।

❖ **संस्कृतशिक्षणे दृश्योपकरणानां प्रभावः -**

संस्कृताध्यापने दृश्योपकरणानां महत्त्वमधिकमासीत्। तस्यां कस्याञ्चित् भाषायां वा अधिकारप्राप्तिः तद्गतभाषाव्याकरणाधीना भवति। व्याकरणाध्यायनेन विना कुशलः भवितुं न शक्नोति कश्चित्। तादृशस्य व्याकरणस्य संस्कृतभाषायां महत् प्राधान्यं विद्यते। विश्वे अतिसुन्दरं व्याकरणं संस्कृतभाषायामेव अस्ति। वेदानां षड्वस्वङ्गेषु मुखसदृशं प्रधानं भवति। किन्तु व्याकरणं कठिनं, निरसमिति केचन छात्राः बिभ्यति। अतः व्याकरणशिक्षणं रुचिकरं कर्तुं दृश्योपकरणानां साहाय्यं स्वीकर्तव्यम्। भाषाध्यापने प्रधानतया कक्ष्यायाम् उपयुज्यमानं दृश्योपकरणं श्यामफलकं भळति। श्यामफलकं तु सर्वेष्वपि विद्यालयेषु उपयुज्यते। अधिकधनव्ययस्यापेक्षा नास्तीति कारणतः श्यामफलकसौलभ्यं सर्वत्रापि दृश्यते। कक्ष्यायां श्यामफलकं विना व्याकरणशिक्षणं सुस्पष्टं न सम्भवति। व्याकरणगतसन्धिः-समास-कृत-तिङन्त-शब्दाधिकारादि प्रकरणानां प्रक्रिया श्यामफल-ककाधारेणैव बोधयितुं शक्या। अन्यथा क्लेशोत्पादकाः भवन्ति। सूत्राणि अक्षरणां संयोगः, पदच्छेदः, अनुवृत्तिः, धातूनां प्रयोगादि बहवः विषयाः वर्णचित्रद्वारा पाठयितुं शक्याः भवन्ति। चित्रं, रेखाचित्रं, सूचकचित्राण्यपि पूर्वोक्तरीत्या प्रयोक्तुं शक्यन्ते। चित्रविस्तारकः चित्रं प्रतिबिम्बयति, चित्रप्रकाशः चित्रपट्टिका, चित्रपत्रञ्च विभिन्नरूपेण व्याकरणांशान् सज्जीकृत्य अध्यापकाः छात्रेभ्यः पाठयन्ति चेत् शोभायमानं भवति पाठम्। भाषाप्रयोगशालायाः

साहाय्येन छात्राः उच्चारणशिक्षणं सम्यक् प्राप्तुं शक्नुवन्ति। **"एकश्शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुक् भवति"**इति वचनानुसारं सुशब्दज्ञानेनैव स्वर्गलोकं सिद्ध्यति। दृश्योपकरणानां प्रयोगः सुशब्दोच्चारण महद्भागं स्वीकरोति। सङ्गणकद्वारा वर्णचित्रं रेखाचित्रम्। सूचकचित्रञ्च साध्यं भवति। परन्तु साधनमिदं मूलयन्त्रं वर्तते। सर्वत्र विद्यालयेषु आर्थिकपरिस्थित्यानुगुणम् अस्य प्रयोगः सिद्ध्यति। ध्वनिचित्रसूक्ष्मिका सङ्गणकस्य परिष्कृतं परिवर्धितञ्च रूपं भवति। ध्वनिचित्रसूक्ष्मिकाया उपयोगो भारते न दृश्यते। किन्तु एकस्मिन् ध्वनिचित्रसूत्रे २४००० दृश्यभावनाः पञ्चीकर्तुं शक्यन्ते।

आधुनिकयुगे भाषाध्यापने दृश्योपकरणानामुपयोगः विद्यते एव। अतः अध्यापकाः एतानि उपकरणानि विज्ञाय एतेषामुपकरणानां कथं प्रयोगकरणेन शिक्षणं महत्त्वपूर्णं भविष्यतीति ज्ञानं प्राप्नुयुः। साधनानि तावत् विषयानुकूलानि स्युः। अध्यापकेन पुस्तकं प्रति दृष्टिः प्रदेयाः, साधनानां स्थितिश्च परीक्षणीया।

एवं रीत्या सावधानतया यदि अध्यापकेन उपकरणान्युपयुज्य व्याकरणपाठनं क्रियते तर्हि शिक्षणं प्रभावपूर्णं भवति।

**श्रव्यसाधनानि तेषां महत्त्वञ्च**

साधारणतया अध्यापकः पाठनबोधनसमये मौखिकतया बोधयन्ति तदा तदा श्यामफलकेऽपि विलिख्य विवरणं करोति। अर्थात् अध्यापकः श्यामफलकं वदनञ्च साधनमात्रे कृत्वा बोधयति। पाठबोधने एते द्वे एव साधनेन उपयोक्तुं शक्येते। नैव मन्तव्यः। इतराणि बहूनि साधनानि 'श्रव्यदृश्यसाधनानि' इति व्यवह्रियन्ते।

श्रवणशक्त्या विषयग्रहणाय यानि साधनानि उपयुक्तानि भवन्ति तानि श्रवणसाधनानि(Audio aids) इति व्यवह्रियन्ते।

**जे. जे. वीवर् महोदयस्यानुसारम्** ४०% अवधानं दृश्यानुभवानां द्वारा, २५% श्रव्यानुभवानां द्वारा, १५% स्पर्शानुभवानां द्वारा, १५% अन्यानुभवानां द्वारा, ३% स्वानुभवानां द्वारा अध्येतुं शक्यते इति ज्ञायते। अतः एतेषां साधनानां महत्त्वमधिकमस्ति।

- **संस्कृतच्छात्राणां बुद्धिविकासे ICT उपयोगिता-**

संस्कृतं ये पठन्ति ते भवन्ति संस्कृतच्छात्राः। संस्कृतशिक्षणे, संस्कृतस्य प्रचारार्थं, छात्राणां रूचिवर्धनार्थं ICT इत्यस्य महतिमवदानमस्ति। प्राचीनकाले तु पारम्पारिकशिक्षायां केवलं गुरुमुखात् विषयः श्रुत्वा श्रुत्वा एव कण्ठस्थिकुर्वन्तः आसीत्। विषयः दीर्घकालीन स्मृतिपटले स्थापितुं न शक्येते। कण्ठस्थिकरणमाध्यमेन छात्राणां बुद्धिविकासः भवति। छात्राणां मुल्याङ्कनमपि भाषणकौषलमाध्यमेन आसीत्। परन्तु इदानीं तु छात्राणां आधुनिकयन्त्राणां उपकरणानां सहायेन छात्राणां पाठदानं मूल्याङ्कनं भवति मूल्याङ्कनम् अपि भवति। अध्यापकाः छात्राणां पाठनाय अध्यापकाः आधुनिकयन्त्राणां विना कर्तुं नइच्छति। उपकरणस्य सहायेन पाठनाय छात्राः विषयं शीघ्रमवगच्छति, विषयः ध्यानेन श्रुनवन्ति। ICT सहायेन पाठनेन छात्राः जामिता न भवन्ति। अध्यापकस्य पाठितविषयाः यदि छात्राः अवगच्छति एवञ्च छात्राणां व्यवहारस्य परीवर्तनं भवति तर्हि व्यवहारस्य परिवर्तनेन सह छात्राणां बुद्धिविकासः भवति। संस्कृतशिक्षाशास्त्रे उल्लेखितमस्ति यत् अनुभवेन व्यवहारेण जायमानः सापेक्षः स्थायिपरीवर्तनं नाम शिक्षा। अध्यापकाः एकस्मिन् समये वहुनां छात्राणां पाठयितुं शक्नोति एवञ्च बुद्धिविकासयितुं शक्नुवन्ति। केवलं अध्यापनक्षेत्रे न अपि विभिन्नकार्येषु ICT इत्यस्य भूमिका महति वर्तते। जनाः ICT इत्यस्य व्यवहारं विना अग्रेनागच्छति। एकमुदाहरणं वदामः तैलेन विना यानमग्रे नागच्छति तद्वद् ICT

विना जीवनं अग्रे नेतुं न शक्नोति। मानवस्य जन्मनात् आरभ्यः मृत्युपर्यन्तं विभिन्न कार्यक्षेत्रे ICT महति वर्तते।

## ❖ निष्कर्षः

संस्कृतशिक्षायां तथा च मिश्रितशिक्षा, दूरस्थशिक्षा उभयोर्मध्ये संगणकसहकृताधिगमस्य सहायेन छात्राः शिक्षादानं भवति। आधुनिकयुगे संगणकसहकृताधिगमस्य प्राधान्यमधिकमस्ति। कोरणाकालतः छात्राः आधुनिकयन्त्राणां तथा संगणकसहकृतोपकरमस्य सहायेन शिक्षाग्रहणं भवति तद् ज्ञातवन्तः। आधुनिकयन्त्राणां तन्त्राणां सहायेन एवञ्च दृश्यश्रव्योपकरणस्य सहायेन छात्राणां पाठयामश्चेत् कठिनविषयः सरलं भवति विषयः अवगन्तुम्। छात्राणां पार्श्वे विषयः सरलं भवति श्चेत् विषयः शीघ्रं अवगच्छन्ति। विषयः अवगच्छन्तिश्चेत् बुद्धिविकासः भवति बुद्धिविकासः सहितं व्यक्तित्वविकासः अपि भवति। बुद्धिविकासस्य सहितं व्यक्तित्वविकासेन सह् निविड सम्बन्धः वर्तते। वयं पश्यामश्चेत् वर्षद्वयं यावत् संगणकसहकृतोपकरणस्य प्राधान्यं अधिकं दृश्यते छात्राः विषयः अवगच्छति। छात्राणां मूल्याङ्कनस्य प्रतिशतं दृष्ट्वा ज्ञातवान् संगणकसहकृतोपकरणस्य माध्यमेन छात्राणां बुद्धिविकासः एवञ्च व्यक्तित्वविकासः भवति। संगणकसहकृतोपकरणस्य माध्यमेन इदानीं तनकाले विभिन्नसंस्थाः संगोष्ठ्याः आयोजनं कुर्वन्ति एव। तत्र योगदानं कृत्वा छात्राणां कृते लाभदायकं भवति। अतः संगणकसहकृतोपकरणं आधुनिकयुगे छात्राणां पठनार्थं एवञ्च बुद्धिविकासार्थं अतिश्रेयः उपादानम्।

**परिशीलितग्रन्थसूची**

1. शिक्षामनोविज्ञानम् – पि. नागमुनिरेड्डि – राष्ट्रियसंस्कृतविद्यापीठम्- 2011.
2. आधुनिकशिक्षामनोविज्ञानम्-प्रो.लोकमान्यमिश्रः-राष्ट्रिय संस्कृत संस्थानम्-2011.
3. अन्धप्रदेशस्थावासीयानावासीयविद्यालयच्छात्राणांवुद्धि-व्यक्तित्वसंस्कृतुलव्धीनां तौलनिकाध्यायणम्- PATHAKMURI MADHAVA RAO- राष्ट्रियसंस्कृतविद्यापीठम् -2014
4. वुद्धिविकासे उपासनाप्रविधेः प्रभावस्याध्ययणम्-प्रह्लाद रा.जोशी- राष्ट्रियसंस्कृतविद्यापीठम् 2011.
5. अलोकमण्डलः 2021 तमे सम्वत्सरे उच्चमाध्यमिकस्तरीयच्छात्राणां संस्कृतोपलब्धौ सूचनासम्प्रेषणप्रविधेः प्रभावः
6. Wikipedia

Research Scholar (Ph. D)
Venkatachala Boys Hostel (New Hostel)
Room no- 101
National Sanskrit University, Tirupati
Andhra Pradesh, Pin- 517507
Ph no- 8609556944
Email id – chandanpal821@gmail.com

❑❑❑

# महाकवि-अवस्थीबच्चूलालप्रणीते अगतिकगतिकमित्यस्मिन् खण्डकाव्ये सामाजिकचिन्तनम्

**शुभम् मुखोपाध्यायः**

विदितमेव विदुषां यत्-

संस्कृतं संस्कृतेर्मूलं ज्ञानविज्ञानवारिधिः।
वेदतत्त्वार्थसञ्जुष्टं लोकालोककरं शिवम्।।

संस्कृतकाव्यस्योदयो यद्यपि प्रशान्ततपोवनेऽजायत तथापि तस्य प्रादुर्भूतकाव्यसम्पदः विकासो राजप्रासादेष्वेव जातः। विक्रमादित्यं विना कालिदासस्य, हर्षवर्धनं विना वाणभट्टस्य कविप्रसिद्धेः सम्भवो नासीत्। कविसमादरकर्तारः राजानः तान् कवीन् उत्तमकाव्यनिर्माणाय प्रेरयन्। राज्ञामाश्रये कवित्वं प्रस्फुटति स्म। राज्ञामेव रङ्गशालासु तेषां कृतयः सम्मानीयन्ते। राज्ञामाश्रयमवाप्येव संस्कृतकाव्यं सर्वतोमुखिनं विकासमभजत।

लौकिकसंस्कृतकाव्यानि पुराणं रामायणं महाभारतञ्च बीजभावेन आश्रयन्ति। तत्र वेदेषु वर्णनपराणां मन्त्राणामुपलब्धिरस्त्येव तदपि परोक्षभावेन काव्यबीजत्वं भजते। परन्तु सम्प्रतिकाले रच्यमानानि रामायणादीनि तु प्रत्यक्षभावेनैव काव्यस्य बीजानि इति वक्तुं शक्यते।

संस्कृतकाव्यानां विकासस्यालोचनायां प्रक्रान्तायामिदं न विस्मर्तव्यं यदत्र साहित्ये प्रथमं रसं बोद्धुमध्यवसायः प्रवर्तते स्म। वाल्मीकिना हि स्वरामायणे करुणरसस्य या धारा प्रवाहिता सा सततं स्यन्दमाना एव तिष्ठति। संस्कृतसाहित्यमत्यन्तं प्राचीनं ज्ञानविज्ञानशोभितं बहुविधविषयसङ्कलितं च विराजते। न

केवलं प्राच्यविद्वांसः पाश्चत्यविद्वांसोऽपि संस्कृतवाङ्मयं परिशील्य आश्चर्यचकिताः भवन्ति।

**काव्यस्य परिभाषा–**

विशालोऽयं संस्कृतसाहित्यस्य वाङ्ग्मयः। दृश्यश्रव्यचम्पूनामभिः बहुभेदानि काव्यानि वाङ्ग्मयेऽस्मिन् दृश्यन्ते। दृश्यश्रव्यत्वभेदेन काव्यं द्विधा विभाज्यते इति सम्प्रदायः। तदेव सम्प्रदायानुगुणं विश्वनाथः साहित्यदर्पणे ब्रवीति यत् - **दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम्**[१]।

पुनश्च दृश्यकाव्यस्य नैकाः विभागाः समभिलोक्यन्ते। नाटकाख्यियिकानाटिका इत्यादयः भवन्ति। तथैव श्रव्यकाव्यस्यापि नैकाः अंशाः समावलोक्यन्ते। ते च यथा – गद्यपद्यचम्पू इत्यादयः इति। एतेषु सर्वेषु अन्ये केचन अंशाः विद्यन्ते ये अंशाः स्तोत्रकाव्यं गीतिकाव्यमित्यदिभिः पदैः व्यपदिश्यन्ते।

काव्यम् इति शब्दः तावत् **कवृ वर्णने** इत्यस्माद्धातोः **कवेर्यत्** इत्यनेन सूत्रेण अच्प्रत्यये काव्यम् इति पदं निष्पन्नं भवति। काव्यविषये अग्निपुराणे महर्षणा व्यासदेवेनापि भणितं यथा –

**अपारे काव्यसंसारे कविरेव प्रजापतिः।**
**यथास्मै रोचते विश्वं तथेदं परिवर्तते।।**[२]

संस्कृतसाहित्ये नैके काव्यप्रकाराः समभिदृश्यन्ते। ग्रन्थकाराः स्वस्वग्रन्थेष्वपि काव्यस्यास्य परिभाषाः प्रोचुः। काव्यपरिभाषया काव्यस्य सत्यासत्यमस्माभिः परीक्ष्यते इति कारणात् आचार्याणां मतानि समुपस्ताप्यन्ते यथा -

१ साहित्यदर्पणः ६/२
२ अग्निपुराणम् ३३६/११

भामहः स्वीये काव्यलङ्कारे काव्यपरिभाषामित्थम् अब्रवीत् – **शब्दार्थौ सहितौ काव्यम्**[३] इति।

आचार्यदण्डीमतानुसारं काव्यपरिभाषा एवमस्ति – **शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली काव्यमिति**[४] इति।

आनन्दवर्धनः स्वकीये ध्वन्यालोके काव्यस्य परिभाषामित्थमकरोत् यथा – **सहृदयहृदयाह्लादिशब्दार्थमयत्वमेव काव्यलक्षणम्**[५] इति।

**खण्डकाव्यस्य लक्षणम्**

रसिकानां रसास्वादनाय प्रमुखसाधनं काव्यम्। यद्यपि काव्यस्य बहवः प्रकाराः वर्तन्ते तेषु खण्डकाव्यम् एकादेशानुवर्तिकाव्यं भवति। तत्र खण्डकाव्यस्य लक्षणं यथा – **खण्डकाव्यं भवेत् काव्यस्यैकादेशानुसारि च**[६] एवम् उत्कलदेशीयालङ्कारिकः गोपीनाथकविभूषणः कविचिन्तामणिग्रन्थे खण्डकाव्यस्येवं लक्षणं कृतवान् यथा –

**सर्गबन्धविहीनञ्च शून्यं चन्द्रादिवर्णनैः।**
**श्लोकसंख्यात्मकं यत्तत् खण्डकाव्यमिति स्मृतम्।।**[७]

खण्डकाव्यं हि मुख्यतया चतुर्विधं दृश्यते यथा – शार्ङ्गरिकं धार्मिकं नैतिकं साङ्गाहिकञ्च। प्रथमो भेदः गीतिप्रभृतिभिः विविधो वर्तते। द्वितीयो भेदः स्तुतिकाव्यम् एव। तृतीयस्तु नीतिपरकः वोपदेशपरक अनुक्तिरूपश्च। चतुर्थभेदस्तु सङ्ग्रहपरकः

३ काव्यालङ्कारः २/२६
४ काव्यादर्शः २/२०
५ ध्वन्यालोकः १/१
६ साहित्यदर्पणः ६/३२९
७ कविः चिन्तामणिः ४/१

सुभाषितसङ्ग्रहः कोषश्चास्य भेदौ। यत्र कुत्रापि तु सर्वेषामेव पक्षाणां मिश्रणमपि दृश्यते।

**खण्डकाव्यस्योत्पत्तिः**

यद्यपि लौकिकसाहित्ये खण्डकाव्यस्य रचना कालिदासेनैव कृता तथापि नैतावता तस्य तस्मादपि प्राचीनतरत्वं विद्वत्परम्परायां मन्यते। ऋग्वेदेऽपि खण्डकाव्यस्य स्वरूपम् उपलभ्यते। कमनीयार्थद्योतकं वाक्यमेव भवति काव्यम्। यत्र हि किञ्चिदपि वाक्यं तथारूपेणोपन्यस्तं भवति, तत्र खण्डकाव्यस्य विषय उत्पद्यते एव। तेन हि वाक्यस्य काव्यत्वे तद्वदन्तरतत्वमेव हेतुर्न तु बाह्यम्। वाक्यादौ वा एवमेवापि वाक्यं काव्यं भवति यदि तत्कमनीयमर्थं प्रकाशयति।

हंसराजप्रभृतयः समालोचकाः खण्डकाव्यं पञ्चविधं मन्यन्ते। यथा सूक्तमयं भक्तिरसमयम् ऐतिहासिकं रुपकान्तर्गतं सङ्कीर्णञ्च। तेषु हि वेदेषु समुपन्यस्तं सूक्तमयं यथा उषःसूक्तम् भक्तिरसमयं यथोपनिषत्सु वौद्धादिग्रन्थेषु च ऐतिहासिकं यथा रामायणे महाभारते प्रस्तुतं प्रकृतिवर्णनम्, रूपकान्तर्गतं यथा रूपकान्त-रूपस्थापितपद्यानि, सङ्कीर्णञ्च श्रृङ्गारप्रधानं मेघदूतादिकमिति।

**कविपरिचितिः**

उत्तरप्रदेशे बाराबङ्कीजनपदे **रनजीतपुर**नामको एकः ग्रामः अस्ति। तत्र अवस्थिमहोदयस्य पितामहः पं बैजनाथोऽवस्थी न्यवसत्। सः चार्थकृच्छ्रेणभावेन पीडितो बभूव। भाग्यचक्रेण कालक्रमे निर्धनतादशायाम् अवस्थिनः पितामहः परिवारेण साकं **बहराइच**(उत्तरप्रदेश) फरुहाघाटनामके स्थानमनावृतक्षेत्रं गृहीत्वैकस्मिन् पर्णकुटीरे कालं यापयामास। तदा आचार्यावस्थिनः प्रादुर्भावस्य प्रायः एकवर्षात्प्राक् सन् 1917 ईसवीये तदानीमाचार्यऽवस्थिनो माताऽन्तर्वर्ती बभूव। तस्य

रक्षणव्यावस्थायै कुटीरमभितः पटवेश्म निर्मितम्। तस्मिन् पटवेश्मनि श्रावणमासस्य शुक्लपक्षे द्वितीयातिथौ गुरुवासरे संवत् 1975 वि.(1918) ई.वर्षे अगस्तमासस्य अष्टमे दिने आचार्योऽवस्थी भुवमवततार। सर्वे तं शिशुं वर्षद्वयं **भैया** इति सम्बोधयामासुः। तस्य पिता वदरीप्रसादावस्थी, पितामहः वैजनाथावस्थी। पितामहस्य अनुज्ञाप्रदानेन भागवत्कथावाचकप्रसङ्गतः **वच्चूपण्डितः** इति नाम्नो बच्चूलाल इति नाम कृतम्।

**अगतिकगतिकम् इति खण्डकाव्यस्य प्रतिपाद्यविषयः**

समकालिकसंस्कृतसाहित्ये महाकविना ज्ञानोपाह्वोऽवस्थीवच्चूलालमहोदयेन विरचिता प्रतानिनी इति विविधविषयिणी प्रत्यग्रकाव्यसङ्कलना १९९६ ई.वर्षे वैजयन्तप्रकाशनडलाहालादद्वारा प्रकाशिता। अस्यां सङ्कलनायां पञ्च प्रतानाः दृश्यन्ते। तत्र प्रथमे स्तवकप्रताने चतुर्दशकविताः विलसन्ति। द्वितीये अन्योक्तिप्रताने त्रयोदशपद्यानि सन्ति। तृतीये गजलगीतिप्रताने ६६ गजलगीतानि मनोहराणि सन्ति। चतुर्थे विरागप्रताने **अगतिकगतिकमिति** खण्डकाव्ये १५३ छन्दोबद्धानि पद्यानि हृद्यानि विद्यन्ते। पञ्चमे प्रकीर्णप्रताने विविधसन्दर्भमधिकृत्य ३७ पद्यानि दृश्यन्ते। ग्रन्थस्य अस्य प्रस्तावनाभागे आचार्याः अभिराजराजेन्द्रमिश्रमहोदयेन लिखितम् –

**वस्तुतः प्रत्येकं प्रतानः स्वतन्त्रग्रन्थकल्पः प्रतिभाति कलेवरदृष्ट्या।**
**प्रस्थानदृष्ट्या च भामिनीविलासायते काव्यसंग्रहोऽयम्।।**[८]

अस्मिन् खण्डकाव्ये १५३ विविधछन्दोभिः रचितानि दृश्यन्ते, महान् शिवभक्तोऽयं महाकविः काव्यारम्भे काव्यान्ते च उज्जयिन्यां पूज्यमानं महादेवं महाकालं सर्वथा स्मरति। तत्र मङ्गलपद्यं यथा –

---

८ प्रतानिनी, पृ. १३

**गङ्गा यस्य कपर्दमन्ववसिता तापत्रयोन्मूलिनी येनोद्धूलित-लालितं च भसितं प्रेतावनेः पावनम्।**
**यस्मिन् विश्वविषेण सार्धमशिवा आशीविषा भूषणं तद् रूपं पशुपाशयोरनुगतं पत्युः पशूनां श्रये।।**[९]

महाकविः अवस्थी बच्चुलालः स्वात्मानं मन्दः इति सूचयन् भगवतः हरसिद्धेः कृपया काव्यं रचयितुं प्रारभते। संसारे विषाक्तमनसां जनानां प्रतिबोधनाय खण्डाकाव्यस्य कथाप्रसङ्गे तेन प्रस्तूयते –

**संसाररीतिरखिलापि मृषेति कृत्वा निह्नूयतामिति यतः स्फुरति प्रयासः**
**तस्माद् विषाक्तमनसां प्रतिबोधनाय प्रस्तूयते विशद एष कथाप्रसङ्गः।।**[१०]

भवदत्तः नाम कश्चित् ब्राह्मणः चर्मण्वतीनदीतटे तृणालयेषु वसतिञ्चक्रे। तस्य जाया पतिव्रतपरायणा तथा पुत्रश्च विद्वान् आसीत्। तस्य गृहे सवत्सा धेनुरपि आसीत्। एतैः सः शुक्लयजुर्वेदस्य माध्यन्दिनशाखाध्यायी द्विजः विधिपूर्वकं सारस्वतं व्रतमाचरन् सुखेन कालं यापयति स्म।

वस्तुतः वेदविद्यावतां प्रतिभावतां च कृते यञ्चलालक्षी निर्धनत्वं सम्पादयतीति महाकविः खेदं प्रकटयति। अतः अध्यापनादिब्राह्मणकर्मसम्पादनेन समुपलब्धेन धनेन भवदत्तभावः सन् सुखेन कालमनयत्।

**आयाति याति चपला चपलेव लक्ष्मीस्तां लौकिका विमतयो बहु मानयन्ति।**
**ये छान्दसे महिमनि प्रतिभानभाजोनादीनवं सृजति तान् प्रति निर्धनत्वम्।।**[११]

---

९ अगतिकगतिकम् १
१० अगतिकगतिकम् ३
११ अगतिकगतिकम् ४

भवादृशः कोऽपि सखा उज्जयिन्यां माघस्य पूर्वदिवसे मासं यावत् यागानुष्ठानमारब्धावान्। तस्मिन् यागकर्मणि भागग्रहणाय सः समाकृष्टः। तत्र गन्तुं भवदत्तः स्वभार्याया सह एकान्ते परामर्शमकरोत्। तत्र महाकविः दाम्पत्यसुखस्य साफल्यं सूचयति।

कविना तदीयं दारिद्रं प्रसङ्गेस्मिन् समुपस्थापितम्। लोके धनहीनेन जनेन साकं सम्वन्धिनोऽपि कथं व्यवहरन्ति इति चारुचित्रितं यथा –

**सम्बन्धिनोऽपि सुहृदोऽपि च पश्यतो मे तूर्ष्णीं विलोक्य मिषतो रहयन्ति गेहम्।**
**मानोत्रतं विदलितं किल काण्डशेषं सौगन्धिकं न समया भ्रमरा भ्रमन्ति।।**[१२]

अतः भवदत्तस्य भार्या तत्र गमनाय न्यषेधत्। कारणमपि महाकविः अवस्थीवच्चूलालः सूचितवान् -

**सानुव्रता व्रतपथाच्च्यवमानवाचो भार्तुर्मतं चरितबाह्यमिति न्यषेधत्।**
**ओजस्विता न वहते महिमापहानं तेजस्विता न सहते तिमिरेण सख्यम्।।**[१३]

भगवति परमात्मनि प्रीत्या एव परमं धनमिति पूर्वं भवदत्तस्य शुद्धभावना आसीत्। किन्तु लोभेन स एव अद्य प्रतारितः। कारणं जनाः धनलोभेन सम्प्रति अकार्यं कर्तुं प्रवृत्ताः।

ब्राह्मणः भवदत्तः धनं प्राप्तुं मधुरञ्च खादितुं यजमानगृहेषु कथं गच्छति इति तदानीन्ततं चित्रं परिकल्पिमत्र यथा -

**प्राप्तुं पणान् मृदुलशष्कुलिकाश्च भोक्तुं काम्यव्रतेषु यजमानगृहेषु कामात्।**
**चदम्यमाणमनसां विबुधब्रुवाणां श्रेण्यो मुदा भ्रमरिका इव विभ्रमन्ति।।**[१४]

---

१२ अगतिकगतिकम् १२

१३ अगतिकगतिकम् १९

एवञ्च भगवान् धनिनां गृहेषु वन्दीकृतः वर्तते। वेदाध्यायी निर्धनः स्वधर्म निरतः स्वगृहे सुखेन वसति। सः कदापि कुलव्रतकृतं सुकृतं न जहाति। अस्मिन् प्रसङ्गे महाकविना उक्तम् यथा –

**विप्रः श्रुतेषु पठिती विदिती स्वधर्मे गेहे सुखं वसति निर्धनतां वृणीते।**
**न त्वात्ममानमवमत्य विडम्बनासु भ्राम्यन् कुलव्रतकृतं सुकृतं जहाति।।**[१५]

एवं रुपेण भवदत्तस्य भार्या यागकर्मणि लोभेन धनार्जनाय न्यवारयत्। अनन्तरं सा पत्युः महाकालदर्शनाभिलाषं ज्ञात्वा तत्र गन्तुमङ्गीकृतवती। ततः सः भवदत्तः कुज्झटिकावृतेऽपि प्रातः काले गृहात् प्रस्थितः। मार्गे भोजनार्थं ब्राह्मणी ब्राह्मणं शङ्खालुकं स्थापितवती।

ब्राह्मणः परिचितमार्गेण गतः सः ब्राह्मणः कियद्दुरे चतुष्पथे दिग्भ्रान्तः सन् राजमार्ग परित्यज्य वनमार्गं प्रविष्टः भवति। सः ब्राह्मणः क्रमशः गत्वा शिप्रानदीतटे गवां सरणिं विलोक्य निकटे कश्चित् ग्रामः भवेदिति अचिन्तयत्। अत्यन्तं श्रान्तः वनमार्गे खिन्नः सन् अपि अग्रे चलन् सः ब्राह्मणः दूरात् अग्नेः किरणान् ददर्श। तत्र गच्छन् श्मशानभूमेः भयङ्करं दृश्यं विलोक्य आतङ्कितः। प्रचण्डे शीतकाले अग्नेः निकटे धैर्येण स्थितवान्। तत्र महाकविः प्रेतभूमेः वास्तविकं चित्रमपि समुपस्थापयति यथा – महाकविः द्वादशपद्यैः प्रेतावनेस्य वर्णनं चकार। तत्र भवदत्तः सपदि भगवन्तं शङ्करमूर्तिं दृष्ट्वा साष्टाङ्गपातविधिना प्रणमामः। श्मशानभूमौ भगवन्तं कृतकृत्य अभवत्। तत्र क्षुधातुरः ब्राह्मणः श्मशाने चितायाः निचितेषु अङ्गारकेषु शङ्खालुकस्य पचनं कृत्वा जठरानलस्य शान्तिं विहितवान्। अतः उचितानुचितं किमिति विचिन्त्य महाकविः

१४ अगतिकगतिकम् २२
१५ अगतिकगतिकम् २५

लोकव्यवहारमपि सूचयति। यदि मनुष्यः एकाकी भवति तर्हि सः स्वकर्मणः स्वयमेव साक्षी, स एव वक्ता, स एव श्रोता च भवति। तदुक्तम् –

**चेदेकलो भवति तर्हि जनः स साक्षी भोक्ता स एव खलु वक्ति श्रृणोति चैकः।**
**मायावृतोऽपि भगवान् स विमाय एतद्विश्वं विमाय हि वशी विवशत्वमेति।।**[१६]

असारस्य संसारस्य विवशतां परिहर्तुकामाः यतयः परमपदं प्राप्तुं सर्वदा यत्नवन्तः भवन्तीति सः ब्राह्मणः चिन्तितवान्। तस्मिन् क्षणे तस्य मनसि गृहिणी स्मृतिपथम् आगता। सा तदानीं तत्र गन्तुं निवारयन्तीव सः अनुभूतवान्।

किन्तु क्षुधावशात् पत्नीप्रसङ्गं विस्मृत्य सलवणं शङ्खालुकं भूक्त्वा भूमौ शयनमकरोत्। प्रातः उत्थाय सकलवृत्तं भावयित्वा विप्रः विपद्ग्रस्तः भवति चेत् चाण्डालवत् चित्त्वा विधिं न जानातीति अचिन्तयत्।यदि उदरपूर्तिः न भवति, तर्हि का कथा वेदाध्ययनस्य यदि अर्थद्वारा एव धर्मकामौ, सिद्धः तर्हि धर्मस्य महिमा लघीयान् भवति। अर्थात् धनं विना कथं वा लोकवृत्तमिति महाकवेरभिप्रायः।अस्मिन् खण्डकाव्ये महाकविः वच्चूलालः आपद्धर्मविषये सावधानं परिलक्षते। तदर्थमाह –

**आपद्गतस्य दुरितान्यपि यानि तानि श्रेयः प्रवाहविभवे विभलीभवन्ति।**
**भ्रान्तिं विदंस्तदनुगं भजते न दोषं गङ्गां समेत्य विमलैव हि कर्मनाशा।।**[१७]

महाकविः अस्मिन् खण्डकाव्ये स्पष्टतया प्रदर्शयति यथा शरीरं विना धर्मपालनं न सम्भवति। महाकवेः कालिदासस्य, **शरीरमाद्यं खलु धर्मसाधनम्** इत्युक्तेः प्रभावोऽप्यत्र दृश्यते। तत्र पापप्रदुषितं जीवनं स्वानेन पवित्रं कर्तुं सः ब्राह्मणः शिप्रानदीं प्रति गन्तुमुद्यतः। स्नानं कृत्वा श्मशानाग्निनिकटं स्थितः अचिन्तयत् –

---

१६ अगतिकगतिकम् ८४

१७ अगतिकगतिकम् ९९

**एका चितैव बहुधा धृतविभह्मवेषा शीतात् क्षुधश्च वृजिनात् सदयं ररक्ष।**
**मेध्यं कदा भवति किं किमु वा न मेध्यं निर्णायकाविह परं बत देशकालौ।।**[१८]

अर्थात् मनुष्यः परिस्थितेः दासः इति पद्यादस्मात् ज्ञायते। ततः भवदत्तः सन्ध्यावन्दनादिकं विहाय पुरतः महाकालेश्वरस्य उज्जयिनीं नगरीं ददर्श। तत्र सः ब्राह्मणः सिद्धवनतटनिकटे गत्वा कालीं क्रमशः श्रीभैरवं च प्रणतवान्। इयमेव काली कविकुलगुरुं कालिदासं प्रति कृपा कृतवती।

अतः सः ब्राह्मणः महाकालेश्वरस्य दर्शनाय अगात्। तत्र अवन्त्यां माध्यन्दिनशाखाध्यायिनां ब्राह्मणानां वेदपाठस्य दुर्दशां महाकविः वर्णयति। अत्र चतुर्भिः पद्यै ब्राह्मणानां वृत्तान्तः सूचितः। भवदत्तः अग्रे गत्वा यागकार्यरतं स्वमित्रमपश्यत्।परन्तु सः तथा सम्भाषणं नैव अकरोत्।तदवसरे भवदत्तस्य शिष्यस्तत्र समुपस्थितः। सः गुरुं भवदत्तं प्रणिपत्य स्वगृहं नीत्वा सुमधुरभोज्यैः सत्कृतवान्। गुरोः विषादविषमां प्रवृत्तिं श्रुत्वा शिष्यः दुःखितः भवति। शिष्यमुखेन महाकविः याज्ञिकानां धृष्टतां वर्णयति –

**शब्देन याग इति देवतनुश्च शब्दो**
**देवक्रतू न भवतो यदि शब्दहानिः।**

ततः शिष्येण सह भवदत्तः गोशकटेन स्वग्रामः प्रस्थितः बहुदिनात्परं प्रियशिष्यं विलोक्य भवदत्तस्य पत्नी आनन्दिता भवति।अतः भवदत्तस्य भार्याः सर्वेषां कृते दिव्यभोजनं प्रदत्तवती। ततः गुरुं प्रति भक्त्या शिष्यः प्रणिपातमकरोत्। गुरुपुत्रस्य कृते कृषेरनुगुणं क्षेत्रं, धेनुद्वयं पर्याप्तं सुवर्णं शकटं च प्रदाय निवृत्तकृत्य ततः प्रतिगन्तुं निश्चितवान्। गुरुः शिष्येण प्रदतं धनं दृष्ट्वा चिन्तयति –

---

१८ अगतिकगतिकम् १०४

**काले कलत्रयममरत्वमिव प्रसूते काले तनूज-जनुषापि जरीहृषीति।**
**काले धनानि च यशांसि जनो वृणीते काले गते तदखिलं मृगतृष्णिकैव।।**[१९]

संसारे सर्वमनित्यम्। भगवान् महाकालेश्वर एव सर्वसुखप्रदायकः। अतः भवदत्तः तापसवृत्त्या अवन्तीपुरे शेषजीवनं यापयितुमभिलषितवान्। ततः शुभमुहुर्ते तस्य नप्ता अभवत्। नप्तुर्मुखं दृष्ट्वा सः प्रीतः। मासात् परं गृहस्थकृत्यं सम्पाद्य जायया सह भवदत्तः गृहं परित्यज्य अवन्तीपुरे सिद्धवटस्य मूले स्वाध्यायशिक्षणपरः तपश्चचकार। तत्र शिप्रानदी सुशीतलपवनेन तस्य स्वागतं चकार। स एव भगवान् महाकालेश्वरः अगतिकानां गतिकः नित्यं मङ्गलं विदधतु इति महाकविः समुद्घोषयति।

**खण्डकाव्ये सामाजिकचिन्तनम्-**

मनुष्य एक समाजवद्धजीवः भवति। समाजं विना सः जीवितुं न शक्नोति। समाजः नाम् समानधर्मस्थानं समुदायः इति। तस्मात् छात्रसमाजः शिक्षकसमाजः कृषकसमाज इत्यादि व्यवहारः प्रवर्तते। समाजस्य चित्रं साहित्ये प्रतिफलितं भवति। साहित्यं च समाजस्य दर्पणः भवति। इति कथ्यते। यथा स्वच्छे, निर्मले, दर्पणे, कश्चित् स्वकीयां प्रतिकृतिं द्रष्टुं शक्नोति, तथैव सशस्ते साहित्ये तदानीन्तनसमाजस्य समुचितं चित्रं द्रष्टुं शक्यते।

सर्वत्रैव साहित्ये समाजस्य व्यावहाराः निरूपयन्ते तथा च सामाजिकविचाराणां चर्चा विधीयते। कविविरचितग्रन्थविशेषं विलोक्य काव्यरचनाकालिकाः सामाजिकस्य स्थिततः तात्कलिकाः सामाजिकचिन्तमयपरम्पराश्च विज्ञातुं शक्यन्ते। विषयाश्च चर्चावसरे सर्वत्र प्रथमं संस्कृतसाहित्यत्थोः सम्बन्धो विचार्यते।

---

१९ अगतिकगतिकम् १४५

संस्कृतिसामाजिकानां व्यवहारविशेषाणां समष्टिः हि वर्तते, साहित्यन्तु तेषां संस्कृतिकपदवाच्यानां मानवव्यवहारविशेषाणां चिरस्तायिनी मानवव्यवहारविशेषाणां चिरस्थायिनी कृतभिव्यक्तिविद्यते। तत्र सम उपसर्गपूर्वकात् कृ धातोः भावार्थे क्तिन् प्रत्यये कृते सति सम्परिभ्यां करौतौ भूषणे (6/2/237) इति सूत्रेण सुडि संस्कृतशब्दस्य निष्पत्तिर्भवति। भूषणात्मिका सम्यक् कृतिः संस्कृतिः एवञ्च "साहित्यस्य भावः साहित्यम्" इति निर्दिशन्तः शब्दशास्त्रविशारदाः परकाशितवन्तो यद्धि सहितशाब्दात् "गुणवचनब्राह्मणादिभ्यः कर्मणि च" (5/2/124) इति सूत्रेण ष्यञ् प्रत्ययकृते सति साहित्य शब्दो निष्पन्नो भवति। संस्कृतसाहित्यसम्बन्धोविषयकचर्चा प्रसङ्गे संस्कृतसाहित्यस्य च विभिन्नानां तत्वानां तथा साङ्गोपाङ्गानां परिचयस्यापेक्षा भवति। साहित्यस्य तत्त्वानां तु चर्चा पूर्वेष्वध्यायेषु कृतास्ति। सम्प्रति अवस्थी वच्चूलालः प्रणीतस्य "अगतिकगतिकम्" इति खण्डकाव्ये सामाजिकतत्वस्य बीजम् कीदृशं आसीत् तत् निरूपयामः।

खण्डकाव्यस्य **अगतिकगतिकम्** इति नाम्ना एव समाजस्य अवस्थायाः स्वरूपं किञ्चिदनुमातुं शक्यते। ततश्च कविना काव्यमिदं केवलं संसारे विरक्तानां जनानां कृते एव, तच्च ज्ञापयति स्वयं काव्ये यथा –

**संसाररीतिरखिलापि मृषेति कृत्वा**
**निह्नूयतामिति यतः स्फुरति प्रयासः।**
**तस्माद् विषाक्तमनसां प्रतिबोधनाय**
**प्रस्तूयते विशद एष कथाप्रसङ्गः।।**[1]

---

[1] अगतिकगतिकम् - 3

एतेन ज्ञायते तदा समाजे अतीवतया दारिद्रता आसीत्। तथा च जनाः ततः मुक्तिम् इच्छन्तः विचरन्तः स्म। भवदत्तनाम्ना चरित्रेण कविना स्वीये खण्डकाव्ये तदानीन्तसमकालीकं समाजचित्रं लेखणीकौशल्यां प्रस्फूटितम्।

**1. आर्थिकव्यवस्था -**

पूर्वमेवोक्तं समाजः दारिद्रे अपवृतः आसीत्। दारिद्रतायाः स्वरूपविचारे मृच्छकटिके आह—

**शून्यमपुत्रस्य गृहं चिरशुन्यं नास्ति यस्य सन्मित्रम्।**
**मूर्खस्य दिशः शून्याः सर्वं शून्यं दरिद्रस्य।** [1]

अर्थात् दारिद्रं तस्मात्पुरुषात् सर्वं स्वीकृत्य शून्यत्वेन प्रतिष्ठापयति। तेन समाजे स घृणपात्रत्वेन तिष्ठति। तथा च कश्चिदस्य सङ्गं नैव ह कुरुते, आदरात् न संभाषते कोऽपि , उत्सवेषु विभववतां सदनं संप्राप्य सावज्ञम् आलोक्यते तदा अल्पच्छदः दरिद्रः लज्जया महाजनस्य दूरात् एव विहरति। अत एव मृच्छकटिके वदति - **मन्ये निर्धनता प्रकाममपरं षष्ठं महापातकम्।**[2]

दरिद्रजनं दृष्ट्वा बान्धवजनाः वाक्ये न तिष्ठते। प्रीतिपूरिताः सुहृदः विमुखीं भवन्ति। तदैवाह कविना स्वयम् –

**सम्बन्धिनोऽपि सुहृदोऽपि च पश्यतो मे**
**तूर्ष्णीं विलोक्य मिषतो रहयन्ति गेहम्।**

---

[1] मृच्छकटिकम् – 1/8

[2] मृच्छकटिकम् – 2/6

**मानोन्नतं विदलतिं किल काण्डशेषं**
**सौगन्धिकं न समया भ्रमरा भ्रमन्ति।।**[1]

अर्थरूपनिर्धनत्वे सत्वेऽपि यस्य समीपे ज्ञानरूपं धनं तिष्ठति स निर्धनः न भवति।

ज्ञानमेव श्रेष्ठं धनम् इति सर्वत्र व्यवहारः।ज्ञानद्वारैव सर्वत्र स पूज्यते। तेन सर्वं नूतनतया सर्वं स्रष्टुं पारयति। यथा काव्येऽस्मिन्नाह-

**आयाति याति चपला चपलेव लक्ष्मी-**
**स्तां लौकिका विमतयो बहु मानयन्ति।**
**ये छान्दसे महिमनि प्रतिभानभाजो**
**नादीनवं सृजति तान् प्रति निर्धनत्वम्।**[2]

अन्यत्र कविना सन्तोषमेव परमं धनम् इति आख्यातम्। संन्तोषश्च क्रोधेर्ष्यालोभत्यागात् आयाति। तच्चाह कविना - **सन्तोष एव परमं धनमित्यमंस्थाः।**[3]

धनेन न सर्वं भवति। धनीनां तु यागादौ न स्थानं भवति। तदार्थं तु पुरोहिता स्युः। अर्थात् कविना धनं केवलं निमित्तमात्रं भवति, न तु धर्मोपयोगित्वमस्ति। तदेवाह-

**पण्यालये प्रसरणं धनतस्काराणां**
**तीर्थे मनोज्ञवनिताननलोलुपानाम्।**
**देवलये कपटिनां खलदेवालानां**

---

[1] अगतिकगतिकम् - 17

[2] अगतिकगतिकम् - 6

[3] अगतिकगतिकम् - 20

**यागे त एव यजमानपुरोहिताः स्युः।।**[1]

भगवान् धनीनां गृहेषु वन्दिकृतः भवति। किञ्च तेषां कारणादेव सूर्यः भयेन समयं विधत्ते। अतः वेदज्ञः एव सर्वोत्तमः अस्ति। ये तु स्वधर्मे निरताः भवन्ति, ते च निर्धनत्वेऽपि स्वस्थाने श्रेष्ठः भवति। ततः एव सुखम् आयाति।

**2. समाजे पुरुषव्यवस्था---**

समाजः साधारणतः पुरुषतान्त्रिको भवति। समाजे वर्णाश्रमप्रथा अचिरेण प्रवाहमाणः आसीत्। तत्र ब्राह्मणाः कथमासीत् तद् खण्डकाव्येऽस्मिन् भवदत्तनाम्नः नायकस्य जीवनचरितेन ज्ञायते। ब्राह्मणस्य नित्यकर्मविषये मनुस्मृतौ वदति –

**अध्यापनमध्ययनं यजनं याजनं तथा।**
**दानं प्रतिग्रहं चैव ब्राह्मणानामकल्पयत्।।**[2]

तद्वद् स भवदत्तः वेदाध्ययानरूपाणि नित्यनैमित्तिककर्माणि प्रतिदिनं करोति स्म। स सर्वदा शालीनभावनिरत आसीत्, वितर्कात् विरतो आसीत्। प्रत्यहं ब्राह्मे मुहूर्ते उत्थाय यथाविधानं ब्राह्मणनित्यकर्म करोति स्म। तस्य अध्यपनादिभिः सर्वदा निरतः आसीत्। तस्मिन् धनविषये रूचिर्नासीत्। स प्रयोजननियोजनमात्रवृत्यर्थं यावद् अपेक्षितं तावदेव स्वीकरोति। यथोक्तम्-

**अध्यापनाभिररचिरावथियाजनाभि**
**र्दैनप्रयोजननियोजनमात्रवृत्तिः।**
**त्यक्तप्रतिग्रहधनो भवदत्तभावो**
**मेने तृणाय धनदं भवदत्तशर्मा।।**

---

[1] अगतिकगतिकम् - 23

[2] मनुस्मृतिः – 1/88

स यागकार्ये अपि कुशल आसीत्। तदैवाह- **यागः प्रयागः इव पण्डितमाचकर्षः**। इति। ये तु स्वधर्मे निरताः भवन्ति, ते च निर्धनत्वेऽपि स्वस्थाने श्रेष्ठः भवति। ततः एव सुखम् आयाति इति पूर्वोक्तात् वाक्यात् ज्ञातुं शक्यते सर्वे व्यक्तयः स्वधर्मे सुस्थिताः आसन्। येन समाजे धनविषयकेप्सा एव नासीत्।

यौवनसम्पन्नः भवदत्तस्य पुत्रोऽपि श्रुतपारदृश्वा आसीत्। गोपालनमपि स कोरति।

**3. समाजे नारीव्यवस्था--**

समाजे नारीनां स्थानं देवीतुल्या आसीत्। यतो हि नारीनां गौरवचर्चा रामायणादौ सर्वत्र कृता अस्ति। यथा रामायण व्रतोपवासनिरता या नारी परमोत्तमा

**भर्तारं नानुवर्तेत सा च पापगतिर्भवेत्।**
**शुश्रूषमेव कुर्वीत भर्तुः प्रियहिते रता।।**
**एष धर्मः पुरा दृष्टो लोके वेदे श्रुतः स्मृतः।**
**पूज्यास्ते मत्कृते देवि ब्राह्मणाश्चैव सुव्रताः।।[1]–**
**सावित्री पतिशुश्रूषां कृत्वा स्वर्गे महीयते।**
**तथा वृत्तिश्च याता त्वं पतिशुश्रूषया दिवम्।।**
**वरिष्ठा सर्वनारीणामेषा च दिवि देवता।**
**रोहिणी च विना चन्द्रं मुहूर्तमपि दृश्यते।।**
**एवंविधाश्च प्रवराः स्त्रियो भर्तृदृढव्रताः।**
**देवलोके महीयन्ते पुण्येन स्वेन कर्मणा[2]।।**

---

[1] रामायणम् 20/21/ 20- 22

[2] रामायणम् 21/10/10-12

तद्वत्रापि कविना भवदत्तस्य पत्न्याः स्वरूपं वर्णितम्। यथा –

**जाया पतिव्रतापरा श्रुतपारदृश्वा**
**पुत्रःस्वदारनिरताःकपिला सवत्सा।**

**4. गुरुशिष्यपरम्परा--**

समाजे शिक्षायाः महत्वं तु प्रमुखं भजते। पूर्वकाले तु अध्यायनविषये ब्राह्मणक्षत्रियाणामेव स्वीकृतिः आसीत्। एवञ्च अध्यापनकार्यं केवलं ब्राह्मणानामेवासीत्।

पूर्वकाले शिक्षाव्यवस्था गुरुशिष्यपरम्परया भवति स्म। तद्विषये यथा हितोपदेशे-

**राजा राष्ट्रकृतं पापं राज्ञः पापं पुरोहितः ।**
**भर्ता च स्त्रीकृतं पापं शिष्यपापं गुरुस्तथा ।।**[1]
**पुस्तकेषु च नाधीतं नाधीतं गुरुसन्निधौ ।**
**न शोभते सम्भामध्ये जारगर्भ इव स्त्रियाः।।**

काव्ये भवदत्तस्य अपि शिष्य आसीत् इति ज्ञायते। तद्यथा-

**यां दक्षिणां किल गुरुं प्रति भक्तिवित्तः**
**शिष्यो न निर्धनतायार्पयितुं शशाक।**[2]

श्लौकाज्ज्ञायते स शिष्यः गुरुभक्तिपरायण आसीत्।

---

[1] हितोपदेशः – 10/11
[2] अगतिकगतिकम् - 140

**5. समाजे धर्मव्यवस्था--**

वर्णाक्रमानुसारं धर्माः चतुर्विधाः इति वक्तुं शक्यते। ब्राह्मणानां धर्मो यथा कविना भवदत्तस्य जीवनचरितात् कथम् इति ज्ञायते। यः स्वं स्वं धर्ममाचरति स श्रेष्ठः भवति। यस्तु तद्विहाय चलति स नरके पतितो भवति। यथोक्तम्-

**आजन्मनश्चरितधर्मपथाच्च्युतस्य**

**स्यादेवनाम नरकाय चिराय पापम्**।[1]

धर्माद् विचलिताः भवन्ति पुनः तद्वत्साध्यम् अर्थेन न प्राप्यते। अतः अधार्मिका विषये आह-

**अधार्मिको भवति नाम चरन्नधर्मं**

**धर्मः सनातनः इति प्रवदन्ति सन्तः।**

**अर्थेन हन्त यदि साध्यते एष धर्मो**

**धर्मस्थितिर्भवतु कार्थसमुज्झितानाम्।**।[2]

अत एव आह सन्तोषमेव परमं धनम् इति आख्यातम्। संन्तोषश्च क्रोधेर्ष्यालोभत्यागात् आयाति। तच्चाह कविना - **सन्तोष एव परमं धनमित्यमंस्थाः।**

भगवान् धनीनां गृहेषु वन्दिकृतः भवति। किञ्च तेषां कारणादेव सूर्यः भयेन समयं विधत्ते। अतः वेदज्ञः एव सर्वोत्तमः अस्ति। ये तु स्वधर्मे निरताः भवन्ति, ते च

[1] अगतिकगतिकम् - 91

[2] अगतिकगतिकम् - 90

निर्धनत्वेऽपि स्वस्थाने श्रेष्ठः भवति। ततः एव सुखम् आयाति। धनेन न सर्वं भवति। धनीनां तु यागादौ न स्थानं भवति। तदार्थं तु पुरोहिता स्युः। अर्थात् कविना धनं केवलं निमित्तमात्रं भवति, न तु धर्मोपयोगित्वमस्ति। तदेवाह-

**पण्यालये प्रसरणं धनतस्काराणां**
**तीर्थे मनोज्ञवनिताननलोलुपानाम्।**
**देवलये कपटिनां खलदेवालानां**
**यागे त एव यजमानपुरोहिताः स्युः।।**[1]

## सहायकग्रन्थसूची


1. कविचिन्तामणिः, ड. नारायणमहापालः, लोकभाषाप्रचारसमितिः, पुरी, 1998
2. दण्डी, काव्यादर्शः, एस्. विश्वनाथन्, श्रीबालमनोरमा प्रेस, पुरी।
3. मम्मटः, काव्यप्रकाशः, “आज” भवन् सन्त कबीर मार्ग, वाराणसी, यू.पी, जुलाई, 2016
4. भामहः, काव्यालङ्कारः, चौखम्बा संस्कृत सीरिज् अफिस्, वाराणसी, 2002
5. आनन्दवर्धनः, ध्वन्यालोकः, जगन्नाथपाठकः, चौखम्बा विद्यभवन, वाराणसी, संस्करणम् – 2001
6. अवस्थीबच्चूलालः, प्रतानिनी, श्री मिश्रीभिराजराजेन्द्रः, वैजयन्त प्रकाशन, इलाहाबाद – 1996


[1] अगतिकगतिकम् 23

7. विश्वनाथः, साहित्यदर्पणः, आचार्यः कृष्णमोहनशास्त्री, चौखम्बा संस्कृत संस्थान वाराणसी, पुनमुर्द्रण – 2013

शुभम् मुखोपाध्यायः
शोधच्छात्रः, साहित्यविभागः
राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः
चलभाषः – 8944985312
Email – smukhopadhyay94@gmail.com

❑ ❑ ❑

# न्यायदर्शने मोक्षविमर्शः

**वि.प्रदीप कुमारः**

**सारांशः**

धर्मार्थकाममोक्षेति चतुर्विधपुरुषार्थेषु परमपुरुषार्थः मोक्षः। जननमरणरूपचक्रात् मुक्तिः अथवा आत्मनः शाश्वतानन्दप्राप्तिः मोक्षः इति कथ्यते। विमोक्षः, विमुक्तिः, मुक्तिः इत्येवं मोक्षस्यैव नामानि प्रथितानि। भारतीयदर्शनेषु उक्तं यत् अविद्याहेतुत्वेन आत्मा पुनः पुनः आत्मानं जनयति, तथैव नश्यति च, अस्मात् जननमरणबन्धनात् मुक्तिरेव मोक्षः इति।

सामान्यतया मोक्षस्य स्वरूपं पश्यामश्चेत्, यः आत्मानं परमः, अमरः, अविनाशी इति अवगम्य जीवनस्य सर्वसुखदुःखचक्राद्बहिरागमनमेव मोक्षः। भारतीयदर्शनानां परमं लक्ष्यं अस्यैव परमपुरुषार्थस्य प्रापणं तथा तस्य उपायचिन्तनं च इत्यत्र नास्ति सन्देहः। अस्मिन् शोधपत्रे भारतीयदर्शनेषु मोक्षविषये उक्तविषयाणां संग्रहणं तथा न्यायदर्शनोक्तप्रकारेण परमपुरुषार्थस्य मोक्षस्य विशिष्टतया प्रपञ्चनं च कर्तुमीहे।

**कूटशब्दाः**- दर्शनानि, पुरुषार्थाः, वेदाः,आत्मा, दुखम्।

**दर्शनविभागः**

लोकेऽस्मिन् सर्वोऽपि जन्तुः सुखमिच्छति दुःखनिवृत्तिञ्च। तदर्थं विविधोपायेषु प्रवर्तते। लौकिकैः उपायैः पुरुषार्थमप्राप्य ते पुनः पुनः संसरन्ति। सन्ततं जन्ममरणप्रवाहरूपे प्रपञ्चे संसरतः जीवस्य पुरुषार्थप्राप्तये दर्शनानि प्रवृत्तानि। धर्मार्थकाममोक्षाख्येषु परमप्रेमास्पदेषु चतुर्षु पुरुषार्थेषु आद्यत्रयाणां धर्मार्थकामाख्यानाम् अनित्यत्वं हि श्रूयते। यथा-

**तद्यथेह कर्मचितो लोकः क्षीय"**

**एवमेवामुत्र पुण्यचितो लोकः क्षीयते**[1] इति।

ततश्च **न स पुनरावर्तते** इत्यादिश्रुतिभिः नित्यत्वावगमात् चतुर्थस्य मोक्षस्य परमपुरुषार्थत्वं प्राचीकशन् तत्त्वदर्शिनः। मोक्षस्य हेतुनिरूपणाय दर्शनानां प्रादुर्भावः।

धातोः ल्युट् प्रत्यये कृते निष्पन्नोऽयं दर्शनशब्दः। दृश्यते अवबुध्यते परमं दृश् वस्तुतत्त्वम् अनेन इति दर्शनम्। **दर्शनालोकनेक्षणम्** इत्यमरः। एवं च आलोक-ईक्षणशब्दयोः पर्यायत्वेन दर्शनशब्दः कोशे निर्दिष्टः ।

परमं वस्तुतत्त्वम् एकं चेदपि दृष्टिकोणस्य वैविध्यात् दर्शनानामपि भेदः सञ्जातः। दर्शनस्य उदयकालः वेदकाल एव। यतोहि दर्शनप्रतिपाद्याः अनेके विषयाः वेदवेदाङ्गादिषु समुपलभ्यन्ते।

**"संहितायामुदितं दर्शनम् उपनिषदि पल्लवितम्"** इति श्रूयते च।

आधिभौतिकादिदुःखेभ्यः निवृत्य जीवः सुखं कथमाप्नुयात् इति ऋषयः विविधप्रकारैः अदर्शयन्। एवमेव भारतीयदार्शनिकमण्डले विविधदर्शनानि संबभूवुः।

दर्शनशास्त्रवाङ्मयं द्विधा विभज्यते। आस्तिकदर्शनं नास्तिकदर्शनञ्चेति।

**अस्ति नास्ति दिष्टं मतिः**[2] इति पाणिनीयसूत्रेण **ठक्** प्रत्यये एतौ सिद्ध्यतः। भट्टोजिदीक्षितः आस्तिकनास्तिकशब्दयोः अर्थः कौमुद्याम् एवमब्रवीत्-

**अस्ति परलोक इत्येवं मतिः यस्य स आस्तिकः।**

**नास्ति परलोक इत्येवं मतिः यस्य सः नास्तिकः।।** इति।

पुनश्च ईश्वरास्तित्वमङ्गीकुर्वाणाः आस्तिकाःअनङ्गीकुर्वाणाः नास्तिका ,ः

---

[1]छा.उ.8.1.6

[2]व्या.सू.4-4-60

इत्यादिकं श्रूयते, तत्र विवादाः अपि सन्ति । तस्मात् ये वेदप्रामाण्यम् अङ्गीकुर्वन्ति ते आस्तिकाः ये नाङ्गीकुर्वन्ति ते नास्तिकाः इत्यर्थवर्णनं तेषां युक्तम् ।

तत्र हि **सांख्य-योग-न्याय-वैशेषिक-पूर्वमीमंसा-उत्तरमीमांसा** चेति षडास्तिकदर्शनानि। **बौद्धजैनचार्वाकानि** त्रीणि नास्तिकदर्शनानि।

भारतीयतत्त्वशास्त्रे चतुर्विधपुरुषार्थेषु धर्म-अर्थ-काम-मोक्षेषु अन्यतमः परमपुरुषार्थ एव मोक्षः। जनन-मरणरूपात् भवबन्धात् विमुक्तः सन् शाश्वतानन्दं जीवः प्राप्नोति चेत् सा एव अवस्था मोक्षः इति कथ्यते। सकलक्लेशनिःसरणेन संसारकासारविमुक्तिः सम्भवति। कर्माणि तु स्वफलोपभोगपर्यन्तं स्थित्वा तदनु क्षीणतां यान्ति। कर्मणां मूलम् अज्ञानम्। अज्ञानमेव अविद्या। तत्त्वज्ञानेन अज्ञानं नश्यति। कर्मणा जनितः बन्धः, तज्जन्यं जननमरणाद्याकारकं दुःखं च समूलं नश्यति इत्यर्थः। अत एव दर्शनकर्तारः **तत्त्वज्ञानात् मोक्षः** इति कथयन्ति।

सांख्यदर्शनं तु पुरुषः प्रकृतिपाशात् सर्वथा विमुक्तः सन् यथा यथार्थं यत्र प्राप्नोति कैवल्ये सैव मोक्ष इति निरूपयति। अस्याम् अवस्थायां पुरुषः केवलं द्रष्टृत्वेन साक्षिरूपेण तिष्ठति। प्रकृतिपुरुषयोः अविवेकात् कारणात् संसारजाले पतित्वा आध्यात्मिक-आदिदैविक-आधिभौतिकदुःखानि त्रिविधानि अनुभवति। प्रकृतिपुरुषयोः विवेकख्यात्या अर्थात् तयोः **यथार्थज्ञानात्** पुरुषः मुक्तिमेति इति सांख्याः अभिप्रयन्ति।

मींमासकास्तु यज्ञयागादिभिः लभ्यमानं स्वर्गमेव मोक्षरूपेण कथयन्ति। काम्य-निषिद्धकर्मभ्यः निवृत्तिः, नित्य-नैमित्तिककर्मणां विषये प्रवृत्तिः मोक्षसाधनं मन्वते। कर्म-ज्ञाने द्वे अपि मोक्षप्राप्तिविषये अत्यन्तम् आवश्यके एव इति मीमांसकानाम् अभिप्रायः। तत्रापि निष्कामबुद्ध्या कर्तव्यबुद्ध्या च अनुष्ठीयमानं कर्मैव मोक्षप्राप्तौ साधनम् इति प्रभाकरगुरुः अभिप्रैति। किञ्च कुमारिलभट्टपादस्तु

मुक्तावस्थायां नित्यसुखानुभवः भवति इति प्रतिपादितवान्। एतच्च सुखं विषयपदार्थजन्यं नास्ति। परिशुद्धः आनन्द इति अस्याभिप्रायः।

बौद्धाः च बहुविधाः सन्ति। तेषां सम्प्रदायः कीदृशः इति तु सङ्क्षेपेण एवं वक्तुं शक्यते। प्रपञ्चोऽयम् अनित्यः। यद्वस्तु वर्तते तदनित्यम्। यदनित्यं तन्नास्त्येव। एतत् बौद्धदर्शने मुख्यं प्रातिपदिकम्। अनेन प्रकारेण संसारः अनित्यः, अनात्मः च। अनित्यरूपम् एनं प्रपञ्चं यः नित्यं भावयति, आत्मरहितम् इमं प्रपञ्चम् आत्मसहितं यः विश्वसति सः नितान्तं दुःखी भवति। **दुःखहेतुः, दुःखनिरोधः, दुःखनिरोधमार्गः** इति त्रयं बुद्धः महान् उपदिदेश। निर्वाणप्राप्त्यै-

1.सम्यग्दृष्टिः 2.सम्यक् सङ्कल्पः 3.सम्यग्वाणी 4.सम्यक्कर्म 5.सम्यगाजीविका 6.सम्यक् प्रयत्नः 7.सम्यक् स्मृतिः 8.सम्यक् समाधिः

इति अष्टौ साधनानि साधितव्यानि इति बुद्धः ब्रूते।

तत्रापि वैभाषिक-माध्यमिकबौद्धमतानुसारम् आत्मोच्छेद एव मोक्ष इति वदन्ति। वैभाषिकमतानुसारं ज्ञानसन्तानमेव आत्मा इति भावयन्ति। ज्ञानसन्तानपदस्य ज्ञानप्रवाहः इत्यर्थः। ज्ञानप्रवाह एव आत्मा चेत् आत्मोच्छेदः नाम ज्ञानोच्छेद एव भवति। आत्मा ज्ञानरहितः भवति। एतत् नैय्यायिकानाम् अस्माकमपि सम्मतमेव। ज्ञानसन्तानमतिरिच्य अन्यः आत्मा वर्तते चेत् किं सः नित्यः ? उत अनित्यः ? इति प्रश्नः आयाति। आत्मा नित्य इति वदति चेत् आत्मोच्छेदः न सम्भवति। कुत इति चेत् नित्यवस्तु न नश्यति किल ! आत्मा अनित्यः चेत् मोक्षार्थं प्रवृत्तिः एव न सम्भवति। सर्वप्रियः आत्मा इत्यतः तादृशं प्रियम् आत्मानं नाशयितुं कोऽपि नेच्छति। अतः **आत्मोच्छेदः मोक्षः** इत्याकारकः बौद्धवादः न समीचीनः।

जैनास्तु समस्तकर्मणां संक्षयः एव मोक्षः इति भावयन्ति। मोक्षे जीवाः

अनन्तज्ञानेन, अनन्तसुखैः च शोभन्ते। मुक्ताः च अनन्तज्ञान-अनन्तवीर्य-अनन्तश्रद्धा-अनन्तशान्तयः इत्याकारकं अनन्तचतुष्टयम् अनुभवन्ति। इदं जीवानां निजस्वरूपम्। तदेव केवलावस्था अथवा कैवल्यम् इत्यपि कथ्यते। बद्धावस्थायाम् एतत् आवृतं सत् शुद्धस्वरूपं मललिप्तं स्यात्। मुक्ताः बद्धजीवानां कल्याणार्थं यतन्ते। मुक्तानां साहाय्येन लोकाकाशं तीर्त्वा सिद्धानां निवासस्थानं प्राप्य, अनन्तचतुष्टयानुभूत्या जीवः आनन्दति। दुःखाभावविशिष्टम् अनन्तसुखरूपमेव मोक्षस्य।

सम्यग्दर्शन-सम्यग्ज्ञान-सम्यग्चारित्रैः मोक्षः सिद्ध्यति इति जैनाः भणन्ति। आवरणभङ्गः एव मोक्षः एतेषां मते। आवरणं नाम कर्मबन्धः। कर्माणि आत्मानम् आवृत्य तिष्ठन्ति। अतः आत्मनः शुद्धं स्वरूपं न गोचरति। श्रद्धा-ज्ञान-चरित्रेभ्यः आवरणे नष्टे सति जन्ममृत्युरूपकर्मबन्धः अपि नश्यति। कर्मणां पुद्गलाभावः सर्वदा सम्भवति। तदा आत्मा स्वेन शुद्धस्वरूपेण शोभते। आत्मा स्वशुद्धस्वरूपेण शोभने समस्तकर्मणां क्षयः आवश्यकः। समस्तकर्मसंक्षय एव मोक्ष इति जैनानां वादोऽपि अस्मत्सम्मत एव। अस्माकमभिप्रायोऽपि जन्ममृत्युरूपकर्मबन्धात् सार्वकालिकविमुक्तिरेव मोक्ष इत्येव खलु!

वेदान्तिष्वपि भिन्नभिन्नपन्थाः वादाश्च सन्ति। तत्र अद्वैतवेदान्तिनः तत्त्वमसीत्याद्यभ्यासेनोत्पन्नं विशुद्धं ज्ञानं जीवस्यानाद्यज्ञानं तज्जन्यमलिनसंस्कारजातं च विनाशयतीत्यहं ब्रह्मास्मीति रूपेण तदानिन्तनः ब्रह्मजीवयोरैक्यानुभव एव मोक्षः इति अभिप्रयन्ति।

विशिष्टाद्वैतवेदान्ते भगवतः दासत्वप्राप्तिरेव मोक्षः। जीवस्याग्निस्फुलिङ्गवत् ब्रह्मणोंऽशत्वे क्षुद्रशक्तिसम्पन्नत्वे च न कदापि तस्य ब्रह्मणासह एकीभावः सम्भवति, जीवस्य स्वरूपतः नित्यत्वात्। सर्वदा स ब्रह्मणः पृथक् तिष्ठति। मोक्षदशायां

केवलानन्दानुभव एव तस्य विशेषलाभः। इत्थं च ध्रुवानुस्मृति (उपासन) रूपाभक्तिरेव जीवस्यैकमात्रं मोक्षासाधनम् इत्यभिप्रयन्ति।

द्वैते हरेः साक्षाद् ज्ञानेन साक्षात्कारेण वा मोक्षावाप्तिः। वैकुण्ठप्राप्तिरेव तन्मते मुक्तिः। सा च स्थूलसूक्ष्मसर्वपदार्थयथार्थज्ञानेन सञ्जायते। ईश्वरजीवयोः पूर्णरूपेण पार्थक्यमेतत् पूर्णज्ञानावाप्त्यनन्तरम् ईश्वरगुणोपलब्धौ तदनन्तासीमशक्तिगुणगरिमावबोधे यावज्जागतिकपदार्थयथार्थस्वरूपावबोधे सति मुक्तिः लभ्यते।

निम्बार्कमते भक्तिरेव मुक्तिसाधनम्। उपासनया हि ब्रह्मावाप्तिः। तच्च ब्रह्म सगुणनिर्गुणोभयरूपेण उपासितुं शक्यते। उपासनाफलस्वरूपमेव च अर्चिरादिमार्गेण ब्रह्मलोकावाप्तिः, स एव मुक्तिः इति ब्रुवन्ति।

तत्रापि **न्याय-वैशेषिकयोः** मते चरमदुःखध्वंसः अर्थात् आत्यन्तिकदुःखनिवृत्तिः एव मोक्षः इति निरूपितवन्तः। मिथ्याज्ञाने नष्टे सति शरीरम्, इन्द्रियाणि, तद्विषयाः चेत्यादिदोषप्रवृत्तिदुःखैः विमुक्तिः लभ्यते। तदेव निःश्रेयसम्। तत्र गौतममहर्षिः **प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभस-च्छल-जाति-निग्रहस्थानानां तत्त्वज्ञानात् निःश्रेयसाधिगमः** इति षोडशपदार्थानां यथार्थज्ञानात् निःश्रेयससिद्धिः भवति इत्युक्तवान्। कणादमहर्षिः तु सप्तपदार्थानां **द्रव्य-गुण-कर्म-सामान्य-विशेष-समवाय-अभावानां** सम्यग्ज्ञानेन निःश्रेयसप्राप्तिः भवति इति अब्रवीत्। एवञ्च न्याय-वैशेषिकयोः मोक्षविषये साम्यं सुस्पष्टमेव। तत्र मोक्षावस्था नाम सुखदुःखरहिततया निश्चैतन्यत्वेन भवतीति ब्रुवन्ति। एतादृशः मोक्षः वेदान्तिसम्मतः नास्ति।

तथा च **दुःख-जन्म-प्रवृत्ति-दोष-मिथ्याज्ञानानाम् उत्तरोत्तरापाये तदनन्तरापायात् अपवर्गः** इति न्यायसूत्रमाधारीकृत्य एवं वक्तुं शक्नुमः। यथा-

आत्मादिपदार्थानामयथार्थज्ञानेन तदनुकूलप्रतिकूलयोः रागद्वेषो भवतः। ताभ्यां प्रयुक्तः पुण्यपापलक्षणां प्रवृत्तिमाचिनुते। ततश्च सुरनरतिर्यगादिनानायोनिषु जन्मास्य भवति। तस्माच्च दुःखानुभवः इत्यनादिकार्यकारणप्रवाहः संसारः। तत्र तत्त्वज्ञानात् अज्ञाननाशः, तन्नाशे सति रागद्वेषानुदयः, तयोरभावे प्रवृत्तिः न उत्पद्यते। प्रागुपचितायाश्च उपभोगेन प्रक्षयः। तदभावे जन्मान्तराभावः। जन्माभावे निर्बीजस्य दुःखस्य अनुत्पादः इत्येवम् आत्यन्तिकी दुःखनिवृत्तिः एव अर्थात् चरमदुःखध्वंस एव मुक्तिरिति नैय्यायिकानां मतम्।

तर्हि सुखाभावविशिष्टः दुःखध्वंसः कथं मोक्षः? यतः, दुःखाभावे अवश्यं सुखं भवति। तदर्थमेव सर्वेऽपि दुःखाभावमपेक्षन्ते न तु तमेव मुख्यतया। इति चेन्न। यतः लोके तद्विपरीततया अपि दृश्यते। यथा – भोजनसुखानुभवेनैव बुभुक्षाजन्यदुःखं परिहरति जनः। अतः तद्दुःखनिवृत्त्यै एव प्रधानतया भोजने प्रवर्तन्त इति तज्जन्यं सुखं पुरुषार्थो न भवति इत्यपि वक्तुं शक्यते।

तत्र परनारीसंसर्गादिषु दुःखनिवृत्त्यभावं विनैव केवलं सुखार्थं प्रवर्तन्ते जनाः इत्यतः दुःखनिवृत्त्यै एव सुखापेक्षा इति न वक्तुं शक्यते। क्वचित् भारापगमादिषु सुखं विनैव दुःखनिवृत्तिः दृष्टा इत्यतः सुखायैव दुःखनिवृत्त्यपेक्षा इति वक्तुं शक्यते।

ननु “भारापगमे सुखी संवृत्तोऽहम्” इत्यादिप्रतीत्या सुखार्थमेव दुःखनिवृत्तिरिति चेत् परनारीभोगादिष्वपि विरहादिदुःखनिवृत्त्यै एव सुखापेक्षा इति कृत्वा दुःखाभावोऽपि पुरुषार्थः स्यात्।

अतः यद्यपि दुःखध्वंससुखयोः साहचर्ये सत्यपि मिथः सापेक्षा नास्त्येवेति हेतोः भिन्नतया एव तत्पुरुषार्थपदमेतीति।

यद्यपि दुःखनिवृत्तिः यद्यनुभूयते, तदैव पुरुषार्थो भवति न तु अननुभूयमाना।

यतो हि विषपानादिजन्यमूर्च्छावस्थायां या दुःखनिवृत्तिः जायते तदर्थं कोऽपि प्रेक्षावान्न प्रवर्तते तदननुभवादेव। नो चेत् तत्रापि प्रवर्तेत। किन्तु लोके न दृश्यत इति चेन्न। लोके आत्मीयजनविरहादिजन्यदुःखहानाय शस्त्रप्रयोगोद्बन्धनादिप्रवृत्तेः दृश्यमानत्वात्। प्रेक्षावन्तः तत्र न प्रवर्तन्त इत्यतः दुःखनिवृत्तिः अननुभूयमाना न पुरुषार्थो भवतीति नास्ति। ते च प्रेक्षावन्तः शास्त्रविरुद्धत्वात् दुःखनिवृत्तिमिच्छन्तोऽपि विषपानादिषु, सुखमिच्छन्तोऽपि परस्त्र्यादिषु न प्रवर्तन्ते। तन्मात्रेण प्रेक्षावत्प्रवृत्त्यभावात्, अननुभूयमानत्वाद्वा दुःखनिवृत्तेरपुरुषार्थताकल्पना अयुक्ता। किञ्च दुःखनिवृत्तिः अनागताप्यनुभूयतेऽनुमादिभिः।

एवञ्च "आत्यन्तिकी दुःखनिवृत्तिः" नाम दुःखध्वंसानन्तरं यत्किञ्चिद्दुःखं, दुःखसाधनं वा अर्थात् एकविंशतिः दुःखानि न जायेरन्। किन्तु दुःखध्वंसकाले चरमदुःखानुभवः योगबलात् तद्ध्वंसमपि विषयीकरोति।, क्षणद्वयमवतिष्ठत्यपि। एतदनुभवात्मकभोगेन अदृष्टनाशात् तृतीयक्षणे तदनुभवनाशः। द्वितीयक्षणे चरमदुःखनाशसन्दर्भे विनश्यदवस्थायां दुःखस्य ध्वंसविषयकानुभवः भवत्येव। अतः दुःखानिवृत्तिः पुरुषार्थो भवत्येव। तदर्थं सर्वेऽपि यतन्त एव। **दुःखस्यानन्तरं सुखं, सुखस्यानन्तरं दुःखं** इत्याकारकस्वीयनियमानुसारं मोक्षे सुखं दुःखं वा न स्यात्। सुखमङ्गीकरोति चेत् दुःखमपि अङ्गीकर्तव्यमापततीति हेतोः दुःखाभावमेव पुरुषार्थं मन्यन्ते नैयायिकाः।

## सहायकग्रन्थसूची

1 . उपन्यासससङ्ग्रहः - पञ्चमुखी राघवेन्द्राचार्यः, कर्णाटक-इतिहाससंशोधनमण्डलम्, धार्वाड नगरम्, 1977

2. संस्कृतवाङ्मयान्तः प्रवेशिका - डा. सोमनाथ दासः, चौखम्बा संस्कृत प्रतिष्ठानम्,

देहली, 2018
3. चिरन्तनी - डा रमाकान्त मिश्रः, चौखम्बा सुरभारती प्रकाशनम्, वारणासी, 2010
4. छान्दोग्योपनिषद्भाष्यम् - रङ्गनाथ कट्टि, शङ्करनारायण अडिग, पूर्णप्रज्ञसंशोधनमन्दिरम्, बेङ्गलूरु, 2004
5. ब्रह्मसूत्रप्रमुखभाष्यपञ्चकसमीक्षणम् - डा. आर् एस् त्रिपाठी, चौखम्बा संस्कृतसिरीज् आफीस्, वारणासि, 1972
6. अनुव्याख्यानम् - श्रीनिवासतीर्थाचार्यः, श्रीमज्जगद्गुरु श्रीमन्मध्वाचार्य-मूलमहासंस्थानम्, बेङ्गलूरु

शोधच्छात्रः
द्वैतवेदान्तविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः
pradee562@gmail.com
दूरवाणी - 9491646532

❑ ❑ ❑

महस्विनी – विद्वन्मण्डलीसमीक्षिता परामृष्टा च शोधपत्रिका (ISSN: 2231-0452)
कुसुमम् : जनवरी - जुलै २०२२ सम्पुटम् : प्रथमम्

# उदयनस्य ऐतिहासिकता

**यदुश्री केपि**

**सारांशः** - संस्कृतरूपकेतिवृत्तेषु प्रथितं वत्सराजोदयनस्येतिवृत्तम्। संस्कृतसाहित्यप्रपञ्चे समस्तप्रभेदेषु निहितायाः वत्सराजवासवदत्तयोः कथायाः आधारभूताः वर्तन्ते बृहत्कथा, बृहत्कथामञ्जरी तथा कथासरित्सागरम् इत्यादि संस्कृतलोककथाः। लोककथाधारितोदयनवृत्तान्तेषु प्रभाविताः सहृदयाः अस्याः कथायाः रूपात् रूपं परिवर्तनं कर्तुमारभन्त। तत्फलत्वेन उदयनेतिवृत्ते बहुप्रकारेण नवीनघटनानां योजना तथा च निजांशानां त्याजनं च सञ्जातम्। काले गते सति वत्सराजोदयनस्य केवलं काल्पनिककथापात्रत्वेन परिणामः सञ्जातः। तस्य ऐतिहासिकता सम्पूर्णरीत्या कालयवनिकायाम् आच्छादिता।

अस्यां शोधपत्रिकायां संस्कृतरूपकेषु बहुधा काल्पनिकेतिवृत्तमाधारीकृत्य उपवर्णितायाः वत्सराजोदयनस्य कथायाः ऐतिहासिकदृष्ट्या प्राधान्यस्य व्यवस्थापनमेव मुख्योद्देशः।

**कूटशब्दाः** - रूपकम्, वत्सराजोदयनः, लोककथाः, उदयनाधारितरूपकाणि, उदयनस्य ऐतिहासिकता, पाण्डवराजवंशः, नन्दराजवंशः।

भासकवेः कालादारभ्य रूपकसाहित्ये उदयनकथायाः प्रचारः बहुलो दृश्यते। तत्फलेनैव भासस्य त्रयोदशनाटकचक्रे द्वयोः रूपकयोः इतिवृत्तम् उदयनकथाश्रितं सञ्जातम्। न तु केवलं भासनाटकेषु अपि च अन्येषु रूपकेष्वपि उदयनकथायाः स्वीकारः लक्षित एव। तादृशरूपकेषु मुख्यतमाः-

- प्रतिज्ञायौगन्धरायणम् - भासकविः
- स्वप्नवासवदत्तम् - भासकविः
- प्रियदर्शिका - हर्षवर्धनः
- रत्नावली - हर्षवर्धनः
- तापसवत्सराजम् - अनङ्गहर्षः (मात्रराजः)
- वीणावासवदत्तम् - अज्ञातकर्तृकम् ।

एवमेव अनुपलब्धेषु रूपकेष्वपि उदयनकथाम् इतिवृत्तत्वेन स्वीकृतमासीदित्यत्र श्रृङ्गारप्राकाश-अभिनवभारती-नाट्यदर्पण-औचित्यविचारचर्चा-नाटकलक्षणकोशः इत्यादि ग्रन्थेषु परामर्शाः उपलब्धाः सन्ति। तत्र सूचितानां रूपकाणां नामानि यथा-

- अभिसारिकावाञ्छितम् - विशाखदत्तः
- वासवदत्तानाट्यधारा - सुबन्धुः (मौर्यकालीनः)
- मनोरमावत्सराजम् - भीमटः
- ललितरत्नमाला - क्षेमेन्द्रः
- वासवदत्ताहरणम् - अज्ञातकर्तृकम्।

अत्यन्तं प्रसिद्धायास्याः वत्सराजोदयनकथायाः मूलस्रोतः किमिति परिशीलयामश्चेत् तत् गुणाढ्यस्य बृहत्कथायाम् उपवर्णितोदयनकथा इत्यवगम्यते। पैशाचीभाषायां प्रणीतस्यास्य ग्रन्थस्य अनुपलब्धिवशात् अस्यैव ग्रन्थस्य बृहत्कथामञ्जरी, बृहत्कथाश्लोकसंग्रहः, कथासरित्सागरः इत्यादिसंस्कृतानुवादानाम् अनुशीलनेनैव रूपकाधारितेतिवृत्तानां मूलस्रोतः गुणाढ्यस्य बृहत्कथायाम् उपवर्णितकथातन्तुरेव इत्यत्र स्पष्टता आयाति।

पूर्वोक्तेषु बृहत्कथायाः संस्कृतरूपान्तरेषु सोमदेवभट्टप्रणीते कथासरित्सागरे

वर्णितोदयनकथा एव परवर्तिकाले उदयनेतिवृत्ताश्रितसंस्कृतरूपकाणाम् इतिवृत्तं सम्पन्नम्। कथासरित्सागरे एव कविः स्वयं वदति यत्, काश्मीरदेशनरेशस्य पत्न्यै सूर्यमत्यै विनोदप्रदानार्थमेव बृहत्कथायाः साररूपेण अस्य ग्रन्थस्य रचनां चकारेति। तद्यथा- **बृहत्कथायाः सारस्य संग्रहं रचयाम्यहम्**[1]

तथा-

**नानाकथामृतमयस्य बृहत्कथायाः सारस्य सज्जनमनोम्बुधिपूर्णचन्द्रः।**

**सोमेन विप्रवरसूरिगुणाभिरामरामात्मजेन विहितः खलु संग्रहोऽयम्।।**[2] इति।

अष्टादशलम्बकात्मकेऽस्मिन् ग्रन्थे नायकः उदयनपुत्रः नरवाहनदत्तः परन्तु द्वितीयलम्बकादारभ्य सप्तमलम्बकपर्यन्तम् उदयनस्य कथा एव प्रामुख्येन वर्ण्यते। उदयनस्य ऐतिहासिकता कथासरित्सागरे प्रस्तुतं चेदपि उदयनकथाश्रितरूपकेषु केवलम् उदयनं लक्ष्यीकृत्य स्वतन्त्ररूपेण काल्पनिकांशान्नपि योजयित्वा कवयः कथापात्रेषु परिवर्तनानि समानयन्।

तत्र स्वप्नवासवादिप्राचीनरूपकेषु कविः नायकस्योदयनस्य वंशादिकं परामृशति परन्तु तत्र उदयनस्य कथा काल्पनिकरीत्या एव अधिकतया उपवर्णिता भासते। अनङ्गहर्षादयः यथा उदयनस्य कथांशमाधारीकृत्य रूपकाणि निबन्धीकृताः तत्र उदयनस्य केवलं काल्पनिकपरिवेषमेव कल्पितवन्तः। अर्थात् स्वतन्त्रतया ते तत्र कथापात्रेषु कथायां च परिवर्तनानि परिवर्धनानि च आनीतवन्तः। सहृदयानाम् आस्वाद्यतां लक्षीकृत्य विरचितानां एतेषां रूपकाणां लोके प्रचुरप्रचारः आगतः परन्तु कालान्तरे उदयनस्य ऐतिहासिकता नितान्तं काल्पनिकांशैः आच्छादिता अभवत्।

---

1.कथा.सा-1/1/3

2.कथा.सा-ग्रन्थकर्तुः प्रशस्ति

कथासरित्सागरे सूचितानां ऐतिहासिकांशानां पुराणे, ऐतिहासिकग्रन्थेषु च संसूचितांशानां परिशीलनं कृत्वा उदयनस्य ऐतिहासिकपृष्ठभूमेः पुनःस्थापनं कार्यम्।

तत्र प्रथमं कथासरित्सागरे उदयनस्य ऐतिहासिकांशाः के इत्यवलोकयामः। उदयनस्य वंशः कः ? इत्यत्र कथासरित्सागरे सूचना विनिवेशिता दृश्यते। तत्र प्रथमं द्वितीयलम्बके पाण्डवीयेषु अर्जुनादारभ्य उदयनपितृशतानीकपर्यन्तं वंशावलिः सूच्यते यथा-

**तस्यां राजा शतानीकः पाण्डवान्वयसम्भवः।**
**जनमेजयपुत्रोऽभूत्पौत्रो राज्ञः परीक्षितः।।**
**अभिमन्युप्रपौत्रश्च यस्यादिपुरुषोऽर्जुनः।**
**त्रिपुरारिभुजस्तम्भदृष्टदोर्दण्डविक्रमः।।**
**ततस्तस्य सुतो जज्ञे सहस्रानीकसंज्ञकः।**
**शुशुभे स पिता तेन विनयेन गुणो यथा।।**
**स वसुत्वं समुत्पन्नः सहस्रानीकभूपतेः।**
**शतानीकस्य तनयो भूषणं शशिनः कुले।।**[1] इति।

पुनः तत्रैव मृगावत्या सह सहस्रानीकस्य विवाहः, तयोः पुत्रत्वेन उदयनस्य जन्मप्राप्तिरपि उपवर्णितोऽस्ति। तद्यथा-

**ततश्च दिवसैस्तत्र श्लाघनीयमनिन्दिता।**
**सत्सङ्गतिरिवाचारं पुत्ररत्नमसूत सा।**
**श्रीमानुदयनो नाम्ना राजा जातो महायशाः।**

---

1.कथा.सरि-2/1/6,7,11,28

**भविष्यति च पुत्रोऽस्य सर्वविद्याधराधिपः।।**[1]

किञ्च चतुर्थे लम्बके उदयनस्य परवर्तिनः के इत्यत्रापि सूचना प्रदत्ता वर्तते। तत्र उदयनपुत्रत्वेन नरवाहनदत्तस्य जन्म जातमिति सूचयति यथा-

**कामदेवावतारोऽयं राजन् जातस्तवात्मजः।**
**नरवाहनदत्तश्च जानीह्येनमिवाख्यया।।**[2]

एवं कथासरित्सागरे उदयनस्य वंशावलिः-

**अर्जुनः→परीक्षित्→जनमेजयः→शतानीकः→सहस्रानीकः→उदयनः→नरवाहनदत्तः।**

पुनः उदयनस्य देश-काल-विवाहादिविषयेऽपि सूचना प्रदत्ता अस्ति। तत्र तस्य देशविषये द्वितीयलम्बके सूचना यथा-

**अस्ति वत्स इति ख्यातो देशो दर्पोपशान्तये।**
**स्वर्गस्य निर्मितो धात्रा प्रतिमल्ल इव क्षितौ।।**
**कौशम्बी नाम तत्रास्ति मध्यभागे महापुरी।**
**लक्ष्मीविलासवसतिर्भूतिर्भूतलस्यैव कर्णिका।।**[3]

एतदनुसृत्य उदयनस्य देशः वत्सदेशः तथा तस्यैव देशस्य प्रधाननगरी कौशम्बी, सा एव नगरी शतानीकस्य राजधानी आसीदित्यपि अवबुध्यते।

पुनः उदयनस्य पत्नीत्वेन कथासरित्सागरे वासवदत्ता पद्मावती च प्रतिपादिते। उदयनकथाधारितरूपकेष्वपि वासवदत्ता उदयनस्य पत्नीत्वेन नो चेत् प्रणयिनीरूपेण वा परामृष्टा दृश्यते। एवं पद्मावती अपि उदयनस्य नायिकात्वेन परामृष्टा दृश्यते। पुनः

---

1.तत्रैव-68,69

2.तत्रैव-4/3/73

3.कथा.स-2/1/4,5

उदयनस्य दिग्विजयविषये कथासरित्सागरस्य पञ्चमे लम्बके विस्तृतवर्णनं कृतं दृश्यते। तस्मिन् वर्णने तस्य समकालीनानाम् अन्यभूपालानां काश्मीरदेशाधिपतिः ब्रह्मदत्तः, कलिङ्गदेशाधिपः, चोलदेशराजा, सिन्धुराजा, पारसीदेशाधिपः इत्यादीनां सूचना लभ्यते। एवम् उदयनः उज्जयिनीनरेशस्य महासेनस्य मगधेश्वरप्रद्योतस्यापि समकालीनः आसीदिति कथासरित्सागरे परिलक्ष्यते।

साम्प्रतं कथासरित्सागरस्थोदयनस्य ऐतिहासिकांशान् महाभारतादि इतिहासपुराणग्रन्थेषु अन्येषु भारतीयेतिहसग्रन्थेषु च उपलक्षितान् परिशीलयामः।

तत्र प्रथमं विष्णुपुराणे चतुर्थे अंशे कुरुवंशपरम्परासंसूचनावसरे पाण्डववंशीयस्य उदयनस्य परामर्शः शतानीकपुत्रत्त्वेन उपलक्ष्यते यथा-

**तस्माच्चोदयन उदयनादहीनरस्ततश्च दण्डपाणिस्ततो निरमत्रः**[1] इति।

एवं मत्स्यपुराणे कुरुवंशवर्णने उदयनस्य नाम दृश्यते यथा-

**वसुदाम्नः शतानीको भविष्योदयनस्ततः।**
**भविष्यते चोदयनाद्वीरो राजा वहीनरः।।**
**वहीनरात्मजश्चैव दण्डपाणिर्भविष्यति।**
**दण्डपाणेर्निरामित्रो निरामित्रात्तु क्षेमकः।।**[2]

अत्र द्वित्रापि उदयनस्य वंशावलिः कथासरित्सागरस्थवंशावल्या समानमिति दृश्यते।

पाण्डवानां कथाधारितग्रन्थेषु मुख्यतमं महाभारतम्। तस्मिन् ग्रन्थेऽपि उदयनदेशस्य वत्सदेशस्य परामर्श उपलभ्यते। तद्यथा-

**उलूकः कैतवो राजा चित्राङ्गदशुभाङ्गदौ।**

---

1.विष्णु,पु-4/21/15

2.मत्स्य.पु-50/86,87

**वत्सराजश्च ऋतिमान्कोसलाधिपतिस्तदा ।।**[1]

पुनः श्रीमद्भागवतेऽपि उदयनस्य तथा वत्सवंशस्यापि ऐतिहासिकतां दृढीकर्तुं सूचना प्रदत्ता दृश्यते। तत्र निरूपितेषु षोडशजनपदेषु पाञ्चाल-कुरुदेशयोः अर्जुनपौत्रः परीक्षित् प्रथमभूपालः तथा अन्तिमः राजा क्षेमकः इति उक्तम्। एतद् वर्णनं पुराणे उपलक्षितोदयनवंशेवर्णनेन सह समानं दृश्यते।

भारतीयैतिहासिकग्रन्थेष्वपि उदयनस्य ऐतिहासिकता दृढतया प्रदर्शिता वर्तते। तत्र **अङ्गुत्तरनिकाय**मिति बौद्धानां सिद्धान्तग्रन्थे कुरुक्षेत्रयुद्धस्य पश्चात् निरूपितानां षोडशजनपदानां नामानि वदन्ति। तत्र वत्सराजस्य नामापि सूचितम्। तद्यथा-

**कुरुवंशम्-पाञ्चाल-कोसल-काशी-मगध-अङ्ग-कम्बोज-वज्जि-मल्ल-वत्स-चेदी-मत्स्य-शूरसेन-अश्वक-अवन्ति-गान्धारः ।**[2] इति।

अत्र पुनः वत्सदेशस्य प्रथमा राजधानी कौशम्बी, वत्सदेशस्य मुख्यः राजा उदयनः इत्यपि उक्तं दृश्यते। पुराणेष्वपि वत्सदेशस्य प्रथमराजधान्याः हस्तिनपुर्याः क्षतिवशात् कौशम्बीराजधानेः उद्भवः इति कथितम्।

एवमेव भारतीयेतिहासग्रन्थेषु वत्सवंशस्य प्रारम्भः कदा? तस्य वंशस्य आवलिः कीदृशीति स्पष्टं निरूपितं दृश्यते। तदनुसृत्य पाण्डववंशादारभ्य उदयनस्य वंशावलिः प्रारब्धा। तदनुसारं उदयनस्य वंशावलिः एवं निरूपयति-

**पाण्डवराजवंशः→मगधराजवंशः→प्रद्योतराजवंशः→शिशुङ्गराजवंशः→नन्दराजवंशः।**

नन्दराजवंशस्य अन्तिमः राजा धननन्दः चन्द्रगुप्तमौर्येण पराजितः। अत एव तदनन्तरं मौर्यवंशस्य प्रारम्भो जातः। तस्य वंशस्य परम्परा तु पालवंशपर्यन्तं बहुलीकृतं

---

[1].महा.भा-1/178

[2].प्रा.भा.इ-पृ.सं-62

दृश्यते। अतः उदयनस्य वंशपरम्परा पाण्डववंशेभ्यः नन्दवंशपर्यन्तं विस्तृता आसीदिति निर्णेतुं शक्नुमः।

पूर्वोक्तप्रकारेण प्रधानतया संस्कृतरूपकेषु निहितायाः वत्सराजस्य कथायाः ऐतिहासिकांशान् परिशील्य साहित्यमण्डले उदयनकथायाः यावत् प्रसिद्धिः आसीत् तथैव भारतीयेतिहासेऽपि उदयनः प्रधानः इति सुस्पष्टमिदानीम्।

## सहायकग्रन्थसूची


- **कथासरित्सागरः-** दुर्गाप्रसादः, काशिनाथशर्मा(संशोधितः), पाण्डुरङ्ग जावाजी, मुम्बै-4,1930
- **जगन्नाथसिद्धान्तपरिशीलनम्-**डा.श्रिष्टि लक्ष्मीकुमार शर्मा, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, 2007
- **विष्णुमहापुराणम्-**आत्मप्रकाशव्याख्या-श्रीधरस्वामी, परिमल मुद्रणालयः, दिल्लि
- **साहित्यदर्पणम्-**विश्वनाथकविः, चौखम्बा विद्याभवनम्, वाराणसी, 1957
- **संस्कृतवाङ्मयान्तः प्रवेशिका-**डॉ.सोमनाथ दाशः,संस्कृत अड्वान्स्ड् रिसर्च् इन्स्टिट्यूट्-2,पुरि,2017
- **स्वप्नवासवदत्तम्-**त.गणपतिशास्त्रि(संशोधितः),राजकीयमुद्रणयन्त्रालयः, तिरुवनन्तपुरम्,1912
- **उदयनकथाश्रित संस्कृत-रूपक समीक्षात्मक अध्ययन-**उषा वर्मा, भारतीय विद्या संस्थान, वाराणसी, 2002
- **प्राचीन भारत का इतिहास-**डॉ.गिरिजा शंकर प्रसाद मिश्र, जयपुर पब्लिषिङ् हाउव्स, राजस्थान

- **प्राचीन भारत का राजनीतिक एवं सांस्कृतिक इतिहास-** हरिदत्त वेदालङ्कार,जाँब प्रिंटर्स,1972
- **भास और सोमदेव भट्ट का उदयन-**डाँ.निवारण महथा, ईस्टर्न बुक लिंकर्स, दिल्लि, 2012
- **संस्कृत साहित्य का अभिनव इतिहास-** राधावल्लभ त्रिपाठी, विश्वविद्यालय प्रकाशन-4, वाराणसी, 2013


Research Scholar
Dept. of Sahitya
NSU, Tirupati
yadusreekp@gmail.com
7012613964

❑❑❑

# भास्कराचार्योक्तरीत्या समवृत्तीयनतांशैः सूक्ष्माक्षवलनसाधनम्

गिरीशभट्टः बि

[**सारांशः** – ग्रहस्थानात् नवत्यंशमितेऽन्तरे कृते ग्रहक्षितिजाख्यवृत्ते क्रान्तिवृत्तप्राचीतः नाडीवृत्तप्राची यद्दिशि यावद्भिरंशैः वलति तद्दिक्कं तावदायनं वलनम्। तथा नाडीवृत्तप्राचीतः समवृत्तप्राची यद्दिशि यावद्भिरंशैः वलति तद्दिक्कं तावदाक्षजं वलनम्। क्रान्तिवृत्तप्राचीतः समवृत्तप्राची यद्दिशि यावद्भिरंशैः वलति तद्दिक्कं तावत्स्फुटवलनम् इत्युच्यते। इति वलनपरिभाषा। तत्र सामान्यतः सर्वेषु सिद्धान्तज्यौतिषग्रन्थेषु नाडीवृत्तीयनतांशान् स्वीकृत्य एव आक्षवलनसाधनगणितं कथितम्। परन्तु एतत् किञ्चित् स्थूलं भवति । समवृत्तीयनतांशान् स्वीकृत्य साधितम् आक्षवलनमेव सूक्ष्मं भवति। भास्कराचार्येणापि सिद्धान्तशिरोमणिग्रन्थे अन्येषामाचार्याणामिव नाडीवृत्तीयनतांशानेव स्वीकृत्य आक्षवलनसाधनगणितं निरूपितम्। किन्तु गोलाध्याये वलनवासनायाम् उत्क्रमज्यानिरासप्रकरणे प्रसङ्गवशात् समवृत्तनतांशान् स्वीकृत्य कथं सूक्ष्मतया आक्षवलनं साधनीयम् इति कथितम्। अस्मिन् विषये शोधपत्रेऽस्मिन् चर्चा क्रियते।]

**नाडीवृत्तीयनतांशैः स्थूलाक्षवलनसाधनविधिः –**

यदि दिनार्धतुल्येन (दिवामानार्धतुल्येन) स्वाहोरात्रनतेन नवत्यंशमिताः सममण्डलनतांशाः लभ्यन्ते तर्हि इष्टेन स्वाहोरात्रनतेन किमिति त्रैराशिकं क्रियते चेत् नतकालांशाः लभ्यन्ते। एतेषां नतकालांशानां या क्रमज्या भवति सा त्रिज्यावृत्तीया आक्षवलनज्या भवति । त्रिज्यावृत्तीयायाः आक्षवलनज्यायाः अक्षज्यावृत्ते परिणामनं कर्तुम् अन्योऽनुपातः – यदि त्रिज्यावृत्ते (त्रिज्यया) एतावती आक्षवलनज्या भवति तर्हि अक्षज्यावृत्ते (अक्षज्यया) किमिति । ग्रहः स्वकीयद्युज्यावृत्ते सञ्चरतीति हेतोः सा

आक्षवलनज्या द्युज्याग्रगता भवति । तस्याः त्रिज्याग्रे परिणामनार्थमनुपातः – यदि द्युज्यावृत्ते एतावती आक्षवलनज्या लभ्यते तर्हि त्रिज्यावृत्ते किमिति । एवं कृते सति पूर्वत्रैराशिके त्रिज्या हरः । इदानीं गुणः । अतः समानयोः गुणहारकयोस्त्रिज्ययोस्तुल्यत्त्वात्तयोर्नाशे कृते सति नतज्यायाः अक्षज्या गुणः, द्युज्या च हरः भवति । फलं स्थूला आक्षवलनज्या भवति । अत्र कथिताः प्रक्रियाः एव समीकरणेषु अधोनिर्दिष्टरीत्या प्रतिपादयितुं शक्नुमः –

दिवामानार्धकलाः अथवा रात्रिमानार्धकलाः ------------- ९०° मिताः समवृत्तनतांशाः ।

स्पर्शादिकालिकनतघटिकाः ---------------- ? = स्थूलाः समवृत्तनतांशाः (नाडीवृत्तीयनतांशाः)

$$\therefore \frac{\text{स्पर्शादिकालिकनतघटिकाः} \times ९०^\circ}{\text{दिवामानार्धकलाः अथवा रात्रिमानार्धकलाः}} = \text{स्थूलाः समवृत्तनतांशाः (नाडीवृत्तीयनतांशाः)}$$

त्रिज्यातुल्यनतज्यायाम् --------------- अक्षज्या लभ्यते चेत्;

स्थूलसमवृत्तगतनतज्यायाम् --------------- ? = द्युज्यावृत्ते आक्षवलनज्या ।

अथवा

त्रिज्यावृत्ते ------------------------------ स्थूलसमवृत्तगतनतज्या लभ्यते चेत्;

अक्षज्यावृत्ते --------------------------- ? = द्युज्यावृत्ते आक्षवलनज्या ।

$$\therefore \frac{\text{स्थूलसमवृत्तगतनतज्या} \times \text{स्वदेशीयाक्षक्रमज्या}}{\text{त्रिज्या}} = \text{द्युज्यावृत्ते आक्षवलनज्या}$$

अभीष्टग्रह-ध्रुवयोरन्तरे द्युज्याचापांशकाः विद्यन्ते । अतः आदौ द्युज्यावृत्तगतम् आक्षवलनं सिद्ध्यति । तस्य वलनस्य त्रिज्यावृत्ते परिणामनं कर्तुमनुपातः –

द्युज्यावृत्ते -------------------------- पूर्वलब्धाक्षवलनज्या (द्युज्यावृत्तीया)

त्रिज्यावृत्ते ---------------------- ? = कदम्बवृत्तगताक्षवलनज्या ।

अतः –

$$\frac{\text{स्थूलसमवृत्तगतनतांशज्या} \times \text{स्वदेशीयाक्षज्या}}{\text{द्युज्या}} = \text{त्रिज्यावृत्तगता आक्षवलनज्या}$$

$$\therefore \frac{\text{स्थूलसमवृत्तनतांशज्या} \times \text{स्वदेशीयाक्षज्या}}{\text{द्युज्या}} = \text{त्रिज्यावृत्तगता आक्षवलनज्या}$$

*तच्चापमानं स्थूलाः आक्षवलनांशाः* भवन्ति । यथोक्तं भास्कराचार्येण –

**नतं खाङ्काहतं भक्तं द्युदलेनाप्तभागकैः ।**

**क्रमज्याक्षज्यया क्षुण्णा स्थूलं वा द्युज्यया हृता ॥**[1] इति ।

**समवृत्तीयनतांशैः साधितानाम् आक्षवलनभागानां सूक्ष्मताप्रतिपादनं, नाडीवृत्तीयनतांशैः साधितानाम् आक्षवलनभागानां स्थूलताप्रतिपादनञ्च –**

आचार्यभास्करेण सिद्धान्तशिरोमणौ गोलाध्याये ग्रहणवासनायां वलनवासनाप्रकरणे समवृत्तीयनतांशैः साधितानाम् आक्षवलनभागानां सूक्ष्मता अधोनिर्दिष्टेषु श्लोकेषु प्रतिपादिता –

**एवमक्षांशकैर्वृत्तं समाख्यात् परितो न्यसेत् ।**

**समकीलकयोः प्रोतं तथा याम्योत्तरं चलम् ॥**

---

[1] सिद्धान्तशिरोमणिः – गोलाध्यायः – ग्रहणवासना – श्लोकः ६८

**तत्तत्खेटोपरि न्यस्तं यैरंशैः खार्धतो नतम् ॥**
**समवृत्तेऽक्षवृत्ते च तैरेव स्यान्नतं ध्रुवात् ।**
**समवृत्तनतांशज्याऽक्षज्यापरिणताक्षजम् ॥**
**द्युज्याग्रे वलनं प्राग्वत्त्रिज्याग्रे परिणाम्यते ।**
*उपपत्त्यानया सम्यक् समवृत्तनतांशजम् ॥*
*वलनं स्यात्तथा वक्ष्ये स्वाहोरात्रनतादपि ।*[1] इति ।

याम्योत्तरवृत्त-क्षितिजवृत्तयोः सम्पातस्थानमेव समस्थानमित्युच्यते । तं समस्थानं परितः स्वदेशीयाक्षांशैः यद्वृत्तं न्यस्यते तदेव समवृत्तमित्युच्यते । गोले तस्य समवृत्तस्य बन्धनं कृत्वा, तस्य समवृत्तस्य परिधौ भांशैः (०° तः ३६०°पर्यन्तम्) अङ्कनं कार्यम् । द्वयोः समकीलकयोः (समस्थानयोः) प्रोतं याम्योत्तरं वृत्तं गोले न्यसेत् । तच्च याम्योत्तरवृत्तं चलं भवति । खमध्यात् ग्रहः यैरंशैः नतो भवति ते एव ग्रहस्य नतकालांशाः भवन्ति । तैः ग्रहस्य नतकालांशैः यस्य ग्रहस्य आक्षवलनं ज्ञातव्यं भवति तस्य ग्रहस्योपरि तद्वृत्तं न्यसेत् । समवृत्ते ग्रहः यैरंशैः नतो भवति तैरेवांशैः अक्षवृत्तेऽपि ध्रुवात् ग्रहः नतो भवति । अत एव समवृत्तनतांशज्या अक्षवृत्ते परिणाम्यते चेत् या ज्या लभ्यते सैव आक्षवलनज्या इति स्पष्टतया अवगम्यते ।

अर्थात्, मध्याह्नकाले अर्कात् समचिह्नं प्रति नीयमानं वृत्ताकारं सूत्रं ध्रुवचिह्नं छित्त्वा याति । अतस्तत्र विषुवद्वृत्त-समवृत्तयोः याम्योत्तरदिशोः एकत्वात् पूर्वापरदिशोरपि एकत्वं भवति । एवं तदानीं विषुवद्वृत्त-समवृत्तयोः दिग्भेदाभावात् आक्षवलनाभावः । अथ यदि दिनार्धोन्नतं सूर्यं कृत्वा समचिह्नात् सूर्यं प्रति नीयमानं सूत्रं यत्र सममण्डले लगति तत्स्थानस्य खस्वस्तिकस्य च मध्ये यावन्तः अंशाः भवन्ति

---

[1] सिद्धान्तशिरोमणिः – गोलाध्यायः – ग्रहणवासना – ६२ तः ६५ १/२ श्लोकाः

तावन्त एव अंशाः अक्षवृत्ते समसूत्र-ध्रुवसूत्रयोर्मध्येऽपि भवन्ति । यतः तदक्षवृत्तं समवृत्तानुकारमेव गोले बद्धम् । अक्षवलये (अक्षवृत्ते) तेषां भागानां (अंशानां) यावती क्रमज्या भवति तावदेव समवृत्त-ध्रुवसूत्रयोरन्तरं भवति । अर्के क्षितिजस्थे सति क्षितिजमेव समसूत्रं भवति । तत्र अक्षसूत्रे समसूत्रे च नतांशाः ९०° भवन्ति । तेषां ज्या अक्षवलये अक्षज्यातुल्या भवति । एवमनया उपपत्त्या सममण्डलगतैः नतांशैरेव आक्षवलनं साधनीयम् इत्युपपन्नम् । किन्तु सममण्डलीयनतांशानां ज्ञानार्थं गणिते बहुपरिश्रमः कार्यः । किन्तु, अस्माभिः नाडीवृत्ते एव कालाः गण्यन्ते इति हेतोः नाडीवृत्तस्य नतकालमेव नतकालांशरूपेण परिवर्त्य आक्षवलनसाधनं सुकरं भवति । अतः सममण्डलीयनतांशानां ज्ञानार्थं प्रयासं परित्यज्य सुखार्थं नाडीवृत्तीयनतांशैरेव अस्माभिः अक्षजं वलनमानीयते । समवृत्तीयनतांशानां, नाडीवृत्तनतांशानाञ्च किञ्चित् भेदः भवति । अतः अस्माभिः नाडीवृत्तगतनतांशेभ्यः यत् आक्षवलनमानीयते तत् स्थूलं भवति । तथापि समवृत्तगतैर्नतांशैः साधितस्य सूक्ष्माक्षवलनस्य, नाडीवृत्तगतैर्नतांशैः साधितस्य स्थूलाक्षवलनस्य च स्वल्पमेवान्तरं भवति । स्वल्पान्तरं तु गणिते दोषाय न कल्पते । तस्मात् कारणात् किञ्चित् स्थूलोऽपि सुखार्थं नाडीवृत्तनतांशैः आक्षवलनसाधनं सर्वेषु सिद्धान्तग्रन्थेषु कथितम् ।

***सूक्ष्मसमवृत्तनतांशैः सूक्ष्माक्षवलनसाधनम् –***

*एवं सुखार्थं नाडीवृत्तगतैः नतकालांशैः (स्थूलसमवृत्तगत नतांशैः) स्थूलाक्षवलनांशानां साधनं कथं करणीयमिति निरूप्य सूक्ष्मसमवृत्तगत नतांशैः सूक्ष्माक्षवलनांशानां साधनक्रमं भास्कराचार्यः निगदति –*

***अग्रानृतलयोर्योगः समदिक्त्वेऽन्यथान्तरम् ॥***
***तत्त्रिज्यावर्गविश्लिष्टपदभक्ताक्षशिञ्जिनी ।***

***नतासुदोर्ज्यया क्षुण्णा वलनं पलजं स्फुटम् ॥***[1] इति ।

*ग्रहणकाले अर्कस्य शङ्कुः, शङ्कुतलम्, अग्रा च साध्या। अग्रा-नृतल( शङ्कुतल) योः समदिक्त्वे योगः, भिन्नदिक्त्वे अन्तरं* च *क्रियते चेत् भुजः लभ्यते। त्रिज्यावर्गतः भुजवर्गं संशोध्य मूलं क्रियते चेत् या कोटिः लभ्यते सा उपवृत्तस्य त्रिज्या (व्यासार्धं) भवति।* उपवृत्तस्य त्रिज्यया स्वदेशीयाक्षज्या लभ्यते चेत् *ग्रहणकालिकनतासूनां भुजज्यया किमिति त्रैराशिकं कार्यम्। फलं सूक्ष्मा (स्फुटा) आक्षवलनज्या भवति। अर्थात् स्वदेशीयाक्षज्या ग्रहणकालिकनतासूनां दोर्ज्यया क्षुण्णा, उपवृत्तत्रिज्यया हृता चेत् स्फुटा आक्षवलनज्या लभ्यते*। एतां गणितप्रक्रियां समीकरणरूपेण अधोनिर्दिष्टरीत्या व्यक्तीकर्तुं शक्यते –

$$\frac{\text{स्वदेशीयाक्षज्या} \times \text{ग्रहणकालिकनतासूनां भुजज्या}}{\sqrt{(\text{त्रिज्या}^{२} - (\text{अग्रा}+\sim\text{शङ्कुतलम्})^{२}}} = \text{सूक्ष्मा आक्षवलनज्या}$$

*तच्चापमानं सूक्ष्माः आक्षवलनांशाः भवन्ति । एवं* प्रकारेण *समवृत्तननतांशैः सूक्ष्माक्षवलनसाधनं* कर्तुं शक्यते। परन्तु अत्र गणितप्रक्रियायाः बाहुल्यात्, स्वल्पान्तरत्वाच्च गणकैः आक्षवलनसाधने एषा प्रक्रिया सामान्येन नानुस्रियते। ईषत्स्थूला चेदपि सुखार्थं नाडीवृत्तगतस्थूलनतांशैरेव आक्षवलनसाधनपद्धतिर्गणकैरनुस्रियते।

***अत्रोपपत्तिः –***

गोले समवृत्तसमानान्तरम् उपवृत्तं बद्ध्वा समवृत्तगतैर्नतांशैः सूक्ष्माक्षवलनसाधनगणितस्य वासना कथं प्रदर्शनीया इति भास्कराचार्येण वासनाभाष्ये

[1] सिद्धान्तशिरोमणिः – गोलाध्यायः – ग्रहणवासना – ६६, ६७ श्लोकौ

निरूपितम् । तद्यथा – ग्रह-समवृत्तयोः दक्षिणोत्तरमन्तरं ज्यारूपं बाहुतुल्यं स्यात् । तथा विषुवद्वृत्तादुत्तरतो दक्षिणतो वा क्रान्तिज्यामितान्तरे द्युज्यावृत्तं कल्प्यम् । तथैव समवृत्तादपि बाहुवशात् उत्तरतो दक्षिणतो वा बाहुतुल्ये अन्तरे उपवृत्तं कल्प्यम् । तदपि भांशैः (३६०°) अङ्क्यम् । तस्मिन् उपवृत्ते बाहुवर्गोनत्रिज्यावर्गस्य पदं व्यासार्धं (त्रिज्या) भवति ।

अग्रा+~शङ्कुतलम् = भुजः[1]

$$\sqrt{\text{त्रिज्या}^{२} - \text{भुजः}^{२}} = \text{उपवृत्तस्य त्रिज्या}$$

द्युज्यावृत्त-उपवृत्तयोः यौ प्राक्पश्चिमसम्पातौ भवतस्तयोः सम्पातबिन्द्वोः ज्यकावत् यत्सूत्रं निबध्यते तस्य सूत्रस्य अर्धमेव उपवृत्ते नतांशानां ज्या भवति । सैव अहोरात्रवृत्तगतनतांशानां भुजज्या भवति । सा भुजज्या त्रिज्यावृत्तीया भवति । तया अहोरात्रवृत्तगतनतांशानां भुजज्यया सूक्ष्माक्षवलनज्यायाः आनयनार्थं त्रिज्यावृत्तगतायाः अहोरात्रवृत्तगतनतांशानां भुजज्यायाः द्युज्यावृत्ते परिणामनं क्रियते । तदर्थमेकः अनुपातः कार्यः – यदि त्रिज्यावृत्ते एतावती अहोरात्रवृत्तगतनतांशानां भुजज्या लभ्यते तर्हि द्युज्यावृत्ते कियतीति । एवमनुपातेन उपवृत्तगता नतांशज्या लभ्यते –

$$\frac{\text{द्युज्या} \times \text{त्रिज्यावृत्ते अहोरात्रवृत्तनतासूनां भुजज्या}}{\text{त्रिज्या}} = \text{उपवृत्तगतनतांशज्या}$$

द्युज्यावृत्तीयनतासूनां भुजज्या एव उपवृत्तीयनतांशज्या भवति।

---

[1] ~ इत्येतत् अन्तरचिह्नं भवति । ययोर्द्वयोरन्तरं क्रियते तयोर्मध्ये यदधिकं तस्मात् न्यूनस्य शोधनं करणीयमिति अन्तरचिह्नेन बोध्यते । +~ नाम "धनम् अथवा अन्तरम् (Plus or difference)" इत्यर्थः । शोधपत्रेऽस्मिन् यत्र यत्र एवं चिह्नं दत्तं तत्र सर्वत्रापि एवम् अवगन्तव्यम् ।

उपवृत्तीयनतांशज्यायाः अक्षज्यावृत्ते परिणामनं कर्तुम् अन्योऽनुपातः कार्यः । तद्यथा – यदि उपवृत्तव्यासार्धे उपवृत्तनतांशज्या लभ्यते तर्हि अक्षज्याव्यासार्धे किमिति । एनमनुपातं समीकरणरूपेण अधोनिर्दिष्टप्रकारेण प्रदर्शयितुं शक्यते –

$$\frac{\text{अक्षज्या} \times \text{उपवृत्तगतनतांशज्या}}{\text{उपवृत्तव्यासार्धम्}} = \text{अक्षज्यावृत्ते नतांशज्या}$$

$$\therefore \frac{\text{अक्षज्या} \times \left\{\frac{\text{द्युज्या} \times \text{त्रिज्यावृत्ते अहोरात्रवृत्तनतांशज्या}}{\text{त्रिज्या}}\right\}}{\sqrt{\text{त्रिज्या}^{२} — (\text{अग्रा}+\sim\text{शङ्कुतलम्})^{२}}} = \text{अक्षज्यावृत्ते नतांशज्या}$$

एवम् अक्षज्यावृत्ते या नतांशज्या लब्धा सा ग्रहस्थाने अर्थात् द्युज्याग्रे आक्षवलनज्या भवति । परन्तु वयं त्रिज्याग्रे ग्रहं पश्यामः । अतः द्युज्याग्रगतायाः आक्षवलनज्यायाः त्रिज्याग्रे परिणामनं करणीयम् । तद्यथा – "द्युज्याग्रे एतावती आक्षवलनज्या लभ्यते चेत् त्रिज्याग्रे कियतीति ।" एनमनुपातं समीकरणरूपेण अधोनिर्दिष्टप्रकारेण प्रदर्शयितुं शक्यते –

$$\frac{\left[\frac{\text{अक्षज्या}\left\{\frac{\text{द्युज्या} \times \text{अहोरात्रवृत्तनतासुज्या}}{\text{त्रिज्या}}\right\}}{\sqrt{\text{त्रिज्या}^{२} — (\text{अग्रा}+\sim\text{शङ्कुतलम्})^{२}}}\right] \times \text{त्रिज्या}}{\text{द्युज्या}} = \text{त्रिज्यावृत्तगता सूक्ष्मा आक्षवलनज्या}$$

$$\therefore \frac{\text{अक्षज्या} \times \text{अहोरात्रवृत्तनतासुज्या} \times \cancel{\text{द्युज्या}} \times \cancel{\text{त्रिज्या}}}{(\text{त्रिज्या}^{२} — (\text{अग्रा}+\sim\text{शङ्कुतलम्})^{२} \times \cancel{\text{त्रिज्या}} \times \cancel{\text{द्युज्या}}} = \text{त्रिज्यावृत्तगता सूक्ष्मा आक्षवलनज्या}$$

$$\therefore \frac{\text{अक्षज्या} \times \text{अहोरात्रवृत्तनतासुज्या}}{\sqrt{\text{त्रिज्या}^{२} — (\text{अग्रा}+\sim\text{शङ्कुतलम्})^{२}}} = \text{त्रिज्यावृत्तगता सूक्ष्मा आक्षवलनज्या}$$

एवमत्र प्रथमेऽनुपाते त्रिज्या हरः, द्युज्या गुणः । तृतीयेऽनुपाते त्रिज्या गुणः, द्युज्या हरः । एवं गुणहारकयोस्त्रिज्ययोस्तुल्यत्त्वात्तयोर्नाशे कृते सति अहोरात्रनतासूनां भुजज्या अक्षजीवया गुणिता उपवृत्तव्यासार्धेन सम्भक्ता चेत् त्रिज्यावृत्तगता सूक्ष्मा आक्षवलनज्या लभ्यते इति उपपन्नम् । अत एव उक्तमाचार्यैः –

**अग्रानृतलयोर्योगः समदिक्त्वेऽन्यथाऽन्तरम् ॥**
**तत्त्रिज्यावर्गविश्लेषपदभक्ताक्षशिञ्जिनी ।**
**नतासुदोर्ज्यया क्षुण्णा वलनं पलजं स्फुटम् ॥**[1] इति ।

एवं प्रकारेण भास्कराचार्येण समवृत्तनतांशैः सूक्ष्माक्षवलनानयनप्रकारः कथितः। भास्कराचार्यः सिद्धान्तशिरोमणौ यत्र यत्र वलनविचारं कथयति तत्र सर्वत्रापि क्रमज्यया एव वलनं साधनीयमिति कथयति। यतो हि भास्कराचार्यात् पूर्ववर्तिभिः लल्लादिभिः गणकैः उत्क्रमज्यां स्वीकृत्य वलनसाधनं कृतम्। परन्तु उत्क्रमज्यां स्वीकृत्य वलनसाधनं कृतं चेत् वास्तवं वलनप्रमाणं न प्राप्यते। क्रमज्यां स्वीकृत्य वलनसाधनं कृतं चेदेव वास्तवं वलनप्रमाणं लभ्यते। एवं भ्रान्त्या उत्क्रमज्याभिः वलनं न साधनीयं, क्रमज्याभिरेव साधनीयमिति ज्ञापयितुमेव भास्कराचार्यः सर्वत्रापि क्रमज्यया एव वलनं साधनीयमिति स्पष्टयति।

**निष्कर्षः** – सर्वैः गणकैः सुखार्थं स्वल्पान्तरत्वाच्च नाडीवृत्तगतैः नतांशैरेव आक्षवलनसाधनक्रमः कथितः। परन्तु भास्कराचार्यः नाडीवृत्तगतैः नतांशैः स्थूलाक्षवलनसाधनं, समवृत्तगतैः नतांशैः सूक्ष्माक्षवलनसाधनं च उभयमपि प्रतिपादितवान्। एवं समवृत्तगतनतांशैः सूक्ष्माक्षवलनसाधनं भास्कराचार्यस्य वैशिष्ट्यं वर्तते। यतो ह्यन्येषु ग्रन्थेषु अयं प्रकारः न दृश्यते। समवृत्तगतान् नतांशान् स्वीकृत्य

---

[1] सिद्धान्तशिरोमणिः – गोलाध्यायः – ग्रहणवासना – ६६, ६७ श्लोकौ

आनीता आक्षवलनज्या अत्यन्तं परिस्फुटा भवति। परन्तु स्वल्पान्तरत्वात्, सुखार्थञ्च नाडीवृत्तीयनतांशान् स्वीकृत्य आक्षवलनसाधनं कृतं चेदपि दोषः नास्ति इति निष्कर्षं दातुं शक्नुमः ।

## सन्दर्भग्रन्थसूची


1. **उपपत्तीन्दुशेखरः;** महामहोपध्यायश्रीदुर्गाप्रसादद्विवेदेन सङ्कलितः, सम्पादकः – श्रीगिरिजाप्रसादद्विवेदी, संस्करणम् – सायु..२००८, प्रकाशनसंस्था – भारतीयबुक् कारपोरेशन् – नवदेहली
2. **ज्योतिषसिद्धान्तमञ्जूषा;** ग्रन्थकर्ता –डॉ ॥ विनयकुमारपाण्डेयः, संस्करणवर्षम् – सा.यु.२०२०; प्रकाशनसंस्था चौखम्बा सुरभारती प्रकाशनम् –, वाराणसी
3. **भास्करीयगोलमीमांसा;** प्रधानसम्पादकः – प्रो ॥ वाचस्पति उपाध्यायः, लेखकः – प्रो ॥ देवीप्रसादत्रिपठी, सम्पादकः – प्रो ॥ रमेशकुमारपाण्डेयः, संस्करणम् – सायु..२०१०, प्रकाशनसंस्था – श्रीलालबहादुरशास्त्रीराष्ट्रिय-संस्कृतविश्वविद्यालयः, नवदेहली
4. **मसुधाकरद्व.म.िवेदिप्रणीतया 'सुधावर्षिणी'टीकया संवलितः सूर्यसिद्धान्तः;** सम्पादकः विद्यावारिधिः श्रीकृष्णचन्द्रद्विवेदी –, द्वितीयं संस्करणम्, संस्करणवर्षम् –सा.यु.२०१६; प्रकाशनसंस्था सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः –, वाराणसी
5. **श्रीमद्भास्कराचार्यप्रणीतः सिद्धान्तशिरोमणिः – स्वोपज्ञवासनाभाष्यसंवलितो नृसिंहदैवज्ञकृतवार्त्तिकोपेतश्च;** सम्पादकः – डॉ ॥ मुरलीधरचतुर्वेदः; तृतीयं संस्करणम्; संस्करणवर्षम् – सा.यु.२०१०; प्रकाशनसंस्था – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी
6. **सिद्धान्तशिरोमणेर्गोलाध्यायस्योपपत्तिः** – लेखकः – डॉ ॥ प्रेमकुमारशर्मा,

संस्करणम् – सा.यु.२००५, प्रकाशनसंस्था – नागप्रकाशनम्, नवदेहली
7. **सिद्धान्तशेखरः;** ग्रन्थकर्ता – श्रीपतिः, व्याख्याकारः – सत्यदेवशर्मा, संस्करणम् – सा.यु.२०१५, प्रकाशनसंस्था – चौखम्बा कृष्णदास अकादमी, वाराणसी
8. **सुराकान्तसङ्कलितः ज्योतिर्विज्ञानशब्दकोषः;** लेखनं सम्पादनञ्च – डॉ ॥ सुराकान्तझा, प्रथमं संस्करणम्, संस्करणवर्षम् – सायु..२००९, प्रकाशनसंस्था – चौखम्बा कृष्णदास अकादमी, वाराणसी
9. **सूर्यसिद्धान्तः (आर्षग्रन्थः)**; व्याख्याकारः –श्रीकपिलेश्वरशास्त्री, संस्करणवर्षम् – सा.यु.२०१५, प्रकाशनसंस्था चौखम्भा संस्कृतभवनम् – वाराणसी

शोधच्छात्रः
ज्यौतिष-वास्तुविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

❑ ❑ ❑

# Ancient Indian Kalman Thoughts

**Balakram Sarswat**

**Abstract**

